ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

वेदः १

मध्यमा १

(ધોરણ 11)

प्रतिज्ञापत्रम्

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

मूल्यम् : ₹ 15.00

गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्
'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

विषय-मार्गदर्शनम्
श्री प्रवीणभाई महेता

लेखनम्
श्री शत्रुघ्न पाणिग्राहि (कन्वीनर)
श्री प्रविणभाई पण्डया
श्री विमलभाई व्यास
श्री राजभाई शर्मा

समीक्षणम्
डॉ. अमृतलालः भोगायता
डॉ. फाल्गुनः मोढा
श्री निसर्गः उपाध्यायः
श्री कार्तिकः जानी

भाषाशुद्धिः
श्री अमृतलाल भोगयत

संयोजनम्
डॉ. क्रिष्णा दवे
(विषय-संयोजकः -अंग्रेजी)

निर्माणायोजनम्
श्री हरेन शाह
(उपनियामकः - शैक्षणिकः)

मुद्रणसंयोजनम्
श्री हरेश एस. लीम्बाचीया
(उपनियामकः- उत्पादनम्)

प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **वेद १ मध्यमा १ (ધો૨ણ 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

पी. भारती (IAS)
नियामकः — कार्यवाहकःप्रमुखः
ता.06-07-2019 — गान्धीनगरम्

प्रथमावृत्ति : 2019
प्रकाशक : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः
मुद्रक :

मूलभूतकर्तव्यानि

प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। *

(क) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डितत्तायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीयं संविधानम् : अधिनियमः 51–क

अनुक्रमणिका

1.	ऋग्वेदसंहितापरिचयः	1
2.	यजुर्वेदसंहितापरिचयः	6
3.	सामवेदसंहितापरिचयः	11
4.	अथर्ववेदसंहितापरिचयः	16
5.	शुक्लयजुर्वेदीयस्वरप्रकरणम्	21
6.	याज्ञवल्क्यशिक्षानुसारं वेदाध्ययनम् ।	27
7.	शुक्लयजुर्वेदे प्रथमोऽध्यायः (माध्यन्दिनीय) भाग–1	32
8.	शुक्लयजुर्वेदे प्रथमोऽध्यायः (माध्यन्दिनीय) भाग–2	41
9.	शुक्लयजुर्वेदे द्वितीयोऽध्यायः (माध्यन्दिनीय) भाग–1	50
10.	शुक्लयजुर्वेदे द्वितीयोऽध्यायः (माध्यन्दिनीय) भाग–2	59
11.	शुक्लयजुर्वेदे तृतीयोऽध्यायः (माध्यन्दिनीय) भाग–1	68
12.	शुक्लयजुर्वेदे तृतीयोऽध्यायः (माध्यन्दिनीय) भाग–2	76
13.	शुक्लयजुर्वेदे तृतीयोऽध्यायः (माध्यन्दिनीय) भाग–3	84
14.	शुक्लयजुर्वेदे तृतीयोऽध्यायः (माध्यन्दिनीय) भाग–4	93
15.	रुद्राभिषेकीय–ऋग्वेदमन्त्राः – भागः–1	100
16.	रुद्राभिषेकीय–ऋग्वेदमन्त्राः – भागः–2	107
17.	रुद्राभिषेकीय–सामवेदमन्त्राः – भागः–1	114
18.	रुद्राभिषेकीय–सामवेदमन्त्राः – भागः–2	121
19.	रुद्राभिषेकीय–अथर्ववेदमन्त्राः – भागः–1	128
20.	रुद्राभिषेकीय–अथर्ववेदमन्त्राः – भागः–2	136
21.	महर्षिः वेदव्यासः	144

●

1 ऋग्वेदसंहितापरिचयः

'विद्' धातोः घञ् प्रत्यये कृते वेदशब्दो निष्पद्यते । विद्धातुः न तु केवलं ज्ञानार्थकः अपि च सत्तार्थकः, लाभार्थकः, विचारार्थकश्च वर्तते । वेद्यन्ते ज्ञाप्यन्ते धर्मादिपुरुषार्थचतुष्टयोपायाः येन स वेदः । अर्थात् यः धर्मार्थकाममोक्षादिचतुर्णां पुरुषार्थानां ज्ञानं कारयति सः वेदः । आचार्यसायणेन कृष्णयजुर्वेदभाष्यभूमिकायाम् उक्तम् - इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । ऋग्वेदभाष्यभूमिकायां महर्षिदयानन्दसरस्वतिः प्रतिपादयति -

'विदन्ति-जानन्ति, विद्यते-भवन्ति, विन्ते-विचारन्ति, विदन्ते-लभन्ते सर्वे मनुष्याः सत्त्वविद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति, ते वेदाः ।'

एतस्याः परिभाषायाः अर्थद्वयम् - (1) अर्थात् सर्वे मनुष्याः येषां माध्यमेन सत्यं विद्यन्ते भवन्ति लभन्ते विचारयन्ति ते वेदाः । (2) सर्वे मनुष्याः येभ्यो ग्रन्थेभ्य सत्यविद्यां जानन्ति भवन्ति विचारयन्ति ते वेदाः । शब्दप्रमाणरूपाः वेदाः सन्ति । श्रुतिः, निगमः, आगमः, त्रयी, छन्दस्, आम्नायः, स्वाध्याय इति सर्वे शब्दाः वेदशब्दस्य पर्यायाः । 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति आपस्तम्बवचनानुसारं ज्ञायते मन्त्रब्राह्मणं चेति वेदस्य भागद्वयं वर्तते । मन्त्रसमुदाय एव संहिताशब्देन व्यवहृतः । ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यारूप एव । वेदस्तु वस्तुतः एक एवासीत् । महर्षिणा वेदव्यासेन तस्य चत्वारो विभागाः कृताः यथा- ऋग्वेदः, यजुर्वेदः सामवेदः, अथर्ववेदश्चेति । विभागकरणस्य इदमेव कारणं वर्तते यत् वेदः भवति यज्ञप्रधानः । यज्ञेषु चत्वार एव ऋत्विजः भवन्ति । तान् लक्ष्यीकृत्यैव वेदस्य चतृषु संहितासु विभागः कृतः । एवं वेदविभागं कृत्वा स पैल-वैशम्पायन-जैमिनि-सुमन्त्वादिशिष्येभ्यः क्रमशः ऋग्वेदं यजुर्वेदं सामवेदम् अथर्ववेदं चोपदिष्टवान् ।

ऋग्वेदः श्वेतवर्णः स्यात्
द्विभुजो रासभाननः ।
अक्षमालायुतः सौम्य
प्रीतश्चाध्ययनोद्यतः ॥

। व्यासशिष्यः पैलऋषिः ।

ऋग्वेदसंहिताः

चतुर्षु वेदेषु ऋग्वेदः सर्वप्रथमः वेदः वर्तते । आकारदृष्टयाऽपि ऋग्वेदः चतुर्षु वेदेषु वृहद् वर्तते । ज्ञान-कर्म-उपासनाभेदेन वेदत्रय्याम् ऋग्वेदस्य ज्ञानप्राधानत्वात् सर्वाधिकं महत्त्वं विद्यते तथा ऋग्वेदे अन्येषां बहूनां विषयाणां बहूनां सिद्धान्तानां च प्रतिपादनं लभ्यते । सम्पूर्णमानवजातेः कल्याणार्थं सदुपदेशाः ऋग्वेदे प्रदत्ताः सन्ति ।

ऋग्वेदस्यार्थः

ऋक् शब्दस्यार्थः भवति स्तुतिः, छन्दोबद्धपद्यमयी रचना । यैः मन्त्रैः देवानां स्तुतिः क्रियते ते मन्त्राः ''ऋक्'' कथ्यन्ते । यस्मिन् ग्रन्थे विविधदेवानां स्तवनं पद्यात्मकेषु वाक्येषु भवति स ऋग्वेदः कथ्यते । ऋच्यते स्तूयते यया सा ऋक् इति ऋक्शब्दस्य व्युत्पत्तिः । ऋचां संग्रहः ऋग्वेदः । 'यत्रार्थवशेन पादव्यवस्था सा ऋगिति' भगवान् जैमिनिः । एतेषां ऋचाणामुत्पत्तिः यज्ञपुरुषाद् वभूव इति पुरुषसूक्ते लिखितम् । यथा -

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥

अस्मिन् वेदे ऋषिभिः कृता देवतायाः अतीव मनोज्ञाः स्तुतयः समुपलभन्ते । तैत्तिरीयसंहितानुसारं यज्ञस्य यद्विधानं यजुषा क्रियते तत्तु शिथिलं भवति किन्तु ऋग्वेदेन विहितानुष्ठानं दृढं भवति । तथाहि -

यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तत्, यदृचा तत् दृढमिति ॥

ऋग्वेस्य विभागः

ऋग्वेदस्य विभाजनं द्विधा भवति - अष्टकमाध्यमेन मण्डलमाध्यमेन च । अष्टकक्रमानुसारं समग्रग्रन्थः अष्ट अष्टकेषु विभक्तो भवति । प्रत्येकम् अष्टकेषु अष्टौ अध्यायाः भवन्ति । एवं रूपेण सम्पूर्णऋग्वेदः चतुःषष्टि - अध्यायेषु विभक्तोऽस्ति । प्रत्येकम् अध्यायानाम् अवान्तरभेदाः वर्गनाम्ना व्यपदिश्यन्ते । वर्गाणां संख्या 2006 (षडधिकद्विसहस्र) भवति ।

मण्डलक्रमानुसारं सम्पूर्णग्रन्थः दश (10) मण्डलेषु विभक्तः अस्ति । अतः ऋग्वेदः ''दशत्रयी'' इत्युच्यते । सम्पूर्णेऋग्वेदे पञ्चाशीतिः (85) अनुवाकाः, तत्र 1017 सप्तदशाधिकैकसहस्रंसूक्तानि सन्ति तथा 11 (एकादश) सङ्ख्याकानि सन्ति । सम्पूर्णेऋग्वेदे सूक्तेषु 10580 1/4 मन्त्राः, 153826 शब्दाः, 432000 अक्षराणि सन्ति । प्रत्येकं मण्डलेन सह कस्यश्चित् ऋषेः सम्बन्धः वर्तते । प्रथममण्डलस्य ऋषिरस्ति शतार्चितनः, द्वितीयमण्डलस्य गृत्समदः, तृतीयमण्डलस्य विश्वामित्रः, चतुर्थमण्डलस्य वामदेवः, पञ्चममण्डलस्य अत्रिः, षष्ठमण्डलस्य भरद्वाजः, सप्तममण्डलस्य वसिष्ठः, अष्टममण्डलस्य कण्वः तथा तेषां वंशजः । नवममण्डलं पवमानकाण्डनाम्ना ज्ञायते तथा ऋग्वेदस्य दशममण्डलम् अर्वाचीनं मन्यते ।

ऋग्वेदस्य शाखाः

यज्ञस्य आवश्यकतामनुभूय संकलितसंहितानां पठनपाठनस्य अक्षुण्णतार्थञ्च व्यासः स्वशिष्यान् वेदान् अपाठयत् । यथोच्यते -

तदृग्वेदधरः पैलः सामगो जैमिनिः कविः ।
वैशम्पायन एवैको निष्णातो यजुषामुत ॥
अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः ।

एते मुनयः पुनः स्वशिष्यान् संहिताः अध्यापयन् । एवं प्रकारेण संहितानाम् अनेकाः शाखाः समुपजाताः । महर्षिपतञ्जलिः स्वकीयमहाभाष्ये पस्पशाह्निके कथयति यत् पूर्वे ऋग्वेदस्य एकविंशतिः (21) शाखा आसन् । वर्तमानसमये ऋग्वेदस्य पञ्चशाखानां नामानि श्रूयन्ते यत्-

यथा - (1) शाकलः, (2) वाष्कलः, (3) आश्वलायनः, (4) शांखायनः, (5) माण्डुकायनश्च ।

अधुना यद् ऋग्वेदस्य पठनपाठनं वर्तते तत् शाकलशाखायाः विद्यते । एतासां पञ्चशाखानां ब्राह्मण-आरण्यक-गृह्यसूत्राणि उपनिषदश्च मिलन्ति ।

ऋग्वेदस्य विषयः

ऋग्वेदः विश्वसाहित्यस्य प्राचीनतमः ग्रन्थः वर्तते । ऋग्वेदस्य प्रारम्भः अग्निसूक्तेन भवति तथा अन्तः संज्ञानसूक्तेन भवति । ऋग्वेदे अग्निदेवः ऊर्जायाः प्रतीकं वर्तते । अग्निदेवासम्बद्धसूक्तेषु ऊर्जायाः विविधोपयोगाः प्रदर्शिताः सन्ति । सोमदेवः सृष्टेराधारः वर्तते । त्रिषु लोकेऽप्ययं विद्यमानः विद्यते । वरुणः न्यायस्य देवरूपेण वर्णितः, यः समस्तसृष्टेः नियामकः अस्ति । अश्विनौ युगलदेवौ स्तः । देवानां वैद्यावपि कथितौ । उर्जायाः उत्पत्तेः कृते एतौ धनात्मक-ऋणात्मक-शक्तिरूपेण च वर्णितौ स्तः । तथैव मरुत् रुद्रः इत्यादि-देवाः अपि सृष्ट्याः कृते महत्त्वपूर्णाः सन्ति । एतेषां देवानां सूक्तमाध्यमेन विस्तृतं विवरणं प्रस्तुतं वर्तते ।

हिरण्यगर्भ-नासदीय-पुरुषादिसूक्तानि सृष्टिप्रक्रियायाः विवेचनं कुर्वन्ति । एतानि सूक्तानि दर्शनशास्त्रस्य उद्भवस्य कृते सूत्ररूपाणि सन्ति ।

ऋग्वेदे राजनीतिसम्बद्धविषयस्यापि विवेचनं लभते । यत्र "सभा- समिति-राजा" इत्यादीनां कर्तव्यं राज्यसञ्चालनादीनां वर्णनं वर्तते ।

ऋग्वेदे आध्यात्मिक-दार्शनिक-कलात्मकवैज्ञानिकतथ्यानां निरूपणं पदे पदे प्राप्यते । मुख्यरूपेण ऋग्वेदस्य विषयः ज्ञानं वर्तते । ज्ञानविषयमाधारीकृत्य ऋग्वेदे बहवः मन्त्राः सन्ति । केचन विद्वांसः ऋग्वेदस्य विषयाणां विभाजनं चतुर्षु भागेषु कुर्वन्ति ।

ऊर्मिकाव्यविषयः - अत्र उषस्सूक्तं, पर्जन्यसूक्तं, मरुत्सूक्तं, सूर्यसूक्तमित्यादिसूक्तानां समावेशः भवति । एतेषु सूक्तेषु ऊर्मिमुख्यविषयः वर्तते ।

स्तुतिविषयः - इन्द्रसूक्तम्, अग्निसूक्तं, सोमसूक्तं, वरुणसूक्तम् इत्यादिसूक्तेषु वरुणादिसूक्तेषु देवस्तुतिः ऋग्वेदस्य मुख्यविषयः वर्तते ।

दार्शनिकविषयः - पुरुषसूक्तं, नासदीयसूक्तं, हिरण्यगर्भसूक्तम्, अध्यात्मसूक्तं, वागम्भृणीसूक्तमित्यादिसूक्तानां मुख्यविषयः दार्शनिकतत्त्वज्ञानं वर्तते ।

आख्यानविषयः - ऋग्वेदस्य प्रायेण कतिपयसूक्तेषु संवादैः प्राचीनकथाः वर्णिताः । तेषु यम-यमी-पुरुरवा-उर्वशी-विश्वामित्रनदी-संवाद-सरमापणी-अक्षसूक्तानि च प्रमुखानि सन्ति ।

ऋग्वेदस्य महत्त्वम्

ऋग्वेदः ज्ञानस्य भाण्डागारः वर्तते । ऋग्वेदस्य दशमण्डलेषु प्रायशः सर्वेषां विषयाणां निरूपणं वर्तते । भारतीयसंस्कृतेः, सामाजिक-आर्थिक-राजनैतिक-शैक्षणिक-नैतिकव्यवस्थायाश्च संपूर्ण चित्रणं ऋग्वेदे लभते । अन्यानि अपि महत्त्वपूर्णानि कारणानि सन्ति यथा -

एकेश्वरवादः - ऋग्वेदे एकदेववादस्य सिद्धान्तः वर्तते । अस्मिन् संसारे एक एव ईश्वरः वर्तते । यः सृष्टिसञ्चालनं करोति तमेव जनाः इन्द्रः, वरुणः, विष्णुः, अग्निः, प्रजापत्यादिनाम्ना जानन्ति । यथा -

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥

सर्वेश्वरवादः - ऋग्वेदस्य दशमे मण्डले सर्वेश्वरवादस्य निरूपणं वर्तते । ईश्वरः सर्वव्यापकः, तस्य सत्ता सर्वत्र विद्यते इति ऋग्वेदे श्रूयते । ऋग्वेदस्य पुरुषसूक्तमपि सर्वेश्वरवादस्य पुष्टिं करोति । ऋषिः कथयति त्वम् अग्निः, वरुणः, मित्रः, इन्द्रः वा जायसे । यथा-

त्वमग्ने वरुणो जायसे यत् त्वं मित्रो भवसि यत् समिद्धः ।
त्वे विश्वे सहसस्पुत्र देवास्त्वमिन्द्रो दाशुषे मर्त्याय ।

जीवात्मनः परमात्मनश्च सम्बद्धः - एतस्य विषयस्य कृते ऋग्वेदे बहवः मन्त्राः लभन्ते । पुरुष-नासदीयादिसूक्तेषु एतत् द्रष्टुं शक्यते । अस्य वामीयसूक्तस्य एकस्मिन् मन्त्रे सुन्दररूपेण उभयोः स्वरूपं प्रतिपादितम् । यथा -

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥

सृष्ट्युत्पत्तिः - ऋग्वेदः सर्वप्रथमो वेदः वर्तते । अत्र सर्वप्रथमं सृष्ट्युत्पत्तेः सिद्धान्तः ऋग्वेदे एव प्राप्यते, यथा पुरुषसूक्ते एकस्मिन् मन्त्रे वर्णितं वर्तते यत्-

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्त्वाऽत्य तिष्ठद्दशाङ्गुलम् ॥

पुरुषसूक्ते प्रतिपादितमस्ति पुरुषस्वरूपं तत् अस्याः सृष्टेः मूलकारणं वर्तते । तस्मात् यज्ञात् चतुर्णां वेदानाम् एवञ्च चातुर्वर्ण्यस्योत्पत्तिरपि अभवत् ।

समाजव्यवस्था - ऋग्वेदे बहुत्र सामाजिकव्यवस्थायाः निरूपणं मिलति । समाजे वर्णाश्रमव्यवस्था महत्त्व-पूर्णाऽस्ति । ऋग्वेदस्य पुरुषसूक्ते चतुर्वर्णानां माध्यमेन सामाजिकव्यवस्था निरूपिताऽस्ति । यथा -

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

इत्थं ऋग्वेदे अन्येषां बहूनां विषयाणां बहूनां सिद्धान्तानां च प्रतिपादनं लभते । अत एव चतुर्षु वेदेषु ऋग्वेदस्य महत्त्वं सर्वोपरि वर्तते । अस्य वेदस्य ऐतरेय-कौषीतकीति नाम्ना द्वे ब्राह्मणे आरण्यके उपनिषदौ च स्तः । आश्वालायनं शाङ्ख्यायनाख्यं द्वे श्रौतसूत्रे गृह्यसूत्रे च वर्तेते । आयुर्वेदः अस्योपवेदः वर्तते ।

शब्दार्थः

ऋक् - स्तुतिः, **शिथिलम्** - दुर्बलम् **अर्वाचीनम्** - आधुनिकम्, **सर्वेश्वरः** - ईश्वरस्य सत्ता सर्वत्र विद्यते इति भावः, **एकेश्वरवादः** - एक देववादस्य सिद्धान्तः, **सदुपदेशः** - उत्तमोपदेशः ।

स्वाध्यायः

1. अधोलिखतप्रश्नेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) कः वेदशब्दस्य पर्यायः नास्ति ?
(अ) श्रुतिः (ब) निगमः (क) संहिता (ड) आम्नायः

(2) ऋग्वेदस्य ऋत्विक् कः ?
(अ) होता (ब) उद्गाता (क) अध्वर्युः (ड) ब्रह्मा

(3) मन्त्रब्राह्मणयोर्वेदनामधेयम् इति वचनं कुत्र श्रूयते ?
(अ) आपस्तम्बश्रौतसूत्रे (ब) कात्यायनश्रौतसूत्रे (क) गोपथब्राह्मणे (ड) ऋग्वेसिंहतायाम्

(4) ऋग्वेदस्य मुख्यप्रतिपाद्यविषयः कः अस्ति ?
(अ) ज्ञानम् (ब) कर्म (क) उपासना (ड) भक्तिः

(5) ऋग्वेदे कति मण्डलानि सन्ति ?
(अ) 5 (ब) 7 (क) 8 (ड) 10

(6) प्रत्येकम् अष्टकेषु कति अध्यायाः भवन्ति ?
(अ) 5 (ब) 7 (क) 8 (ड) 10

(7) ऋग्वेदस्य उपवेदः कः ?
(अ) धनुर्वेदः (ब) आयुर्वेदः (क) कर्मकाण्डम् (ड) गान्धर्ववेदः

(8) तृतीयमण्डलस्य ऋषिः कः ?
(अ) अत्रिः (ब) भरद्वाजः (क) विश्वामित्रः (ड) वामदेवः

(9) ऋग्वेदस्य प्रारम्भः केन सूक्तेन भवति ?
(अ) इन्द्रसूक्तेन (ब) वायुसुक्तेन (क) गणपतिसूक्तेन (ड) अग्निसूक्तेन

(10) ऋग्वेदस्य कस्मिन् मण्डले सर्वेश्वरवादस्य निरूपणं वर्तते ?
(अ) प्रथममण्डले (ब) तृतीयमण्डले (क) नवमण्डले (ड) दशममण्डले

2. एकैकेन वाक्येन उत्तरं देयम् ।

(1) वेदशब्दस्य के सन्ति चत्वारोऽर्थाः ?
(2) 'ऋग्' शब्दस्य का व्यत्पत्तिः ?
(3) किमर्थम् ऋग्वेदः ''दशत्रयी'' इत्युच्यते ?
(4) वेदार्थप्रतिपादने आचार्य दयानन्दस्य मतं किमस्ति ?
(5) ऋग्वेदस्य के सन्ति मन्त्रद्रष्टारः ऋषयः ?

(6) ऋग्वेदस्य कानि सन्ति प्रमुखदार्शनिकसूक्तानि ?

(7) ऋग्वेदस्य कानि सन्ति श्रौतसूत्राणि ?

(8) अस्यवामीयसूक्ते किं प्रतिपादितं वर्तते ?

(9) ऋग्वेदे अग्निदेवस्य वर्णनं कथं वर्तते ?

(10) ऋग्वेदे सामाजिकव्यवस्थाया: निरूपणं कथं वर्तते ?

3. टिप्पणी कार्या ।

(1) ऋग्वेदस्य विभाग:

(2) सृष्ट्युत्पत्तिविषय:

(3) एकेश्वरवाद:

(4) ऋग्वेदस्य महत्त्वम्

4. निम्नलिखित शब्दरूपाणां परिचयं यच्छत ।

(1) पुरुषाणाम् (2) माध्यमेन (3) आम्नाय: (4) शिष्येभ्य: (5) मन्त्रै: (6) ऋचाम् (7) स्तुतय: (8) पस्पशाहिनके (9) ऊर्जाया: (10) अश्विनौ

5. निम्नलिखितानां धातुरूपाणां परिचयं यच्छन्तु ।

(1) निष्पद्यते (2) जानन्ति (3) अजायत (4) भवसि (5) क्रियते (6) क्रियते (7) अपाठयत् (8) श्रूयन्ते (9) स्त: (10) जायसे

6. सन्धिविच्छेदं कुरुत ।

(1) सृष्ट्युत्पत्ति: (2) सृष्टेराधार: (3) यदृचा (4) चतुष्टयोपाया: (5) सर्वोपरि (6) कौषीतकीति (7) सर्वाधिकम् (8) सर्वेश्वर: (9) सर्वाधिकम् (10) विविधोपयोगा:

7. सन्धिं कुरुत ।

(1) विविधा: + उपयोगा: (2) इष्टप्राप्ति + अनिष्टपरिहाराय (3) सुमन्तु + आदि (4) सत् + उपदेश: (5) विषयम् + आधारीकृत्य (6) एक + ईश्वर: (7) यत् + विधानम् (8) विभक्त: + भवति (9) दृढम् + इति (10) वचन + अनुसारम्

छात्रप्रवृत्ति:

ऋग्वेदस्य स्वरूपचित्रणं करोतु ।

विशिष्टज्ञानम्

अग्निर्जागार तमृच: कामयन्ते ऽग्निर्जागार तमु सामानि यन्ति ।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योका: ॥ ऋग्वेद: - 5/44/15

मन्त्रेऽस्मिन् इयं शिक्षा मिलति यत् तेजस्विजनस्य पार्श्वे ऋचामागतुमिच्छति, अपि च तस्यैव पार्श्वे सामऋचामपि आगच्छति । तेजस्वीजन: यदा यागरणं करोति तदा सोम: वदति भवत: मित्रतां सम्प्राप्य सुखेन निवसामीति ।

•

2 यजुर्वेदसंहितापरिचयः

यस्य निःश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत् ।
नीर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥

इति सायणवचनानुसारं परमात्मनः निःश्वासभूतोऽयं वेदः विश्वब्रह्माण्डस्य ज्ञानदीपः वर्तते । ''वेदात् सर्वं प्रसिद्ध्यति'' इति वचनानुसारं यत् किमपि विश्वस्मिन् वर्तते तत् सर्वं वेदमूलकमेवमस्ति । विश्वस्य सृष्टिः, स्थितिः, विनाशः' वेदेन एव सञ्जायते । कथम् इति जायमानायां जिज्ञासायां यज्ञपरकोऽयं वेदः यज्ञसम्पादनार्थम् आविर्भूतः । यज्ञसम्पादनमेव ब्रह्म सम्पादनमिति कथ्यते । शतपथब्राह्मणे श्रूयते यथा- एषो वै प्रत्यक्षं यज्ञः यत् प्रजापतिः । विष्णुदेवः यज्ञपुरुषः इति ब्राह्मणवचनम् यथा- यजूंषि विष्णुः । यजुर्वेदस्य ऋत्विक् अध्वर्युसम्बद्धाः यज्ञसम्बन्धिमन्त्राः यजुर्वेदे संगृहीताः । इज्यतेऽनेनेति यजुः । यजुषां संग्रहः यजुर्वेदः ।

अजास्यः पीतवर्णः स्यात् यजुर्वेदोऽक्षसूत्रधृक् ।
वामे कुलिशपाणिस्तु भूतिदो मङ्गलप्रदः ॥

यजुर्वेदस्यार्थः

''यज्ञो वै श्रेष्ठतमं कर्म'' इति शतपथब्राह्मणवचनात् वैदिकसाहित्ये यज्ञस्य महत्त्वविषये ज्ञायते । वायुपुराणे उक्तं यज्ञेन यजुः शब्दः उत्पद्यते । परन्तु ऋग्वेदे उक्तमस्ति येन यज्ञस्य शरीरनिर्माणं क्रियते स यजुर्वेदः । यजुः शब्दः 'यत्', 'जुः' द्वौ शब्दौ मिलित्वा निष्पद्यते । 'यत्' धातुशब्दस्य ह्यकाशमनु जवते तदेतद्यजुर्वायुश्चान्तरिक्षं च यच्च जुश्च तस्माद्यजुः । परन्तु 'यज्' धातोः 'असि' प्रत्ययकृते यजुः निष्पन्नम् । याज्ञिकविधिज्ञैः यजुस् शब्दस्य बहवोऽर्थाः प्रतिपादिताः । अस्य वेदस्य प्रवचनकर्ता वैशम्पायनः । यज्ञेषु क्रियाविशेषसम्पादनाय देवताविशेष-सम्बद्धानां मन्त्राणामुच्चारणं कृत्वा अध्वर्युः यागसम्पादनं करोति । निरुक्तस्य वचनानुसारं यजुश्शब्द-स्यार्थः वर्तते 'यजुर्यजतेः' । अर्थात् यज्ञसम्बन्धितमन्त्राः यत्र सन्ति स यजुः । अनियताक्षरावसानो यजुः । अर्थात् यत्र अक्षराणां संख्व्या अनिश्चिता सः यतुः । ''शेषे यजुः शब्दः'' अर्थात् पद्यबन्धात् गीतिबन्धनात् शेषाः ये मन्त्राः सन्ति स यजुः । 'गद्यात्मको यजुः' अर्थात् गद्यात्मको मन्त्रो यजुः ।

यजुर्वेदस्य शाखा - सम्प्रदायानुसारं यजुर्वेदस्य द्विधा विभाजनं भवति । यथा - आदित्यसंप्रदायस्य शुक्ल-यजुर्वेदः । ब्रह्मसम्प्रदायस्य कृष्णयजुर्वेदः । शुक्लयजुर्वेदसंहितायां केवलं मन्त्रभाग एव वर्तते, परन्तु कृष्णयजुर्वेदसंहितायां विनियोगसहितं मन्त्राः दृश्यन्ते । प्राचीनकाले यजुर्वेदस्य 100 शाखाः प्रचलिता आसन् । ''एकशतमध्यर्युशाखा'' एतादृशं उल्लेखं महाभाष्ये पस्पशाह्निके प्राप्यते । कूर्मपुराणे एवं सर्वानुक्रमण्यामपि यजुर्वेदस्य 100 शाखानाम् उल्लेखः वर्तते । वर्तमानसमये शुक्ल-कृष्णयजुर्वेदस्य आहत्य षट्शाखाः प्रचलिताः सन्ति । तेषु शुक्लयजुर्वेदस्य द्वे शाखे एवं कृष्णयजुर्वेदस्य चतस्रः शाखाः सन्ति । शुक्लयजुर्वेदस्य पञ्चदशशाखाः इत्थं सन्ति -

काण्वमाध्यन्दिनश्चैव शापेयास्तापनीयकाः ।
कापालः पौण्ड्रवत्साश्चावटिकाः परमावटाः ॥
पाराषर्याश्च वैधेया वैनेयोधेयगालवाः ।
वैजवाश्चैव कात्यायनीयाः स्युः शुक्लयाजुषाः
दश पञ्च च शाखास्तु शुक्लस्य यजुषः स्मृताः ॥

(1) शुक्लयजुर्वेदः - शुक्लयजुर्वेदस्य माध्यन्दिनशाखा काण्वशाखेति च द्वे शाखे प्राप्येते । प्रथमा उत्तरभारते, द्वितीय च महाराष्ट्रे प्राप्यते । अनयोः शाखयोः संहिते भिन्ने सत्यावपि स्वल्पमेव भेदं धारयतः बहुष्वंशेषु समनता विद्यते । माध्यन्दिनशाखायां 40 अध्यायाः, 303 अनुवाकाः, 1975 मन्त्राः, 29625 शब्दाः सन्ति । काण्वसंहितायां 40 अध्यायाः, 328 अनुवाकाः, 2086 मन्त्राः सन्ति ।

(2) कृष्णयजुर्वेदः -

(1) तैत्तिरीयशाखा - एषा कृष्णयजुर्वेदस्य महत्त्वपूर्णा शाखा अस्ति । अस्याम् सप्त (7) काण्डानि सन्ति । दक्षिणभारते अस्याः अधिकप्रचारः वर्तते । आचार्यसायणेन अस्योपरि भाष्यं कृतम् अस्ति । अस्याः शाखायाः ब्राह्मणानि, श्रौतसूत्राणि, गृह्यसूत्राणि च अक्षुण्णाः सन्ति ।

(2) मैत्रायणीशाखा - अस्याम् शाखायां चत्वारि (4) काण्डानि एवं 2144 मन्त्राः सन्ति । तेषु मन्त्रेषु 1701 मन्त्राः ऋग्वेदात् गृहिताः सन्ति ।

(3) कठशाखा - मध्यप्रदेशे आस्याः अधिकप्रचलनं वर्तते । महाभाष्यस्य समये अस्याः अधिकप्रचारः आसीत् । अत्र पञ्च (5) खण्डाः तथा त्रिपञ्चाशत् (53) उपखण्डाः सन्ति ।

(4) कपिष्ठलशाखा - कठ-कपिष्ठलयोः मध्ये अधिकसमानता वर्तते । अत्र षट् (6) अष्टकानि सन्ति । तथा मन्त्राणां संख्या निश्चिता नास्ति ।

यजुर्वेदस्य प्रतिपाद्यविषयः

यजुर्वेदस्य प्रमुखः विषयः कर्मकाण्डं वर्तते । तथापि कर्मकाण्डेन सह दार्शनिकविषयाः अपि वर्णिताः सन्ति । राष्ट्रस्य कृते अपि विवरणं अत्र वर्तते । कौटिल्यस्य अर्थशास्त्रस्य श्रोतः यजुर्वेदः वर्तते । शूल्बसूत्राणां बीजम् अत्र अवलोक्यते ।

ज्ञानकर्म-उपासनाभेदेन वेदत्रयिषु यजुर्वेदस्य कर्मप्राधान्यत्वात् सर्वाधिकं महत्त्वं विद्यते । 'यज्ञो वै श्रेष्ठतमं कर्म' इति श्रुतिवचनात् श्रेष्ठकर्मणः सम्पादनेन यजुर्वेदस्य भूमिका अपरिहार्यत्वं वर्तते । धर्मार्थकाम-मोक्ष-चतुर्विधं फलप्राप्त्यर्थं यज्ञस्य स्थानं सुस्पष्टम् । 'दर्शपूर्णमासाभ्यां यजते स्वर्गकाम' इत्यनेन धर्मार्थकामप्राप्तिः, ''अग्नेनय सुपथा'' इत्यनेन मोक्षप्राप्तिः ।

भारतीयसाहित्यस्य न अपि तु विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः वेदाः सन्ति । वेदात् एव सचराचरजगतः उत्पत्तिः सम्भूता । वेदात् प्राचीनं किमपि नास्ति । चतुर्षु वेदेषु यजुर्वेदस्य एकं भिन्नं महत्त्वं वर्तते यत्र 'कर्म' इति विषयः मुख्यरूपेण वर्णितः वर्तते । मानवजीवनेन सह सम्बद्धितानां बहुविधानां तत्त्वानां दर्शनं यजुर्वेदे प्राप्यते । यथा राष्ट्रियभावनाविषये श्रूयते तथा

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी
महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रेथेष्ठाः
सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु
फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

एष मन्त्रः वैदिकराष्ट्रियप्रार्थनारूपेण प्रसिद्धो वर्तते । विश्वप्रेम-ईश्वरस्य स्वरूपम्, निर्भयतायाः कामना, व्रतानां महत्त्वम्, यज्ञमहत्त्वम् इत्यादीनियजुर्वेदस्य मुख्यानि तत्त्वानि सन्ति । अन्ते च यजुर्वेदे मानवजीवस्य कृते बहूपयोगिनः सिद्धान्ताः निरूपिताः सन्ति ।

माध्यन्दिनसंहितायाः अध्यायानुसारं वर्ण्यविषयाः -

शुक्लयजुर्वेदस्य माध्यन्दिनिसंहितैव वाजसनेयीसंहितेति नाम्ना अभिधीयते । अस्यां संहितायां चत्वारिंशदध्यायाः सन्ति । तत्र प्रथमद्वितीयाध्ययोः दर्शपौर्णमासेष्टिसम्बद्धमन्त्राणां संग्रहो वर्तते । तृतीयाध्याये अग्निहोत्राय चातुर्मास्याय च मन्त्राणां संग्रहो कृतो वर्तते । चतुर्थतः अष्टमाध्यायपर्यन्तं सोमयागस्य वर्णनं प्राप्यते । अत्रैव अग्निष्टोमस्य प्रकृतियागरूपेण विस्तृतं वर्णनमस्ति । अग्निष्टोमे सोमस्योपलखण्डेन कुट्टनं कृत्वा रससरक्षणं क्रियते । तेनैव द्वारा प्रापतः मध्याह्ने सायंकाले

चाग्नौ हवनं क्रियते । इदमेव सवनमित्यभिधीयते । नवमदशमाध्यायोः अनेनैव सम्बन्धा मन्त्राः सन्ति । एकादशाध्यायादारभ्य अष्टादशाध्यायपर्यन्तम् अग्निचयनस्य वर्णनं वर्तते । षोडशाध्याये शतरुदीयहोमस्य वर्णनमस्ति । एकोनविंशत्यध्यायादारभ्य एकविंशत्यध्यायपर्यन्तं सौत्रामणियज्ञस्य वर्णनं प्राप्यते । श्रूयते अत्यधिकं सोमपानेनेन्द्रः रुग्णोऽभवत्, तस्य चिकित्सार्थमयं यज्ञः प्रारब्धः । द्वाविंशत्यध्यायादारभ्य पञ्चविंशत्यध्यायपर्यन्तम् अश्वमेधयागमन्त्राणां संग्रहो भवति । षड्विंशत्यध्यायादारभ्य एकोनत्रिंशदध्यायं यावत् खिलमन्त्राणां सङ्कलनं प्राप्यते । त्रिंशदध्याये चतुरशीत्यधिकशतसंख्यकानां पदार्थनामालम्भनस्य पुरुषमेधस्य वर्णनमस्ति । एकत्रिंशत्तमे अध्याये चतुर्षु वेदेषु पठितस्य पुरुषसूक्तस्य वर्णनमस्ति । द्वात्रिंशत् तथा त्रयस्त्रिंशदध्याये सर्वमेघस्य मन्त्राः उल्लिखिताः । चतुस्त्रिंशदध्यायस्यारम्भे शिवसंकल्पसूक्तस्य षण्णां मन्त्राणां संग्रहो वर्तते । पञ्चत्रिंशदध्याये पितृमेधयज्ञसम्बन्धितमन्त्राणां वर्णनं दृश्यते । षट्त्रिंशदध्यायादारभ्याष्टात्रिंशत्तमाध्यायं यावत् प्रवर्ग्ययागस्य मन्त्राणां विशदं वर्णनमस्ति । चत्वारिंशत्तमः अध्याय ईशावास्योपनिषदिति कथ्यते । अस्मिन् दार्शनिकतत्त्वानां गहनविवेचनं वर्तते । तत्र उक्तं च -

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम् ॥

अत्र सर्वत्र ईश्वर एक एव अस्ति । ईश्वरेण सृष्टमिदं जगत् ईश्वर एव नान्यत् इति भावना वर्तते । अस्य वेदस्य ब्राह्मणं शतपथब्राह्मणम्, आरण्यकं बृहदारण्यकम्, उपनिषद् ईशावास्यम्, शिक्षा याज्ञवल्क्यशिक्षा, कल्पः कात्यायनश्रौतसूत्रम्, ज्यौतिषं याजूषज्यौतिषम्, गृह्यसूत्रं पारस्करगृह्यसूत्रम्, शूल्बसूत्रं कात्यायनशूल्बसूत्रम्, प्रातिशाख्यं बाजयनेयप्रातिशाख्यं वर्तते । भाष्यकारेषु उव्वट्टः, महीधरः, आचार्यसायणः, दयानन्दसरस्वती, श्रीरामशर्मा आचार्यः, ग्रीफीथादयः प्रमुखाः सन्ति ।

शब्दार्थः

आविर्भूतः - प्रकटितः, **इज्यते** - स्तूयते, **अध्वर्युः** - यजुर्वेदज्ञः ऋत्विक्, अध्वरं युनक्तीति अध्वर्युः, **सम्भूता** - जाता, **विवरणम्** - वर्णनम्

स्वाध्यायः

1. अधोलिखतप्रश्नेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) श्रेष्ठतमं कर्म किम् अस्ति ?
(क) दानम् (ख) अध्ययनम् (ग) यज्ञः (घ) तपः

(2) शुक्लयजुर्वेदे कति अध्यायाः सन्ति ?
(क) 20 (ख) 30 (ग) 35 (ड) 40

(3) ईशावास्य उपनिषदः सम्बद्धः केन वेदेन सह वर्तते ?
(क) ऋग्वेदेन (ख) यजुर्वेदेन (ग) सामवेदेन (घ) अथर्ववेदेन

(4) दयानन्दसरस्वती कस्य वेदस्य भाष्यकारः ?
(क) ऋग्वेदस्य (ख) यजुर्वेदस्य (ग) सामवेदस्य (घ) अथर्ववेदस्य

(5) दर्शपौर्णमासेष्टिसम्बद्धमन्त्राणां संग्रहः शुक्लयजुर्वेदे कुत्र दृश्यते ?
(क) प्रथमद्वितीयाध्याययोः (ख) तृतीयचतुर्थाध्याययोः (ग) पञ्चमषष्ठाध्याययोः (घ) सप्तमाष्टमाध्याययोः

(6) यजुर्वेदस्य ऋत्विक् कः ?
(क) होता (ख) उद्गाता (ग) अध्वर्युः (घ) ब्रह्मा

(7) शुक्लयजुर्वेदस्य ब्राह्मणग्रन्थस्य नाम किम् ?

(क) शतपथब्राह्मणम् (ख) सामविधानब्राह्मणम् (ग) मन्त्रब्राह्मणम् (घ) ऐतरेयब्राह्मणम्

(8) ''एकशतमध्वर्युशाखा'' एतादृशं उल्लेखं कुत्र प्राप्यते ?

(क) महाभाष्ये (ख) वेदान्ते (ग) बृहद्देवतायाम् (घ) निरुक्ते

(9) शुकयजुर्वेदस्य कत्याध्यायेषु अग्निचयनस्य वर्णनं दृश्यते ?

(क) 5 (ख) 7 (ग) 8 (घ) 10

(10) शुक्लयजुर्वेदस्य शूल्बसूत्रं किमस्ति ?

(क) आपस्तम्बः (ख) बौधायनः (क) कात्यायनः (घ) किमपि नास्तिः

2. एकैकेन वाक्येन उत्तरं देयम् ।

(1) अनियताक्षरावसानो यजुः – इति कथनेन किं ज्ञायते ?

(2) शुक्लयजुर्वेदस्य मुख्यप्रतिपाद्यविषयः किमस्ति ?

(3) निरुक्तानुसारं यजुश्शब्दस्य कोऽर्थः ?

(4) के सन्ति यजुर्वेदस्य भाष्यकाराः ?

(5) कोऽस्ति ईशोपनिषदः प्रतिपाद्यविषयः ?

(6) राष्ट्रियभावनाविषये यजुर्वेदे किं श्रूयते ?

(7) ''शेषे यजुः शब्दः'' इत्यस्य कोऽर्थः ?

(8) सम्प्रदायानुसारं यजुर्वेदस्य विभाजनं कथं वर्तते ?

(9) शुक्लयजुर्वेदस्य कति शाखाः सन्ति ?

(10) आचार्यसायणस्य भाष्यं कस्याः शाखायाः उपरि अस्ति ?

3. टिप्पणी कार्या ।

(1) शुक्लयजुर्वेदः

(2) कृष्णयजुर्वेदः

(3) यजुर्वेदस्य शाखा

4. निम्नलिखित शब्दरूपाणां परिचयं यच्छत ।

(1) परमात्मनः (2) वेदात् (3) ज्ञातारः (4) महाभाष्ये (5) शाखे (6) संहितायाम् (7) श्रौतसूत्राणि (8) राष्ट्रस्य (9) जगतः (10) जिज्ञासायाम्

5. निम्नलिखितानां धातुरूपाणां परिचयं यच्छन्तु ।

(1) सञ्ज्ञायते (2) उत्पद्यते (3) ज्ञायते (4) निष्पद्यते (5) आसन् (6) प्राप्यते (7) श्रूयते (8) अभिधीयते (9) वर्तते (10) दृश्यते

6. सन्धिविच्छेदं कुरुत ।

(1) तदेतद्यजुर्वायुश्चान्तरिक्षम् (2) अनियताक्षरावसानः (3) इत्यभिधीयते (4) बहुष्वंशेषु (5) निःश्वासभूतोऽयम् (6) अत्यधिकम् (7) स्विद्धनम् (8) संहितैव (9) बाह्योऽर्याः (10) बहवोऽर्थाः

7. सन्धि कुरुत ।

(1) सर्वानुक्रमणि + अपि (2) यजुः + यजतेः (3) स्वित् + धनम् (4) धेनुः + वोढा (5) वचन + अनुसारी (6) तस्मात् + यजुः (7) यजुः + शब्दस्य (8) ईश्वरः + एव (9) शाखा + अस्तु (10) उपनिषत् + इति

छात्रप्रवृत्तिः

अध्यायानुसारं वैदिकयागानां नामानि लिखत ।

विशिष्टज्ञानम्

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
योऽसावादित्यपुरुषः सोऽसावहम् ॥ शुक्लयजुर्वेदः - 40/17

भावार्थः - अस्य मन्त्रस्यानुशीलनेन ज्ञायते वैदिककालादेव ज्ञानस्य अन्वेषणेन मानवः सत्यं तथ्यम् आविष्कर्त्तुं प्रयतेत । अत्र आहित्योपासनाविषये चर्च्चा वर्तते । एतदर्थं शुक्लयजुर्वेदस्य सम्बन्धः आदित्यदेवेन साकं वर्तते । परमेश्वरस्य मुखं मायया आच्छादितं वर्तते । तथापि तत्र आदित्यमण्डले यः परमपुरुषः वर्तते स मण्डलस्थः पुरुषः असौ प्रत्यक्षः कार्यकारणसंघातप्रविष्टोऽहमस्मि । एतां चोपासनां कुर्यादिति भावार्थः ।

●

3 सामवेदसंहितापरिचयः

यः कश्चित् कस्यचित् धर्मो मनुना परिकीर्तितः ।
सः सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥

इति भगवता मनुना मनुस्मृतौ कथितम् । वेदाः सर्वज्ञानमयाः सन्ति । अर्थात् यत् ज्ञानं विश्वस्मिन् दृश्यते तत् सर्वं वेदाः प्रतिपादयन्ति । यथा ऋग्वेदः ज्ञानस्य भाण्डागारः वर्तते । यजुर्वेदः कर्मकाण्डस्य आकारः वर्तते । तथैव सामवेदे उपासनायाः महत्त्वं प्रतिपादितमस्ति । ईश्वरप्राप्तेः सर्वाधिकमहत्त्वम् उपासनायाः वर्तते । सामवेदस्य प्रमुखः विषयः उपासना वर्तते । श्रीमद्भगवदगीतायां भगवता श्रीकृष्णेन सामवेदस्य विषये उक्तं यत् – ''वेदानां सामवेदोऽस्मि'' । अतः वैदिकसंहितासु सामवेदस्य महत्त्वं नितान्तं गौरवमयम् । व्यासशिष्यः जैमिनिः सामवेदस्य प्रमुखः आचार्यो वर्तते ।

नीलोत्पलदलाभासः सामवेदो हयाननः ।
अक्षमालान्वितो दक्षे वामे कम्बुधरः स्मृतः ॥

सामशब्दस्य अर्थः

संक्षिप्तरूपेण सामशब्दस्य अर्थः गानं भवति । अत एव उक्तमस्ति यत् – ''गीतिषु सामाख्या'' । अर्थात् यस्मिन् वेदे विशिष्टगानपद्धत्या मन्त्राणां गानं भवति तस्य साम इति संज्ञा भवति । बृहदारण्यकोपनिषदि श्रूयते – 'सा च अमश्चेति तत्साम्न सामत्वम्:' अर्थात् 'सा' शब्दस्यार्थः 'ऋक्' तथा 'अम' शब्दस्य अर्थः गान्धारादयः स्वराः । अर्थात् यत्र ऋचाम् उपरि गानं भवति स एव सामः । पुनश्च साम = सा + अम, सा अर्थात् वाक्, अम अर्थात् प्राण, अर्थात् यस्मिन् वेदे वाक्तत्त्वस्य प्राणतत्त्वस्य च समन्वयः सः सामवेदः ॥

सामवेदस्य स्वरूपम्

सामवेदस्य द्वौ भागौ स्तः । पूर्वार्चिकः तथा उत्तरार्चिकः । पूर्वार्चिके 6 (षट्) प्रपाठकाः 650 (षट्शताधिकपञ्चाशत् मन्त्राः सन्ति । प्रत्येकम् अध्याये द्वे द्वे खण्डे स्तः । पूर्वार्चिकः त्रिधा विभक्तः अस्ति । यथा– छन्द, छन्दसि, छन्दसिका । पुनश्च विषयानुसारं पूर्वार्चिकम् आग्नेयपर्व–ऐन्द्रपर्व–पवमानपर्व–आरण्यकपर्वभेदेन चतुर्षु भागेषु विभज्यते ।

उत्तरार्चिके 9 (नव) प्रपाठकाः 1225 (पञ्चविंशत्यधिक द्वादशशतम्) मन्त्राः सन्ति । 101 (शताधिक एक) मन्त्राः खिलमन्त्राः सन्ति । आहत्य सामवेदे 1875 (पञ्चसप्तति–अधिकाष्टादशशतम्) मन्त्राः सन्ति । सामवदेस्य अधिकमन्त्राः ऋग्वेदस्य अष्टमनवममण्डलाभ्यां गृहिताः सन्तिः । नवममण्डलात् 645 मन्त्राः अष्टमण्डलात् 450 मन्त्राश्च संकलिताः सन्ति । आहत्य ऋग्वेदस्य 1504 मन्त्राः सामवेदे उद्धृताः सन्ति । उत्तरार्चिके बहवे विभागाः सन्ति । तत्र दशरात्रम्, संवत्सरम्, ऐकाहम्, अहीनम्, सत्रम्, प्रायश्चितम्, क्षुद्रश्चेति प्रमुखाः भेदाः ।

सामवेदस्य शाखा

महाभाष्यकारपतञ्जलिना सामवेदस्य 1000 (एकसहस्त्र) शाखानाम् उल्लेखः कृतः – ''सहस्रवर्त्मा सामवेदः'' । शिष्याणां प्रमादेन अनध्यायदिवसे च अध्ययनाद् इन्द्रस्य बज्रप्रहारेण सहस्त्रशाखाः विनिष्टा इति चरणव्यूहकारः कथयति । तथैव अन्येषु ग्रन्थेषु अपि सामवेदस्य बहुविधशाखानाम् उल्लेखः प्राप्यते । 'सामतर्पण' नाम्रः ग्रन्थे सामवेदस्य त्रयोदश शाखानाम् उल्लेखः अस्ति । किन्तु साम्प्रतकाले सामवेदस्य तिस्र एव शाखाः समुपलभ्यन्ते ।

(1) कौथुमीयशाखा ।, (2) राणायनीयशाखा ।, (3) जैमिनीयशाखा ।

(1) कौथुमीयशाखा - कौथुमीयशाखाया अपरं नाम ताण्ड्यशाखा अस्ति । आचार्यशङ्करेण अपि कौथुमशाखायाः उपरि भाष्यं कृतम् । सुप्रसिद्धछान्दोग्यपनिषद् अनया शाखया सम्बद्धा अस्ति । कौथमीयराणायनीयशाखयोर्मध्ये न्यूनोभेदः वर्तते । गुर्जरप्रदेशस्य श्रीमाळिब्राह्मणाः अस्याः शाखायाः अभ्यासं कुर्वन्ति स्म ।

(2) राणायनीयशाखा - राणायनीयशाखा कौथुमीयाशाखावत् समाना एव । केवलमुच्चारणे पार्थक्यमुपलभ्यते । कौथुमीयजनाः 'हाड' तथा 'राइ' यत्रोच्चारयन्ति, राणायणीयाः तत्र 'हाबु' तथा 'रायी' इत्युच्चारयन्ति । अस्याः शाखायाः अनुयायिनः महाराष्ट्रे दृश्यन्ते ।

(3) जैमिनीयशाखा - जैमिनीशाखायां 1687 (सप्ताशिति अधिकषोडशशतम्) मन्त्राः सन्ति । जैमिनीय तथा कौथुमशाखयोर्मध्ये अस्ति कश्चन सम्बन्धः । पाठमध्ये न कश्चन भेदः किन्तु गानमध्ये भेदः वर्तते । अस्याः शाखायाः प्रचारप्रसारः अधिकतया कर्णाटकप्रदेशे वर्तते ।

कौथुमशाखायाः अष्टब्राह्मणग्रन्थाः सन्ति - (1) ताण्ड्यब्राह्मणम् (पञ्चविंशब्राह्मणम्), (2) षड्विंशब्राह्मणम्, (3) मन्त्रब्राह्मणम्, (4) दैवतब्राह्मणम्, (5) आर्षेयब्राह्मणम्, (6) सामविधानब्राह्मणम्, (7) संहितोपनिषद् ब्राह्मणम्, (8) वंशब्राह्मणम् ।

जैमिनीयशाखायाः त्रय ब्राह्मणग्रन्थाः सन्ति - (1) जैनिनीयब्राह्मणम्, (2) जैमिनीय आर्षेयब्राह्मणम्, (3) जैमिनीय उपनिषद् ब्राह्मणम् ।

उपनिषद् - केनोपनिषद्, छान्दोग्योपनिषद्

श्रौतसूत्राणि - द्राह्यायणश्रौतसूत्रम्, लाट्यायनश्रौतसूत्रम्, मशकश्रौतसूत्रम् ।

गृह्यसूत्राणि - गोभिलगृह्यसूत्रम्, खादिरगृह्यसूत्रम्, जैमिनीयगृह्यसूत्रम् ।

गान्धर्ववेदः - सामवेदस्य उपवेदः अस्ति ।

सामवदेस्य विषयः वैशिष्ट्यञ्च

सामवेदस्य मुख्यविषयः उपासना अस्ति । अस्मिन् वेदे मुख्यरूपेण अग्नि-इन्द्र-सोमादिदेवैः सम्बद्धाः मन्त्राः सन्ति । एतेषां देवानां स्तुतिः, प्रार्थना, उपासना च मन्त्राणां माध्यमेन विहिता वर्तते । ''साम्ना सोमप्राप्तिः'' अर्थात् सामगानमाध्यमेन सौम्यगुणानाम् अर्थात् सोमस्य प्राप्तिर्भवति । सोम-सोमरस-सोमपान-सोमयागस्य महत्त्वं च सामवेदे विशेषरूपेण दृश्यते । सामवेदस्य गानं उद्गातानामक ऋत्विक् करोति । सामवेदे सप्तस्वराः सन्ति । 3 ग्राम, 21 मुर्छना तथा 49 तान सन्ति । एते सप्त स्वाराणां तुलना वेणुस्वरेण साकं भवति । नारदीयशिक्षायां यथा -

सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः ।
ताना एकोनपंचाशत् इत्येतत् स्वरमण्डलम् ॥

यथा लौकिकगानेषु षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादादि सप्तस्वराः प्रसिद्धाः सन्ति तथैव सामवेदेऽपि प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, पञ्चमः (मन्दः), षष्ठः (कुष्टः), सप्तमः (श्रुतिस्वराः) भवन्ति ।

उत्तरार्चिके षड्संख्यकाः विकाराः सन्ति - (1) विकारः, (2) विश्लेषः, (3) विकर्षणम्, (4) अभ्यासः, (5) विरामः, (6) स्तोभः । विद्यमानवर्णस्थाने वर्णान्तरोच्चारणम् विकारः । उदाहरणरूपेण अग्ने इति स्थाने आग्नायि इत्यस्योच्चारणम् । सन्धिविच्छेदो विश्लेषः । ह्रस्वस्थाने दीर्घोच्चारणम् दीर्घस्थाने प्लुतोच्चारणं विकर्षणम् । द्विस्त्रिरुच्चारणम-भ्यासः । विश्रामो विरामः । अधिकत्वे सति ऋग्विलक्षणवर्णः स्तोभः ।

सामगानं चतुर्धा भवति । 1- गेयगानम् 2- आरण्यगानम् 3- ऊहगानम् 4- ऊह्यगानं विकृतिगानं वा । ग्रामेऽथवा समाजे यदा गेयं भवति तद् गेयगानम् । अरण्ये एव गेयम् आरण्यकम् । सोमयागावसरे मन्त्राणां सामयिकपरिवर्तनं कृत्वा यद् गानं तद् ऊहगानम् । रहस्यात्मकं गानम् ऊह्यगानम् इति कथ्यते । तत्रापि सामगानस्य पञ्चविभागाः सन्ति - प्रस्तावः, उद्गीथः, प्रतीहारः, उपद्रवः निधनादिभेदेन ।

वैदिकवाङ्मये सामवेदस्य वैशिष्ट्यस्य प्रमुखकारणानि एतानि सन्ति ।

सामवेदः वेदानां सारः रसः वा वर्तते यथा शतपथब्राह्मणे कथितं –

सर्वेषां वा एष वेदानां रसो यत् साम ।

सामवेदं विना यज्ञस्य पूर्णता न भवति । अत एव प्राचीनैः ऋषिभिः यज्ञानन्तरं सामगानस्य विधानं कृतम् । शतपथब्राह्मणे कथितं यत् –

''न सामा यज्ञोऽस्ति'' ।

सामवेदस्य रसः द्युलोकः वर्तते । जैमिनियब्राह्मणे कथितं यत् प्रजापतिः सामवेदस्य रसं नित्वा द्युलोकमचरत् स एव रसः सूर्यरूपेण वर्तते ।

यः सामं जानाति स एव वेदस्य रहस्मपि जानाति इति कथितं यथा –

''सामानि यो वेत्ति स वेदत्वम्'' ।

सामवेदः जागरुकतायाः प्रतीकरूपो वर्तते । यथा–

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।

यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ।

इत्थं सामवेदः सर्वेषु वेदेषु प्रमुखः वर्तते । 'अग्न आ याहि वीतये' इति अग्निसूक्तादारभ्य 'आशुः शिशानो' इति इन्द्रसूक्तेन समापनं भवति । प्रथममन्त्रे शान्तरसे अग्नेः स्तवनं अन्तिमे च वीररसे इन्द्रस्य गुणगानं निहितमस्ति । जीवपुरुषस्य कृते सामवेदस्य गानं परमात्मनः प्राप्तेः श्रेष्ठोपायः वर्तते ।

शब्दार्थः

विहिता – कृता, **समाख्या** – सामविषयकः, **साकम्** – सह, **गेयम्** – गानम्, **स्तवनम्** – स्तुतिः

स्वाध्यायः

1. प्रदत्तेषु विकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) सामवेदे कस्य महत्त्वं प्रतिपादितमस्ति ?

(क) यज्ञस्य (ख) गानस्य (ग) ज्ञानस्य (घ) अर्थस्य

(2) श्रीमद्भगवदगीतायां भगवता श्रीकृष्णेन सामवेदविषये किमुक्तम् ?

(क) वेदानाम् ऋग्वेदोऽस्मि (ख) वेदानां यजुर्वेदोऽस्मि

(ग) वेदानां सामवेदोऽस्मि (घ) वेदानामथर्ववेदोऽस्मि

(3) सामवेदस्य ऋत्विक् कः ?

(क) होता (ख) अध्वर्युः (ग) उद्गाता (घ) ब्रह्मा

(4) सामवेदस्य प्रमुखः आचार्यः कः ?

(क) जैमिनिः (ख) पैलः (ग) वैशम्पायनः (घ) सुमन्तुः

(5) सामवेदस्य उत्तरार्चिके कति मन्त्राः सन्ति ?

(क) 650 (ख) 1225 (ग) 1875 (घ) 1975

(6) सामगानस्य कति विभागाः सन्ति ?

(क) 5 (ख) 7 (ग) 8 (घ) 10

(7) सामवेदे कति स्वराः सन्ति ?

(क) 5 (ख) 7 (ग) 8 (घ) 10

(8) जैमिनीयशाखायां कति मन्त्राः सन्ति ?

(क) 1875 (ख) 1808 (ग) 1687 (घ) 1605

(9) ताण्ड्यब्राह्मणस्य अपरं नाम किमस्ति ?

(क) पञ्चविंशब्राह्मणम् (ख) षड्विंशब्राह्मणम् (ग) मन्त्रब्राह्मणम् (घ) दैवतब्राह्मणम्

(10) कः सामवेदस्य उपवेदः ?

(क) आयुर्वेदः (ख) धनुर्वेदः (ग) गान्धर्ववेदः (घ) अर्थवेदः

2. एकैकेन वाक्येन उत्तरं देयम् ।

(1) बृहदारण्यकोपनिषदि सामशब्दस्यार्थः कथं प्रतिपादितः वर्तते ?

(2) सामवेदस्य मुख्यप्रतिपाद्यविषयः कः अस्ति ?

(3) पूर्वार्चिकस्य विभाजनं कथं वर्तते ?

(4) कौथुमशाखायाः कति ब्राह्मणग्रन्थाः सन्ति ? के च ते ?

(5) साम्प्रतकाले सामवेदस्य कति शाखाः समुपलभ्यन्ते ? काश्च ताः ?

(6) वैदिकवाङ्मये सामवेदस्य वैशिष्ट्यं किमस्ति ?

(7) ''साम्ना सोमप्राप्तिः'' इति कथनेन किं ज्ञायते ?

(8) सामवेदस्य कानि सन्ति श्रौतसूत्राणि गृह्यसूत्राणि च ?

(9) सामवेदस्य प्रारम्भः केन मन्त्रेण भवति ?

(10) किमस्ति सामलक्षणम् ?

3. टिप्पणी कार्या ।

(1) सामगानम्

(2) उत्तरार्चिके विकाराः

(3) सामवेदस्य स्वरूपम्

4. निम्नलिखित शब्दरूपाणां परिचयं यच्छत ।

(1) उपासनायाः (2) गीतायाम् (3) उद्धृताः (4) गीतिषु (5) उपनिषदि (6) शाखायाम् (7) शङ्करेण (8) सामानि (9) अग्नेः (10) शान्तरसे

5. निम्नलिखितानां धातुरूपाणां परिचयं यच्छन्तु ।

(1) जज्ञिरे (2) प्राप्यते (3) अस्ति (4) भवति (5) दृश्यते (6) वर्तते (7) कृतम् (8) अचरत् (9) जानाति (10) कथ्यते

6. सन्धिविच्छेदं कुरुत ।

(1) उत्तरार्चिक (2) सर्वोऽभिहितो (3) छान्दोग्योपनिषद् (4) शब्दस्यार्थः (5) विश्वस्मिन् (6) संहितोपनिषद् (7) दीर्घोच्चारणम् (8) ग्रामेऽथवा (9) सोमयागावसरे (10) यज्ञानन्तरम्

7. सन्धिं कुरुत ।

(1) न्यूनः + भेदः (2) ऋक् + लक्षणम् (3) विषय + अनुसारम् (4) उक्तम् + अस्ति (5) आचार्यः + वर्तते (6) पूर्व + अर्चिकः (7) केन + उपनिषद् (8) प्राप्ति + भवति (9) प्लुत + उच्चारणम् (10) त्रिः + उच्चरारणम्

छात्रप्रवृत्तिः

सामवेदस्य स्वरूपचित्रणं करोतु

विशिष्टज्ञानम् -

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥

श्रीमद्भगवद्गीतायां भगवताश्रीकृष्णेन प्रोक्तं यत् ऋग्वेदादिवेदानां मध्येऽहं सामवेदः, देवेषु इन्द्रः, इन्द्रियाणां मध्ये मनः, भूतानां सम्बन्धिनी चेतना ज्ञानशक्तिरहमस्मि ।

●

4	# अथर्ववेदसंहितापरिचयः

वेदाः खलु मानवज्ञानस्य विश्वकोषः वर्तन्ते । तत्र किमस्ति इत्यनुसन्धानोपेक्षया किं नास्ति इति गवेषणं सुकरं भवति । अत्र वेदानां प्रतिपाद्यविषयः सामान्येन कर्ममीमांसा वर्तते । अर्थात् यज्ञकर्मसम्पादनार्थम् एव वेदानामाविर्भावः । ज्ञानकर्मोपासनाविषयभेदात् गद्य-गद्य-गानरचनाभेदात् वेदत्रयी इति यद्यपि श्रूयते तथापि ज्ञानकर्मोपासनायाः समष्टिरूपः अपरवेदः वर्तते अथर्ववेदः । यतो हि ऋग्वेदादयः त्रयो वेदाः आमुष्मिकं फलं प्रयच्छन्ति परन्तु अथर्ववेदः ऐहिकामुष्मिकयोः फलं यच्छति । अतः अथर्ववेदस्य महत्त्वं सर्वोपरि विद्यते । जीवनं सुखसमन्वितं कर्तुं येषां साधनानाम् अपेक्षा भवति तेषां सिध्यर्थं वेदेऽस्मिन् विविधानाम् अनुष्ठानानां विधानमस्ति । ब्रह्मकर्मणः प्रतिपादकत्वात् अथर्ववेदः ब्रह्मवेदः इति कथ्यते । अथर्वाऋषिः एतं वेदं ददर्श । अतः अथर्ववेदः इति कथ्यते । अथर्ववेदे द्विविधाः मन्त्राः संगृहीताः सन्ति । शान्तिपौष्टिककर्म कर्तारः मन्त्राः तथा अभिचारिककर्मकर्तारः मन्त्राः । अथर्वेण द्रष्टा मन्त्राः शान्तिपुष्टिकर्मयुक्ताः सन्ति । आङ्गिरसेन दृष्टाः मन्त्रास्तु अभिचारिका भवन्ति । अर्थात् उभयोर्मिलितस्वरूप एव अथर्ववेदः ।

अथर्ववेदस्य अर्थः

'न थर्व इति अथर्वः' इति व्युत्पत्याम् अथर्ववेदस्य अहिंसावृत्या मनसः स्थिरीकरणम् एव बोध्यते । निरुक्तकारः यास्कः थर्व गतौ चेष्टायां वा धातोः गतिहीनार्थे स्थिरार्थे वाऽथर्वशब्दस्य निष्पत्तिं करोति, यथा- **थर्वतिश्चरतिकर्मा, तत्प्रतिषेधः ।** यत्र स्थिरतायाः चित्तवृत्तिनिरोधरूपस्य योगस्य उपदेशः वर्तते सः अथर्ववेदः । थर्वः अर्थात् गतिः । अतः अथर्व शब्दस्य अर्थः भवति नास्ति गतिः यस्मिन् सः अथर्वः ।

अथर्वणाभिधो वेदो धवलो मर्कटाननः ।
अक्षं सूत्रं च खट्वाङ्गं बिभ्राणोयजनप्रियः ॥ 4 ॥

''थर्वते गतिकर्मणः इति अथर्वः'' इति वचनानुसारं प्राणवायोः अवरोधनं यः करोति स एव अथर्वः । थर्व धातोः द्वौ अर्थौ भवतः । थर्व कौटिल्ये - हिंसायां धातोः अकुटिल अहिंसार्थे च अथर्वशब्दः व्युत्पद्यते । थर्व अर्थात् हिंसा, अथर्व अर्थात् अहिंसा । अर्थात् नास्ति यस्मिन् हिंसा सः अथर्वः ।

अथर्ववेदस्य वेदत्वम् अस्ति न वा -

अथर्ववेदस्य वेदत्वम् अस्ति न वा इति जायमानायां जिज्ञासायाम् अस्य वेदस्य प्राथम्यमुदघोषयता न्यायमञ्जर्यां जयन्तभट्टेन प्रतिपादितं यत् - **तत्र वेदाश्चत्वारः प्रथमोऽथर्ववेदः ।** गोपथब्राह्मणे श्रूयते यत् स आथर्वणो वेदोऽभवत्, स अङ्गिरसो वेदोऽभवत्, ऋचसामानि भेषजा इति । छान्दोग्योपनिषदि सनत्कुमारं प्रति नारद-वचनं श्रूयते '**ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्**' तापनियोपनिषदि श्रूयते यथा - **ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादा भवन्ति ।** यज्ञस्य पूर्णतायाः सम्पादनार्थं चत्वारः ऋत्विजः भवन्ति । तेषु ब्रह्मानामक ऋत्विक् यज्ञस्य अध्यक्षो भवति । तस्य ब्रह्मणः प्रधानवेदः अथर्ववेदः एव भवति । गोपथब्राह्मणानुसारं त्रीभिरपि वेदैः यज्ञस्य केवलमेकस्यैव पक्षस्यैव संस्कारो भवति । ब्रह्मा मनसा द्वितीयपक्षस्य द्वितीयपक्षस्य संस्कारं करोति । यथोक्तं

''स वा एष त्रिभिर्वेदैर्यज्ञस्यान्तरः पक्षः संस्क्रियते । मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति ॥''

इत्यनेन प्रमाणेन स्पष्टं भवति यत् वेदाः चत्वारः, त्रयीति व्यवहारस्तु प्रकरणकृतः ।

अथर्ववेदस्य शाखा -

महर्षिपतञ्जलिना पस्पशाह्निके ''**नवधाऽथर्वणो वेदः**'' इति लिखित्वा अथर्ववेदस्य नवशाखाः स्वीकृताः । पुराणानुसारं

भागवते चर्चा अस्ति सुमन्तु अभिचारप्रधानस्य वेदस्य मुख्यप्रचारकः आसीत् । तस्य द्वौ शिष्यौ कथितौ पेल- देवदर्शौ च इति । विष्णुपुराणानुसारं पैलस्य त्रयः शिष्याः आसन् । जाबालिः, कुमुदः, शौनकश्चेति । देवदर्शस्य चत्वारः शिष्याः आसन् । ते च मोदः ब्रह्मलिः, पिप्पलादः, शौष्कायनि च । एतेषु शौनकस्य शिष्यः बभ्रुः तथा सैन्धवायनः कथितः । एतेषां मुनीनां नामाधारेण अथर्ववेदस्य नवशाखानां नामानि सन्ति यथा- पिप्पलादः, स्तौदः, मौदः, शौनकः, जाजलः, जलदः, ब्रह्मवेदः, देवदर्शः, चारणवैद्यश्च ।

वर्तमानकाले अथर्ववेदस्य द्वे शाखे समुपलभ्येते । ते द्वे यथा - (1) पैप्पलादशाखा (2) शौनकीय शाखा । अथर्ववेदस्य शौनकशाखायाः प्रचारप्रसारः सर्वत्र वर्तते, किन्तु पैप्पलादशाखायाः अध्ययनाध्यापनम् उत्कलप्रदेशे दृश्यते ।

शौनकशाखा -

शौनकीयशाखानुसारम् अथर्ववेदे 20 काण्डानि, 111 अनुवाकाः, 730 सूक्तानि, 5, 987 मन्त्राश्च सन्ति । शौनकशाखायाः प्रथमकाण्डे प्रत्येकस्मिन् सूत्रे नियमेन चत्वारो मन्त्राः, द्वितीयकाण्डे पञ्चमन्त्राः, तृतीयकाण्डे षड् मन्त्राः, चतुर्थकाण्डे सप्तमन्त्राः तथा पञ्चमकाण्डे अष्टमन्त्राः सन्ति । षष्ठकाण्डे 142 (द्विचत्वारिंशताधिक एकशतम्) सूक्तानि सन्ति । सप्तमे काण्डे 118 (अष्टादशाधिक एकशतम्) सूक्तानि सन्ति । अष्टमकाण्डात् आरभ्य द्वादशकाण्डपर्यन्तम् आयतसूक्तानि सन्ति । द्वादशकाण्डे पृथिवीसूक्तं वर्तते । अत्र राजनैतिकभौगोलिकसिद्धान्तानां च भव्यभावना सर्वेषां आलोचकानां दृष्टिहारिका वर्तते । त्रयोदशकाण्डे आध्यात्मिकः विषयः वर्तते । चतुर्दशकाण्डे प्रधानरूपेण वैवाहिकवर्णनमस्ति । पञ्चदशकाण्डं व्रात्यकाण्डनाम्ना ख्यातमस्ति । यस्मिन् व्रात्यानां यज्ञसम्पादनस्य आधात्मिकवर्णनं वर्तते । षोडशकाण्डे दुःस्वप्ननाशकानां मन्त्राणां संग्रहोऽस्ति । सप्तदशकाण्डे एकमेव सूक्तमस्ति यस्मिन् सूक्ते अभ्युदयार्थं भव्या प्रार्थनाऽस्ति । अष्टादशकाण्डं श्राद्धकाण्डनाम्ना ख्यातं वर्तते । काण्डेऽस्मिन् पितृमेधसम्बन्धिनः मन्त्राः दृश्यन्ते । ऊनविंशतिकाण्डे भैषज्यराष्ट्रविषयक-आध्यात्मिकविषयाणां मन्त्राणां सङ्कलनमस्ति । अन्तिमकाण्डे प्रसिद्धं कुन्तापसूक्तं सम्मिलितं वर्तते ।

पैप्पलादशाखा -

पुराकाले पिप्पलादसंहितायाः विशेषख्यातिरासीत् । अस्य द्वौ ग्रन्थौ आस्ताम् । प्रपञ्चहृदयस्य कथनानुसारं पिप्पलादशाखायाः मन्त्रसंहिता विंशतिकाण्डेषु विभक्ताऽस्ति । यथा - **'तथाऽऽथर्वणके पैप्पलादशाखायां मन्त्रो विंशतिकाण्डः'** । तत्र 923 सूक्तानि, प्रायशः 8000 मन्त्राः सन्ति । पिप्पलादसंहितायाः एका प्रतिः शारदालिप्यां काश्मीरप्रदेशे उपलब्धा अभवत् । सा पाण्डुलिपिः काश्मीरनृपतिना जर्मनविद्वांसं राथमहोदयमुपहारे प्रेषिताऽभववत् । 1901 ख्रीष्टाब्दे तस्याः आलोकलेख्यं आमेरिकातः प्रकाशितोऽभवत् । अधुना उत्कलप्रान्ते तथा भागतवर्षे च बहुषु वेदविद्यालयेषु अस्याः शाखायाः स्वरेण साकम् अध्ययनाध्यापनं भवति । गोपथब्राह्मणम् एवञ्च पातञ्चलमहाभाष्यानुसारं 'शन्नो देवीरभिष्टय' इति मन्त्रः अस्याः शाखायाः प्रथमो मन्त्रः अस्ति ।

अथर्ववेदस्य प्रतिपाद्यविषयः वैशिष्ट्यञ्च -

अथर्ववेदस्य मुख्यप्रतिपाद्यविषयाणां त्रिधा विभाजनं कर्तुं शक्यते - आध्यात्मिक-आधिभौतिक-आधिदैविकभेदैः । आध्यात्मिकप्रकरणे मुख्यरूपेण ब्रह्मजीवविषयकं परमात्मविषयकवर्णनं वर्तते । आधिभौतिकप्रकरणे राज्यवर्णनं, राज्यशासनं, सङ्ग्रामं, शत्रुवाहनादीनां वर्णनं दृश्यते । आधिदैविकप्रकरणे नानाविधानां देवतानां नानाविधानां यज्ञानां च विषये पर्याप्तरूपेण सङ्कलनं वर्तते ।

अथर्ववेदस्य महत्त्वपूर्णसुक्तेषु भैषजसूक्तानि, आयुषसूक्तानि, पौष्टिकसूक्तानि, प्रायश्चितसूक्तानि, स्त्रीकर्माणि सूक्तानि, राजकमाणि सूक्तानि, ब्राह्मण्यानि सूक्तानि इत्यादीनां समावेशो भवति । भैषजसूक्तेषु आयुर्विज्ञानेन सम्बद्धाः राजयक्ष्मा-कास-ज्वरादिविविधरोगाणां लक्षणानि, तेषां चिकित्साविधिपरकमन्त्राः प्रतिपादिताः वर्तन्ते । आयुषसूक्तेषु दीर्घायुष्यलाभाय उपयोगिनां मन्त्राणां वर्णनं दृश्यते । पौष्टिकसूक्तेषु कृषिकर्म-गृहनिर्माण-व्यापारादिविषयाः प्रतिपादिताः सन्ति । प्रायश्चितसूक्तेषु ज्ञाताज्ञातानाम् अपराधानां प्रायश्चितकर्मणि उपयोगिनः मन्त्राः संगृहीताः सन्ति । स्त्रीकर्माणि सूक्तेषु प्रणय-विवाहादिविषयकाः आभिचारिकमन्त्राः सन्ति । राजकर्माणि सूक्तेषु शासनव्यवस्था-युद्धादिविषयाः प्रतिपादिताः वर्तन्ते । एतेषु पृथिवीसूक्तम् अन्यतमं यत्र राष्ट्रभक्तिभावनया **'माता भूमिः पुत्रोऽहं पृथिव्याः'** इति वाक्यं विद्यते । अतः अथर्ववेदः क्षत्रवेदो इति कथ्यते ।

ब्राह्मण्यानि सूक्तेषु दार्शनिकतत्त्वस्य गहनविवेचनं दृश्यते । एतदर्थम् अयं वेदः **'ब्रह्मवेद'** नाम्ना ज्ञायते । अथर्ववेदस्य ज्ञानं कृत्वा ज्योतिषादिशास्त्राणां ज्ञानं न कर्तव्यं भवति ।

न तिथि र्न च नक्षत्रं न ग्रहो न च चन्द्रमाः ।
अथर्वमन्त्रसम्प्राप्त्या सर्वसिद्धिर्भविष्यति ॥

वैदिकसाहित्ये अथर्ववेदस्य स्थानं महत्त्वपूर्णं वर्तते । यत्र अन्यवेदाः देवतानां स्तुतिमेव कुर्वन्ति तत्र अथर्ववेदः जीवनोपयोगिनां भौतिकविषयाणां वर्णनं करोति । अथर्ववेदस्य ज्ञाता शान्तिकर्मपारगः यस्मिन् राष्ट्रे निवसति तद्राष्ट्रं निरुपद्रवं भूत्वा सततं वर्द्धते ।

यस्यराज्ञो जनपदे अथर्वा शान्तिपारगः ।
निवसत्यपि तद्राष्ट्रं वर्धते निरुपद्रवम् ॥
तस्माद् राजा विशेषेण ह्याथर्वाणं जितेन्द्रियम् ।
दान-सम्मान-सत्कारैर्नित्यं समभिपूजयेत् ॥

गोपथब्राह्मणे अथर्ववेदस्य पञ्च उपवेदानां वर्णनं मिलति । (1) सर्पवेदः (2) पिशाचवेदः (3) असुरवेदः (4) इतिहासवेदः (5) पुराणवेदः । गोपथब्राह्मणम् अथर्ववेदस्य एकमात्रं ब्राह्मणं विद्यते । अथर्ववेदस्य प्रश्नोपनिषद्, मुण्डकोपनिषद्, माण्डूक्योपनिषद् इति तिस्त्रः प्रमुखा उपनिषदः सन्ति । श्रौतसूत्रेषु वैतानश्रौतसूत्रं तथा गृह्यसूत्रेषु कौशिकगृह्यसूत्रमपि अस्य वेदस्य वर्तते । अथर्ववेदः सर्वविद्यप्रत्ययानां परिचयार्थं मनुष्याणां इतिहासे सर्वाधिकमहत्त्वपूर्णं रहस्यग्रन्थरत्नमस्ति । येन प्राचीनयुगसम्बन्धी मानवानां क्रियाकलाप-आचारविचार-वेश-भूषादीनां विषये पूर्णपरिचयः प्राप्यते ।

शब्दार्थः

रहस्यग्रन्थरत्नम् - अत्यन्तं गूढतत्त्वं रहस्यमित्युच्यते, साधनाबलेन तस्योद्धाटनं भवति । तादृशः ग्रन्थविशेषः रहस्यग्रन्थः, ब्रह्मज्ञानरूपरत्नविद्यमानत्वात् रहस्यग्रन्थरत्नमित्युच्यते । **सुकरम्** - सहजम् । **कुन्तापसूक्तम्** - पापकर्माणि ज्वालकं सूक्तम् । **गहनविवेचनम्** - गूढतत्त्वस्य वर्णनम् । **निरुपद्रवम्** - उपद्रवरहितम् ।

स्वाध्यायः

1. अधोलिखतप्रश्नेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।
   (1) अधोलिखतेषु ऋत्विक् कः ?
   (क) होता (ख) उद्गाता (ग) अध्वर्युः (घ) ब्रह्मा
   (2) महर्षिपतञ्जलिना पस्पशाह्निके अथर्ववेदस्य कति शाखाः स्वीकृताः ?
   (क) 20 (ख) 21 (ग) 25 (घ) 30
   (3) अथर्वाऋषिणा कीदृशाः मन्त्राः दृष्टाः ?
   (क) आभिचारिकमन्त्राः (ख) शान्तिमन्त्राः (ग) याज्ञिकमन्त्राः (घ) आयुर्वेदीयमन्त्राः
   (4) अथर्ववेदस्य ब्राह्मणग्रन्थस्य नाम किम् ?
   (क) वंशब्राह्मणम् (ख) शतपथब्राह्मणम् (ग) गोपथब्राह्मणम् (घ) छान्दोग्यब्राह्मणम्
   (5) अथर्ववेदस्य गृह्यसूत्रस्य नाम किमस्ति ?
   (क) खादिरगृह्यसूत्रम् (ख) पारस्करगृह्यसूत्रम् (ग) कौशिकगृह्यसूत्रम् (घ) आश्वलायनगृह्यसूत्रम्

(6) अथर्ववेदस्य श्रौतसूत्रस्य नाम किमस्ति ?

(क) आश्वलायनश्रौतसूत्रम् (ख) वैतानश्रौतसूत्रम् (ग) सत्यषाढश्रौतसूत्रम् (घ) कात्यायननश्रौतसूत्रम्

(7) शौनकशाखायां कति मन्त्राः सन्ति ?

(क) 5,987 (ख) 5,950 (ग) 5,930 (घ) 5,995

(8) अथर्ववेदस्य कति शाखाः इदानीं दृश्यन्ते ?

(क) 7 (ख) 5 (ग) 3 (घ) 2

(9) अस्य वेदस्य कति प्रमुखा उपनिषदः वर्तन्ते ?

(क) 8 (ख) 5 (ग) 7 (घ) 3

(10) गोपथब्राह्मणे अथर्ववेदस्य कति उपवेदानां वर्णनं मिलति ?

(क) 8 (ख) 7 (ग) 5 (घ) 10

2. एकैकेन वाक्येन उत्तरं देयम् ।

(1) अथर्ववेदस्य मुख्यप्रतिपाद्यविषयः किमस्ति ?

(2) अथर्ववेदः किं फलं यच्छति ?

(3) किमर्थम् अथर्ववेदः ब्रह्मवेदः इति कथ्यते ?

(4) अथर्वशब्दस्य कोऽर्थः ?

(5) अथर्ववेदस्य वेदत्वम् अस्ति न वा ?

(6) पृथिवीसूक्तस्य वर्णनं कस्मिन् काण्डे वर्तते ? तत्र मुख्यप्रतिपाद्यविषयः कः अस्ति ?

(7) न्यायमञ्जर्यां जयन्तभट्टेन किमुदघोषितम् ?

(8) सनत्कुमारं प्रति नारद-वचनं किं श्रूयते ?

(9) अथर्ववेदस्य ज्ञाता यस्मिन् राष्ट्रे निवसति तत्र किं भवति ?

(10) भैषजसूक्तेषु किं प्रतिपादितमस्ति ?

3. टिप्पणी कार्या ।

(1) शौनकशाखायाः परिचयः

(2) पैप्पलादशाखायाः परिचयः

(3) अथर्ववेदस्य विषयनिरूपणम्

4. निम्नलिखितशब्दरूपाणां परिचयं यच्छत ।

(1) कर्तारः (2) मनसः (3) स्थिरतायाः (4) पतञ्जालिना (5) ऋत्विजः (6) विद्वांसः (7) राजकर्मणि (8) सूक्तानि (9) श्रौतसूत्रेषु (10) मनुष्याणाम्

5. निम्नलिखितानां धातुरूपाणां परिचयं यच्छन्तु ।

(1) वर्तते (2) यच्छानि (3) विद्यते (4) ददर्श (5) प्रयच्छन्ति (6) श्रूयते (7) लभ्यते (8) अभवत् (9) सन्ति (10) ज्ञायते

6. सन्धिविच्छेदं कुरुत ।

(1) इत्यनुसन्धानोपेक्षया (2) प्रयच्छन्ति (3) त्रीभिरपि (4) मनसैव (5) तद्राष्ट्रम् (6) भूषादीनाम् (7) निरपद्रवम् (8) दीर्धायुषः (9) ज्ञाताज्ञातानाम् (10) संग्रहोऽस्ति

7. सन्धिमेलनं कुरुत ।

(1) वेदाः + चत्वारः (2) प्रथमः + अथर्ववेदः (3) इति + अनेन (4) प्रति + एकस्मिन् (5) प्रार्थना + अस्ति (6) सम्पादन + अथम् (7) कर्म + उपासना (8) ऐहिक + आयुष्मिकम् (9) वेदे + अस्मिन् (10) ख्याति + आसीत्

छात्रप्रवृत्तिः

वेदवृक्षस्य निर्माणं करोतु

विशिष्टज्ञानम्

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥

अथर्ववेदः 3/30/3

भ्राता सोदरः भ्रातरं मा द्विष्यात् दायभागादिनिमित्तेन भ्रातृविषयम् अप्रियं मा कुर्यात् । अपि च भगिनीं स्वसा मा द्विष्यात् । ते सर्वे भ्रात्रादयः समानगतयः समानकर्माणो भूत्वा कल्याणया वागिन्द्रियेण वाचं वदन्तु ।

●

5 शुक्लयजुर्वेदीयस्वरप्रकरणम्

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति पतञ्जलिवचनानुसारम् अङ्गैः सह वेदाध्ययनं कर्तव्यम् । वेदे स्वराणां प्राधान्यं वर्तते । स्वरज्ञानं शिक्षाग्रन्थस्य अधीनं वर्तते । अतः वेदाङ्गेषु शिक्षाग्रन्थस्य महत्त्वपूर्णस्थानं विद्यते । शिक्षा वेदपुरुषस्य घ्राणमिति कथ्यते यथा – **'शिक्षा घ्राणं तु वेदस्य'** इति । **'स्वरवर्णादि उच्चारणप्रकारो यत्र उपदिश्यते सा शिक्षा'** इति आचार्यसायणेन भाष्यभूमिकायामुक्तम् । **'शिक्षयति या सा शिक्षा'** इति केचन उपस्थापयन्ति । **अथ शिक्षां व्याख्यास्यामः – 'वर्णः, स्वरः, मात्रा, साम, सन्तान इत्युक्तः शिक्षाध्याय'** इति तैत्तिरीयोपनिषदः वचनम् । वर्णः – अकारादिः, वेदानां ज्ञानाय आदौ वर्णज्ञानमावश्यकम् । शिक्षाग्रन्थेषु 63 (त्रिषष्टिः) 64 (चतुःषष्टिः) वा वर्णाः उल्लिखिताः । स्वरः – उदात्तानुदात्तस्वरितश्चेति त्रयस्वराः । वेदमन्त्राणामुच्चारणे स्वराणां विशिष्ट-स्थानमस्ति । यतोहि वेदेषु स्वरभेदेन अर्थस्यापि भेदो भवति । पाणिनीयशिक्षायां श्रूयते – मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ अर्थात् यः मन्त्रः स्वरेण वर्णेन वा हीनो भवति स वाग्वज्रं भूत्वा यजमानं हन्ति । मात्रा – स्वराणामुच्चारणे यः कालः अपेक्षितः सा मात्रा इति कथ्यते । बलम् – वर्णानाम् उच्चारणस्थानं प्रयत्नश्च बलम् इत्युच्यते । साम – अतिद्रुतत्वम् अतिविलम्बितत्वं परिहृत्य यथोपदेशमाधुर्यादिगुणसमन्वितमुच्चारणं साम इति कथ्यते । सन्तानः – पूर्व पदेन सह सन्धानं नाम सन्तानः । सन्तान इति पदस्यार्थो भवति संहिता । इत्थं येषु ग्रन्थेषु वर्णाः, वर्णानां स्थानानि, वर्णानां प्रयत्नस्वरकालाः, सन्धिः, उदात्तादिस्वराणाम् उच्चारणगुणदोषाश्च इत्यादीनां विषयाणां विवेचनं भवति ते शिक्षाग्रन्थाः कथ्यन्ते । वेदानाम् अनेकाः शाखाः सन्ति । तत्रापि प्रतिशाखम् उच्चारणप्रकाराः अपि भिन्नाः सन्ति । अतः शिक्षाग्रन्थाः अपि बहवः सन्तिः तेषु याज्ञवल्क्यशिक्षा शुक्लयजुर्वेदस्य प्रतिनिधित्वं करोति । शुक्लयजुर्वेदीयस्वरप्रकरणम् इत्युक्ते याज्ञवल्क्यशिक्षावैदिकस्वरप्रकरणं वर्तते । ग्रन्थोऽयं महर्षिणा याज्ञवल्क्येन प्रणीतः । अस्मिन् शिक्षाग्रन्थे 232 श्लोकाः वर्तन्ते । वैदिकस्वराणां विस्तृतविवरणमत्र विद्यते । अस्य ग्रन्थस्य स्वरप्रकरणे उदात्तादिस्वराणां, वर्ण-जाति-गोत्र-छन्दसाम्, षड्जादिसामस्वराणामन्तर्भावः, एवञ्च मात्राकालादिविषयः प्रतिपादितः वर्तते ।



उदाहरणम् - 'सुचीभिः' (रुद्री 1/2)

उदाहरणम् - 'सभूमिं' । (रुद्री 2/1)

वेदानां शुद्धोच्चारणार्थम् उदात्तादिस्वराणां ज्ञानम् अपेक्षितं वर्तते । शुद्धोच्चारणेन एव वेदाध्ययनफलं लभ्यते । उदात्तादयः स्वराः स्वरवर्णानाम् एव धर्माः सन्ति । यः स्वरवर्णानां स्वरः पारतन्त्र्येण व्यञ्जनानामपि भवति । एवम् अ, आ, इत्यादयो धर्मिणः उदात्तादयश्च धर्मभूताः स्वराः । स्वराश्रितत्वात् धर्मरूपा उदात्तादयः अपि स्वरशब्देन उच्यन्ते । शतपथब्राह्मणे **'श्रीर्वै स्वरः'** इत्युक्तम् । यः उदात्तादिलक्षणः स्वरः सः 'श्रीर्वै' वेदवाक्यस्य सम्पद्रूपः इति आचार्यसायणः कथयति । व्याकरणमहाभाष्ये श्रूयते - **'उदात्तस्य स्थाने अनुदात्तं ब्रूते खण्डिकोपाध्यायः तस्मै शिष्याय चपेटिकां ददातीति'** । अनेन स्पष्टं भवति तदानीन्तनसमये वेदाध्यापकाः उदात्तादिस्वराणामुच्चाणे सतर्काः आसन् । एतदर्थं शिक्षाग्रन्थानाम् अध्ययनस्यावश्यकता विद्यते ।

सरलार्थः - अत्र 'अथ' शब्दः मङ्गलाचरणवाचकः । यतोहि शुक्लयजुर्वेदप्रातिशाख्ये श्रूयते - अथकारभाष्येषु ओमकारं वेदेषु । भाष्यारम्भेऽथशब्दस्य प्रयोगः करणीयः । एवञ्च वेदारम्भे ओङ्कारशब्दस्य प्रयोगः करणीयः ।। वेदाध्ययनाय उदात्त-अनुदात्त-स्वरितानां स्वराणां समुचितोच्चारणस्य आवश्यकता विद्यते । अतः आदौ तेषां लक्षणादिविषये व्याख्यां करिष्याम इति याज्ञवल्क्यः कथयति ।

स्वराणां भेदास्तेषां लक्षणादीनां वर्णनप्रतिज्ञा -

उदात्तश्चानुदात्तश्च स्वरितश्च तथैव तत् ।
लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ॥ 1॥

सरलार्थः - वेदाध्ययने स्वरस्य प्राधान्यं वर्तते । तत्र उच्चैः उदात्तः, निच्चैरनुदात्तः, समाहार स्वरितः इति स्वराणाम् उच्चारणस्थानं वर्तते । अर्थात् उदात्ते स्वरारोहः उपरिभागे भवति, अनुदात्ते अधोभागे, स्वरिते उदात्तानुदात्तयोर्मध्यभागे समाहारे तिष्ठति । तस्य स्वरत्रयस्य लक्षणस्य देवतास्थानादिक्रमेण वर्णनं भविष्यति । अर्थादत्र याज्ञवल्क्यशिक्षायाम् अहम् ऋषिः याज्ञवल्क्यः शुक्लयजुर्वेदस्य सर्वासाम् शाखानां कृते हि उदात्तानुदात्तस्वरितप्रचयानां स्वराणामुच्चारणकालस्य वेदाध्यायिनां गात्रस्थितिं हस्तमुद्राञ्च तथैव तेषां स्वराणां दैवतं सम्यक्तया वर्णयिष्यामि वैदिकाध्ययनपरम्परायाः पालनार्थमितिभावः ।

आचार्यो याज्ञवल्क्यः स्वराणां वर्णविशेषानाह-

शुक्लमुच्चं विजानीयान्नीचं लोहितमेव च ।
श्यामन्तु स्वरितं विद्यादग्निमुच्चस्य दैवतम् ॥ 2॥

सरलार्थः - उच्चस्वरेणोच्चरितम् उदात्तं श्वेतवर्णयुक्तं भवति । अनुदात्तस्य रक्तवर्णः अस्ति । स्वरितस्य वर्णः कृष्णः अस्ति । अनेन प्रकारेण स्वराणां स्वरूपप्रसङ्गे वर्णाः निरूपिताः इदानीं तेषां स्वराणां देवताविचारः क्रियते । अग्निः उदात्तस्य देवता इति याज्ञवल्क्यः कथयति ।

देवतानां जातीनाञ्च विचारः -

नीचं सोमं विजानीयात् स्वरिते सविता भवेत् ।

उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमुच्यते ॥ 3॥

सरलार्थः - उदात्तस्य देवतायाः प्रतिपादनानन्तरम् अधुना अनुदात्तस्य स्वरितस्य च देवताविषये कथ्यते । अनुदात्तस्य देवता चन्द्रः, स्वरितस्य देवता सूर्यः अस्ति । अनन्तरं स्वराणां जातिविधाने उदात्तस्य ब्राह्मणजातिः, अनुदात्तस्य क्षत्रियजातिः इति ।

अथ गोत्रविचारः-

वैश्यन्तु स्वरितं विद्याद् भारद्वाजमुदात्तकम् ।

नीचं गौतममित्याहुर्गार्ग्यं च स्वरितं विदुः ॥ 4॥

सरलार्थः - स्वरितस्वरं व्यापारकर्मणि लग्नं वैश्यजातिविशिष्टं विजानीयात् । एतावत्पर्यन्तं जातिविचारं कृत्वा उदात्तादिस्वराणां गोत्रं विचारयितुम् आचार्यः याज्ञवल्क्यः कथयति यत् उदात्तस्य भारद्वाजगोत्रमस्ति । अनुदात्तस्य गौतमगोत्रमस्ति । गार्ग्य स्वरितस्य गोत्रमस्तीति वैदिकविद्वांसः कथयन्ति ।

अथ स्वराणां छन्दांसिः -

विद्यादुदात्तं गायत्रं नीचं त्रैष्टुभमेव च ।

जागतं स्वरितं विद्यादेवमेवं नियोगतः ॥ 5॥

सरलार्थः - छन्दांसि विषये आचार्यः कथयति चतुर्विंशत्यक्षर सुप्रसिद्धगायत्रीछन्दः उदात्तस्य वर्तते । अनुदात्तस्य छन्दः त्रैष्टुभम् (त्रिष्टुप्) अस्ति । जागतं वा जगती स्वरितस्य छन्दः अस्ति । अनेन प्रकारेण स्वरत्रयस्य लक्षण-देवता-जाति-गोत्र-छन्द वर्णादिविषये क्रमेण वर्णितम् ।

स्वराणां साप्तविध्ये सति अत्र त्रैविध्यं कथं सिद्ध्यति -

गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः ।

त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ॥ 6॥

सरलार्थः - गान्धर्ववेदः सामवेदस्य उपवेदः वर्तते । गानप्रधानः सामवेदः । तत्र गान्धर्ववेदे षड्जादिसप्तस्वराणां विवेचनं दृश्यते । एते षड्जादयः गान्धर्ववेदोक्ताः सप्तस्वराः इति यजुर्वेदे प्रतिपादितम् उदात्तानुदात्तस्वरितादिषु त्रिषु स्वरेषु अन्तर्भूताः भवन्ति ।

उदात्तादित्रिस्वरेषु कथमन्तर्भूताः सप्त स्वरा इत्याह -

उच्चौ निषादगान्धारौ नीचावृषभधैवतौ ।

शेषास्तु स्वरिता ज्ञेयाः षड्ज-मध्यम-पञ्चमाः ॥ 7 ॥

सरलार्थः - गान्धर्ववेदस्य षड्जादयः सप्तस्वराः उदात्तदिस्वरत्रये कथमन्तर्भूताः भवन्तीति प्रसङ्गे आचार्यः याज्ञवल्क्यः कथयति यत् निषादगान्धारौ द्वौ स्वरौ उदात्तस्वरे अन्तर्भूतौ स्तः। ऋषभधैवतौ अनुदात्तस्वरे अन्तर्भूतौ स्तः । एतदतिरिक्ताः षड्ज-मध्यम-पञ्चमाः स्वराः स्वरितस्वरे समाहृताः भवन्ति ।

षड्जो वेदे शिखण्डिः स्याद् ऋषभः स्यादजामुखे ।

गावो रम्भन्ति गान्धारं क्रौञ्चाश्वैव तु मध्यमम् ॥ 8 ॥

सरलार्थः – गान्धर्ववेदे षड्जस्वरस्य उच्चारणं मयूरवाणीवत् करणीयम् । ऋषभस्वरस्य उच्चारणम् अजः यथा वदति तथैव करणीयम् । गान्धारस्वरस्योच्चारणं यथा गौः वदति तथैव करणीयम् । मध्यमस्वरस्योच्चारणं यथा क्रौञ्चपक्षिविशेषः करोति तथैव करणीयम् ।

कोकिलः पञ्चमं ब्रूते निषादं तु वदेद् गजः ।
आश्वश्च धैवतो ज्ञेयः स्वराः सप्तेति गीयते ॥ 9 ॥

सरलार्थः – पूर्वोक्तजीवैः सह अन्ये जीवा अपि स्वकीयोच्चारितध्वनिभिः विशेषान्वैदिकस्वरान्स्मारयन्तीति निर्दिशन्नाह याज्ञवल्क्यः यत् कोकिलः पञ्चमस्वरेण वदति, गजः निषादस्वरोच्चारणं स्मारयति तथा च अश्वो धैवतं ध्वनतीतिभावः ।

अथ मात्राकालः –

निमेषषोमात्राकालः स्याद्विद्युत्कालस्तथा परे ।
अक्षरात्तुल्ययोगाच्च मतिः स्यात्सोमशर्मणः ॥ 10 ॥

सरलार्थः – नेत्रकनीनिकास्फुरणोचितः कालः निमेषः इति कथ्यते । स एव कालः मात्राकालः इति आचार्यस्य मतम् । अन्ये केचन आचार्याः कथयन्ति यत् विद्युत्स्फुरणकालः एव मात्राकालः । अस्मिन् विषये आचार्यसोमशर्मणः मतमस्ति यत् एकाऽक्षरोच्चारणानन्तरं द्वितीयाऽक्षरस्य उच्चारणे यः कालः क्षपितः स एव कालः मात्राकालः इति ।

शब्दार्थः

उच्चम् – उदात्तम्, **विजानीयात्** – विशेषेण विद्यात् **शुक्लम्** – श्वेतवर्णयुक्तम् शुभ्रम् वा **नीचम्** – निम्नस्वरयुक्तमनुदात्तम् **लोहितम्** – रक्तवर्णम् **श्यामम्** – कृष्णवर्णम् **सोमम्** – चन्द्रमसम् **सविता** – सूर्यः **विदुः** – ज्ञानं कुर्युः **नियोगतः** – प्रयोगतः **शिखण्डी** – मयूरः **अजा** – छागः **गावः** – धेनवः **क्रौञ्चः** – क्रौञ्चपक्षिविशेषः **कोकिलः** – पिकः **ब्रूते** – वदति, **गजः** – हस्ती **निमेषः** – क्षणः **विद्युत्** – तडित **स्फुरणम्** – चाकचिक्यरूपेण प्रकाशनम् **मतिः** – बुद्धिः **तुल्यम्** – सदृशम्

स्वाध्यायः

1. अधोलिखतप्रश्नेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) स्वरितस्य वर्णः कः ?
(क) शुक्लः (ख) लोहितः (ग) श्यामः (घ) नीलः

(2) वैदिकछन्दस्सु सुप्रसिद्धछन्दः किमस्ति ?
(क) गायत्री (ख) अनुष्टुप् (ग) बृहती (घ) त्रिष्टुप्

(3) कः गान्धारस्वरेण रम्भाति ?
(क) कोकिलः (ख) ऋषभः (ग) अजा (घ) गौः

(4) क्रौञ्चाः कतमं स्वरं ध्वनन्ति ?
(क) उच्चैः (ख) पञ्चमम् (ग) मध्यमम् (घ) गान्धारम्

(5) सोमशर्मणः मतानुसारं मात्राकालः कः ?
(क) निमेषः (ख) विद्युत्कालः (ग) तुल्ययोगात् (घ) द्विनिमेषः

(6) पञ्चमस्वरेण कः वदति ?

(क) कोकिलः (ख) ऋषभः (ग) अजा (घ) गौ

(7) धैवतस्वरस्योच्चारणं कः करोति ?

(क) अश्वः (ख) ऋषभः (ग) अजा (घ) गौ

(8) षड्जादिसप्तस्वराणां विवेचनं कुत्र दृश्यते ?

(क) धनुर्वेदे (ख) ऋग्वेदे (ग) अथर्ववेदे (घ) गान्धर्ववेदे

(9) स्वरितस्य का देवता ?

(क) सोम (ख) अग्निः (ग) सविता (घ) विष्णुः

(10) षड्जादयः कति स्वराः ?

(क) 3 (ख) 5 (ग) 7 (घ) 8

2. एकैकेन वाक्येन उत्तरं देयम् ।

(1) याज्ञवल्क्यशिक्षायाः मुख्यप्रतिपाद्यविषयः कोऽस्ति ?

(2) वेदाङ्गेषु शिक्षाग्रन्थस्य महत्त्वपूर्णं स्थानं किमर्थं विद्यते ?

(3) शिक्षाविषये तैत्तिरीयोपनिषदः वचनम् किम् ?

(4) के सन्ति षड्जादयः स्वराः ?

(5) उदात्तादित्रिस्वरेषु सप्तस्वराः कथमन्तर्भूताः भवन्ति ?

(6) स्वराणां गोत्रविचारः कथं कर्तव्यः ?

(7) वेदानां शुद्धोच्चारणार्थम् उदात्तादिस्वराणां ज्ञानं कथम् अपेक्षितं वर्तते ?

(8) 'अथ' इति शब्दस्य प्रयोगे किमस्ति शास्त्रीयसिद्धान्तः ?

(9) स्वराणां छन्दविचारः कथं कर्तव्यः ?

(10) स्वरणां देवताविचारः कथं कर्तव्यः ?

3. अधोलिखितश्लोकान् पूरयन्तु ।

(1) शुक्लमुच्चं विजानीयान्नीचं............. ॥

(2) वैश्यन्तु स्वरितं विद्याद्........... ॥

(3) गान्धर्ववेदे ये प्रोक्ताः सप्त............॥

(4) षड्जो वेदे शिखण्डिः स्याद्............ ॥

(5) निमेषोमात्राकालः स्याद्............ ॥

4. निम्नलिखित शब्दरूपाणां परिचयं यच्छत ।

(1) ब्राह्मणेन (2) अङ्गैः (3) शिक्षाग्रन्थानाम् (4) मन्त्रेषु (5) उच्चारणम् (6) निषादगान्धारौ (7) ध्वनिभिः (8) मात्राकालः (9) गावः (10) मतिः

5. सन्धिविच्छेदं कुरुत ।

(1) स्वकीयोच्चारितः (2) शिक्षाध्यायः (3) वाग्वज्रम् (4) सम्पद्रूपः (5) पदस्यार्थः (6) इत्युक्तः (7) स्वरारोहः (8) स्वरितश्च (9) वेदोक्ताः (10) एकाक्षरः

6. सन्धिं कुरुत ।

(1) भूमिकायाम् + उक्तम् (2) अथस्य + अपि (3) पदस्य + उत्तरेण (4) वेद + अध्ययनाय (5) सम्यक् + तया (6) अस्ति + इति (7) निर्दिशन् + आह (8) ज्ञानम् + आवश्यकम् (9) वेद + अध्यापकः (10) एतद् + अर्थम्

7. क्रियापदानां परिचयं लिखत ।

(1) ब्रूते (2) विद्यात् (3) आह (4) गीयते (5) स्यात् (6) विद्यते (7) उपस्थापयन्ति (8) उपदिश्यते (9) हिनस्ति (10) उच्यते

छात्रप्रवृत्तिः

वैदिकस्वरज्ञानस्य अभ्यासं कुर्युः ।

विशिष्टज्ञानम्

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो नतमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥
अस्यार्थो वर्तते यत् यदि मन्त्रः स्वरतो वर्णतो वा खण्डितो भवति तर्हि स एव मन्त्रः वज्ररूपं धृत्वा यजमानं हन्ति । यथा वृत्रासुरस्य यज्ञसम्पादने ''इन्द्रशत्रुर्वर्धस्व'' इति मन्त्रस्य प्रयोगे आद्युदात्तस्थाने अन्तोदात्तस्योच्चारणेन तस्य वधः सञ्जातः ।

●

6 याज्ञवल्क्यशिक्षानुसारं वेदाध्ययनम्

वैदिकवाङ्मये ऋक्-यजु-साम-अथर्वभेदेन चत्वारो वेदाः सन्ति । एतेषां चतुर्णां वेदानां पठनपाठनं गुरुपरम्परया प्राचीनकालादेव अविचलं प्रचलति । ऋषयो मन्त्रद्रष्टारः इत्यनेन विज्ञायते यत् भगवतः सकाशात् आगताः वेदाः अपौरुषेयाः । परन्तु ऋषयः मन्त्रान् योगशक्त्या संगृह्य गुरुपरम्परया अध्ययनाध्यापनञ्च प्रचालितवन्तः । कालक्रमे पुनर्वैयक्तिक्य-एषणा यदा आगता, तथा च विविधभौतिकविषयान् प्रति आसक्तिः सञ्जताः ताः मानवस्य चिन्तनपक्षः, विमर्शनियमः अभ्यासश्च संकोचतां प्राप्तः । तदा वेदपाठस्य संरक्षणार्थं सम्यक्प्रयोगं विधातुं च ऋषयः उपायचिन्तनं प्रारब्धवन्तः । अनन्तरं तेषां वेदानां संरक्षणार्थं प्रत्येकं वेदे पाठविभागाः कृताः ऋषिभिः । वयसात्पैलः संहितापदक्रमं च त्रिविधरुपं पठित्वा इन्द्रप्रमितये ददौ । इन्द्रप्रमितिश्चतुर्धा जटान्तं व्यासं कृत्वा बाष्कलादि-अग्निमित्रान्तषट् शिष्येभ्य स्वसुताय माण्डुकेयाय च ददौ । शाकल्यः संहितापदक्रमजटादण्डरुपं च पञ्चधा व्यासं कृत्वा वात्स्यमुद्गलशालीयगोखल्य -शिष्येभ्यो ददौ । अनेन प्रकारेण गुरुपरम्परया शाखाः आगताः । वेदोऽखिलोधर्ममूलम् इति मनोर्वाक् सर्वप्रकारकस्य लौकिकालौकिकधर्मस्य वेदमूलकत्वं संसाधयति । धर्मे जगतः प्रतिष्ठा भवति । अतः धर्मरक्षणार्थं साम्प्रतिकसमये वैदाध्ययनस्यावश्यकता वर्तते । वेदेषु अनेके उपयोगिनो लौकिकालौकिकविषयाः स्थाने स्थाने निर्दिष्टाः सन्ति । तेषामावश्यकता साम्प्रतिकसमये अपेक्षते । परन्तु वेदाध्ययने केचन नियमाः वर्तन्ते, तेषां नियमानां पालनम् अवश्यमेव कर्तव्यम् ।

करसंयोजनं विधाय शरीरस्यान्तराङ्गनिवेशप्रकारमाह-

सुप्रसन्नमना भूत्वा किञ्चिन्नम्रस्त्वधोमुखः ।
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत् ॥ 1 ॥

सरलार्थः - वेदाध्ययनात् प्राक् शरीरस्य अवयवानां संधारणं कथं कर्तव्यमिति विषये आचार्ययाज्ञवल्क्यः कथयति यत् वेदाध्यायी छात्रः अत्यन्तं प्रसन्नमनसा नम्राननो भूत्वा कराग्रे दृष्टिं सन्निधाय वेदार्थं चिन्तयेत् ।

वेदार्थानुचिन्तनस्यानुक्रमः-

प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुपूर्व्येण ततो वेदान् समारभेत् ॥ 2 ॥

सरलार्थः - वेदाध्ययनप्रारम्भात् पूर्वं प्रणवं नाम 'ॐकारं वेदेषु अथकारं भाष्येषु' इति प्रातिशाख्यवचनानुसारं वेदमन्त्राणामुच्चारणात् प्रागेव ॐकारस्य विधानं वर्तते । तदनन्तरं भूर्भुवः स्वरित्येताः तिस्त्रः व्याहृतयः, अनन्तरं गायत्रीमन्त्रस्य, तत्पश्चादेव वेदाध्ययनस्य प्रारम्भं कुर्यात् । अपि केचन पारम्परिकविद्वांसः कथयन्ति प्रणवोच्चारणात् पूर्वं 'हरि' इत्येतस्योच्चारणमवश्यमेव विधेयमिति । अर्थात् 'हरिः ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्' इति पठनात् अनन्तरमेव अन्यान् वेदमन्त्रान् पठेत् ।

वेदाध्ययनस्य सामान्यविधिं प्रतिपाद्याधुना वर्णोच्चारणविधिं निर्दिशति-

कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः ।
स्वस्थः प्रशान्तो निर्भीको वर्णानुच्चारयेद् बुधः ॥ 3 ॥

सरलार्थः - वेदाध्ययनप्रारम्भकाले वर्णानामुच्चारणं केन विधिना कर्त्तव्यं किम्भूतेन वा इत्याह याज्ञवल्क्यः यथैव कच्छपोऽङ्गानि संकोचयति तथैव वैदिकपण्डितः हस्त-पाद-मुख-पुच्छादीनि संकोचनं कृत्वा स्वस्थः प्रशान्तो निर्भयश्च सन् वर्णान् उच्चारयेत् ।

अक्षरोच्चारणे ये दोषाः समापतन्ति तान् निषेधमुखेन प्रतिपादयति-

नाऽभ्याहन्यान् न निर्हन्यान् न गायेन्नैव कम्पयेत् ।

यथाऽदावुच्चरेत्द् वर्णांस्तथैवैनान् समापयेत् ॥ 4 ॥

सरलार्थः - वेदाध्ययनकाले ये दोषाः समागच्छन्ति तेषां निषेधमुखेन आचार्ययाज्ञवल्क्यः कथयति यत् वेदाध्यायी अक्षराणां व्यत्येनोच्चाणं न कुर्यात् । स्थानप्रयत्नराहित्येन वर्णोच्चारणं न कर्तव्यम् । वैदिकमन्त्राणामुच्चारणं स्पन्दनं गानदृष्ट्या च न कुर्यात्, निर्धारितस्वरेणैव कर्तव्यम् । आदौ मन्त्रोच्चारणप्रारम्भकाले येन प्रकारेण यया स्वरपद्धत्या वृत्या वा वर्णान् उच्चारयेत् तेनैव प्रकारेण समापयेत् ।

वर्णोच्चारणसमये मुखहस्तयोः सामञ्जस्यमावश्यकम्-

सममुच्चारयेद् वर्णान् हस्तेन च मुखेन च ।

स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ ॥

हस्तभ्रष्टः स्वरभ्रष्टो न वेदफलमश्नुते ॥ 5 ॥

सरलार्थः - वेदाध्ययनसमये मन्त्रवर्णोच्चारणे मुखस्थितेन साकं हस्तसञ्चालनमपि कुर्यात् । स्वरहस्तौ च द्वाविमौ युगपदेव वेदपाठे प्रवर्तेते । अतः वेदाध्ययनकाले द्वयोरपि स्वरहस्तयोः एककालावच्छेदेन सामञ्जस्यम् आवश्यकमिति तात्पर्यम् । हस्तभ्रष्टः एवञ्च उदात्तानुदात्तस्वरितादीनां स्वराणामुच्चारणे असमर्थः वेदाध्यायी धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थरुपं वेदाध्ययनफलं न प्राप्नोति ।

तत्र कीदृशाः पुरुषाः वर्णानां समुचितोच्चारणे असमर्था भवन्ति -

न करालो न लम्बोष्ठो नाऽव्यक्तो नाऽनुनासिकः ।

गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति ॥ 6 ॥

सरलार्थः - दन्तुरः, लम्बायमानाधरः, अव्यक्तः, अनुनासिकः, गद्गदः, बद्धजिह्वः जनः सम्यक् रुपेण वर्णान् उच्चारयितुं न शक्नोति ।

कीदृशो नरः वर्णोच्चारणे समर्थः स्यादिति निर्देशः -

प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ ।

प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति ॥ 7 ॥

सरलार्थः - यस्य वेदाध्ययनकर्तुः शिष्यस्य शरीररचनाक्रमः प्रभावोत्पादकः, शीलगुणोपेतः स्वभावः दन्तोष्ठौ विकृतिरहितौ, प्रगल्भः विनीतादिसद्गुणधारकः शिष्यः वर्णोच्चारणकर्तुं समर्थो भवति ।

यथाविहितवर्णोच्चारणे के चतुर्दशदोषाः समापतन्तीत्याह -

शङ्कितं भीतमुद्‌धृष्टमव्यक्तमनुनासिकम् ।

काकस्वरं मूर्ध्निगतं तथा स्थानविवर्जितम् ॥ 8 ॥

विस्वरं विरसं चैव विश्लिष्टं विषमाहतम् ।

व्याकुलं तालहीनं च पाठदोषाश्चतुर्दश ॥ 9 ॥

सरलार्थः - संशयापन्नं, भयाक्रान्तं, क्रोधाविष्टम्, स्फुटतया भाषणेऽसमर्थम्, नासिकायामुच्चारितम्, कर्कशस्वरम्, मूर्ध्निगतं, स्वस्थानभ्रष्टम्, उदात्तादिस्वररहितम, व्याकुलम्, तालरहितञ्चेत्येते चतुर्दशपाठदोषाः भवन्ति । एतान् विहाय वेदाध्ययने प्रवृत्ताः भवेयुः ।

संहिताध्ययनं मन्त्रसमुद्र इव दुस्तरम्-

संहिता सारबहुलः पदसंज्ञासमाकुलः ।
क्रमसन्धिसमाकीर्णो दुस्तरो मन्त्रसागरः ॥ 10 ॥

सरलार्थः - चतुर्दशवर्णोच्चारणदोषान् वर्णयित्वा तत्पश्चात् पदसंज्ञासमाकुल- सन्धिक्रमपाठयुक्तानाम् ऋग्वेदादिमन्त्रसंहितानामध्ययनं मन्त्रमहोदधिवत् सुविस्तीर्णः कष्टसाध्यं वर्तते । अतः सहजतया केनापि नैवायं सन्तरणीयो वर्तते ।

शब्दार्थः

सुप्रसन्नमना - अत्यन्तप्रसन्नचेतसा **मुखम्**-आननम् **हस्ताग्रे**-कराग्रे **निवेश्य**-सन्निधाय **प्रणवम्** - ॐकारम् **प्राक्**-आदौ **प्रयुञ्जीत** - प्रकर्षेण ब्रूयात् **व्याहृतीः** - भूः भुवः स्वः आनुपूर्व्येण- क्रमानुसारेण **कूर्मः**-कच्छपः **अङ्गानि**-हस्तपादादीनि अवयवानि **संहृत्य**-संहरणं कृत्वा **प्रशान्तः** शान्तचित्तः **बुधः** -पण्डितः **अभ्याहन्यात्** -अक्षराणां व्यत्येनोच्चारणम् **निर्हन्यात्**-निर् उपसर्गः **हननम्**-व्याघातः अर्थात् स्थानप्रयत्नराहित्येन वर्णोच्चाणम् **कम्पयेत्** - स्पन्दनं कुर्यात् **समम्**- तुल्यकालम् **युगपत्**- साकम् **भ्रष्टः** - पतितः **अश्नुते** - लभते करालः दन्तुरः **लम्बोष्ठः**-लम्बायमाना धरः **अव्यक्तः** न व्यक्तः (अस्पष्टः) **गद्गदः** वाग्विजृम्भितः (अवरुद्धकण्ठः) **बद्धजिह्वः** स्खलितवाग्विशेषः **प्रकृतिः**- स्वभावः शरीराकृतिर्वा **कल्याणी** - कल्याणकारिका मधुरा वा **प्रगल्भः**- बावदूक (शास्त्रग्राही) **विनीतः** - विनम्रः **अर्हति** - शक्नोति **उद्धृष्टम्** - क्रोधाविष्टम् **मूर्धिगतम्** - मस्तकस्थितम् **स्थानविवर्जितम्** - स्वस्थानभ्रष्टम् **विस्वरम्** - स्वररहितम् **विरसम्** - माधुर्यादिरसविरहितम् मूर्ध्निगतम् **विश्लिष्टम्** - विश्लेषितम् **विकीर्णम्** - वर्णान्तरे प्रसृतम् **विषमाहतम्**- वैपरीत्येन ह्रस्वदीर्घादिप्रकटनम् **पदसंज्ञासमाकुलः**- पदसंज्ञाभिः समायुक्तः **मन्त्रसागरः** मन्त्रसमुद्रः **दुस्तरः**-दुःखेन प्रयासेन तरितुं योग्यः ।

स्वाध्यायः

1. प्रदत्तेषु विकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) वेदोऽखिलोधर्ममूलम् इति वचनं दृश्यते ?
(क) ऋग्वेदे (ख) यजुर्वेदे (ग) याज्ञवल्क्यस्मृतौ (घ) मनुस्मृतौ

(2) वेदमन्त्राणामुच्चारणात् प्रागेव कस्य उच्चारणविधानं वर्तते ?
(क) ॐकारस्य (ख) अथकारस्य (ग) गायत्रीमन्त्रस्य (घ) शिवस्य

(3) शास्त्रानुसारं कः अङ्गानि संकोचयति ?
(क) मार्जारः (ख) मर्कटः (ग) कच्छपः (घ) सर्पः

(4) वर्णोच्चारणसमये कयोः सामञ्जस्यमावश्यकम् ?
(क) मुखहस्तयोः (ख) हस्तपादयोः (ग) मुखपादयोः (घ) मुखमन्त्रयोः

(5) विहित वर्णोच्चारणे कति दोषाः समापतन्ति ?
(क) 7 (ख) 10 (ग) 12 (घ) 14

(6) शुक्लयजुर्वेदस्य शिक्षाग्रन्थस्य नाम किम् ?
(क) नारदशिक्षा (ख) याज्ञवल्क्यशिक्षा (ग) वशिष्ठशिक्षा (घ) मानवशिक्षा

(7) वेदाध्यायी कुत्र दृष्टिं संस्थाप्य शास्त्रर्थमनुचिन्तयति ?

(क) हस्ताग्रे (ख) नासाग्रे (ग) अधोमुखम् (घ) पुस्तके

(8) स्वरभ्रष्टः किं न अश्नुते ?

(क) धर्मः (ख) स्वर्गः (ग) वेदफलम् (घ) मोक्षः

(9) कः दुस्तरो वर्तते ?

(क) क्रमपाठः (ख) घनपाठः (ग) मन्त्रसागरः (घ) वेदार्थः

(10) प्रणवं प्राक् प्रयुज्य तदन्तरं किम् उच्चारयेत् ?

(क) हरिः (ख) व्याहृतिः (ग) सावित्रीम् (घ) मन्त्रम्

2. एकैकेन वाक्येन उत्तरं देयम् ।

(1) गुरुपरम्परा शाखाः कथम् आगताः ?

(2) साम्प्रतिकसमये वेदाध्ययनस्यावश्यकता कथं वर्तते ?

(3) याज्ञवल्क्यशिक्षायाः मुख्यप्रतिपाद्यविषयः कोऽस्ति ?

(4) वेदार्थानुचिन्तनस्यानुक्रमः कः ?

(5) अक्षरोच्चारणे के दोषाः समापतन्ति ?

(6) कः वेदफलं न प्राप्नोति ?

(7) कीदृशो नरः वर्णोच्चारणे समर्थः ?

(8) संहिताध्ययनं कथं दुस्तरम् ?

(9) कीदृशो नरः वर्णोच्चारणे समर्थः ?

(10) मन्त्रसागरः कीदृशो वर्तते ?

3. अधोलिखितश्लोकान् पूरयन्तु ।

(1) नाऽभ्याहन्यान् न निर्हन्यान्............. ॥

(2) प्रणवं प्राक् प्रयुञ्जीत............ ॥

(3) न करालो न लम्बोष्ठो नाऽव्यक्तो........... ॥

(4) शङ्कितं भीतमुद्धृष्टमव्यक्त............ ॥

(5) संहिता सारबहुलः........... ॥

4. निम्नलिखित शब्दरुपाणां परिचयं यच्छत ।

(1) शास्त्रार्थम् (2) वेदान् (3) करालः (4) शोभनौ (5) दन्तोष्ठौ (6) व्याहृती (7) वर्णान् (8) दृष्टिम् (9) मुखेन (10) पद्धत्या

5. सन्धिविच्छेदं कुरुत ।

(1) हस्ताग्रे (2) व्याहृतीस्तदनन्तरम् (3) कूर्मोऽङ्गानि (4) नाऽभ्याहन्यान् (5) तथैवैनान् (6) सममुच्चारयेत् (7) द्वावेतौ (8) लम्बौष्ठः (9) वक्तुमर्हति (10) नैवायम्

6. सन्धिमेलनं कुरुत ।

(1) अधः + मुखः (2) च + अनुपूर्व्येण (3) वर्णान् + उच्चारयेत् (4) च + एव (5) हस्त + च (6) फलम् + अश्नुते (7) न + अनुनासिकः (8) प्रकृतिः + यस्य (9) युगपत् + एव (10) प्रणवः + उच्चारणात्

7. क्रियापदानां परिचयं लिखत ।

(1) कुर्यात् (2) चिन्तयेत् (3) आह (4) अर्हति (5) स्यात् (6) विद्यते (7) भवेयुः (8) उपदिश्यते (9) ज्ञायते (10) कृताः

छात्रप्रवृत्तिः

याज्ञवल्क्यस्य परिचयः अधीयताम् ।

विशिष्टज्ञानम्

अग्निवायुरविभ्यस्तु त्रयब्रह्मसनातनम् ।
दुदोहयज्ञसिध्यर्थम् ऋग्यजुस्सामलक्षणम् ॥ मनुस्मृतिः- 1/13

यज्ञप्रधानाः वेदाः । तेषां वेदानामुत्पत्तिविषये आचार्यमनुः कथयति अग्नेः ऋग्वेदरजायत, वायोः यजुर्वेदः आदित्यात् सामवेदः । एतेषां त्रयवेदानामुत्पत्तिः यज्ञसम्पादनार्थं ब्रह्मणा कृतम् ।

●

7 शुक्लयजुर्वेदे प्रथमोऽध्यायः (माध्यन्दिनीय) भाग-1

प्रस्तावना

यस्य निःश्वसितं तं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे, विद्यातीर्थं महेश्वरम् ॥

समस्तस्य ज्ञानस्य अखिलभण्डाराः वेदाः सन्ति, यैः वेदैः समस्तं ज्ञानं मनुष्याः प्राप्तुं शक्नुवन्ति । एतान् वेदान् ध्यायं ध्यायं महर्षयः शास्त्राणि रचितवन्तः, अतः यज्ज्ञानं वेदेषु वर्तते, तदेवज्ञानं समप्रति दृश्यमानमस्ति । विद्यते सर्वं ज्ञानम् अस्मिन् इति वेदः, विन्दति प्राप्नोति सर्वं ज्ञानम् अनेन इति वेदः, इत्यं वेदपदस्य वैयाकरणाः व्युत्पत्तिं कुर्वन्ति । सर्वस्य ज्ञानस्य ज्ञानराशिः वर्तन्ते वेदाः । अस्मिन् शुक्लयजुर्वेदे चत्वारिशंत् (40) अध्यायाः सन्ति, तेषु-पञ्चसप्तत्युत्तर त्रयोदश शतम् (1375) मन्त्राः सन्ति ।

तेषु सर्वेषु मन्त्रेषु त्रयस्त्रिंशत् देवानां वर्णनम्, सर्वेषाम् अष्टानां वसूनां महत्त्वं प्रतिपादितमस्ति । अष्टौ वसवः सन्ति तद्यथा- अग्निः पृथिवी, वायुः, अन्तरिक्षम्, आदित्यः, द्यौः सप्तविंशतिः नक्षत्राणि, चन्द्रः एते अष्टौ वसवः देवाः विद्यन्ते । वसन्ति निवासं कुर्वन्ति सर्वेषां मानवानां गृहे इति वसवः । एते अष्टौ वसवः नित्यम् अस्माकं गृहे वसन्ति । तदनन्तरम् एकादशानां रुद्राणां वर्णनम्, द्वादशसूर्याः ते एव सौरमासाः सन्ति । इन्द्रः प्रजापतिः एतेषां महत्त्वं वर्णनं च एतेषु मन्त्रेषु वर्तते तथा च उलूखलस्य, मुशलस्य, विद्यमानेषु पञ्चदशसु मन्त्रेषु तथाच दर्शपूर्णमासनाम कस्य यागस्य, पलाशस्यच व्रतस्य, शकहस्य, पवित्रीकरणस्य च महत्ताम् एते मन्त्राः प्रतिपादयन्ति । प्रस्तुतपाठे माध्यन्दिनीयशाखाध्यायिनः शुक्लयजुर्वेदस्य प्रथमाऽध्याये प्रथममन्त्राद् आरम्भ पञ्चदशमन्त्राः प्रस्तूयन्ते ॥

अजास्यः पीतवर्णः स्यात् यजुर्वेदोऽक्षसूत्रधृक् ।
वामे कुलिशपाणिस्तु भूतिदो मङ्गलप्रदः ॥

॥ मन्त्रः ॥

हरिः ओम् इषेत्त्वोर्ज्जेत्त्वाव्वायवस्त्वस्थदेवोवः सविता
प्प्रार्प्पयतुश्श्रेष्ठ्तमायकर्म्मणऽ आप्प्यायद्ध्वमग्घ्न्याऽ
इन्द्रायभागम्प्रजावतीरनमीवाऽ अयक्ष्मामावस्तेनऽ
ईशतमाघशं सोद्ध्रुवाऽ अस्मिन्नागोपतौ स्यात बह्वी
य्यजमानस्यपशून्नपाहि ॥

॥ शु.य.अ. 1 मन्त्र-1 ॥

॥ पदपाठः ॥

ओम् इषे । त्वा । ऊर्ज्जे । त्वा । व्वायवः । स्थ । देवः । व्वः । सविता । प्र । अर्प्पयतु । श्रेष्ठतमाये-तिश्रेष्ट्ठतमाय । कर्म्मणे । आ । प्यायद्ध्वम् । अग्घ्न्याः । इन्द्राय । भागम् । प्रजावतीरितिप्प्रजा व्वतीः । अनमीवाः । अयक्ष्माः । मा । व्वः । स्तेनः । ईशत । मा । अधशꣳस सऽइत्यघ शꣳसः । ध्रुवाः । अस्मिन् । गोपतावितिगो पतौ । स्यात । बह्व्वीः । यजमानस्य । पशून् । पाहि ॥1॥

सरलार्थः - हे पलशस्य शाखाः ? वर्षायै, अन्नाय, बलाय च अहं तासां सर्वासां शाखानां कर्तनं करोमि । हे गोवत्साः ? भवन्तः सर्वे वायुदेवस्वरूपाः सन्ति, अतः गच्छन्तु तत्र सस्यं तृणं चरन्तु पुनः यदा भगवान् सूर्यः अस्तं याति, तस्मिन् काले पुनः आगच्छन्तु हे अहिंस्याः गावः ! इन्द्रस्य भागरूपस्य दुग्धस्य ऊधामि सुरक्षां कुर्वन्तु । गोदोहनस्य समये श्रृष्ठतमानि यज्ञस्य निमित्तानि कर्माणि युष्मान् पयस्विनीः कुर्वन्तु । हे गावः ! युष्मान् सर्वे चोरादयः हिंसकाः हिंसितुं समर्थाः न भवेयुः । भवत्यः सर्वाः अस्मिन् यज्ञस्य यजमाने स्थिरभाविन्यः भवन्तु । हे शाखाः ! भवत्यः सर्वाः पलाशस्य शाखाः यजमानस्य सर्वेषां पशूनां रक्षणं कुर्वन्तु ॥ 1॥

मन्त्रः

व्वसोः पवित्रमसिद्यौरसिपृथिव्यसिमातरिश्वनोघर्म्मो सिव्विश्वधाऽ असि ।

परमेणधाम्ना दृꣳहस्वमाहव्वार्म्मा तेयज्ञपतिहर्व्वार्षीत् ।। शु.य.अ.1 मन्त्र. 2।।

पदपाठः

वसोः । पवित्रम् । असि । द्यौः । पृथिवी । मातरिश्वनः । घर्म्म । व्विश्वधाऽइतिविश्वव्व धाः । परमेण । धाम्ना । दृछहस्व । मा । हव्वाः । मा । ते । यज्ञपतिरिति यज्ञ पतिः । हवार्षीत् ॥ 2॥

सरलार्थः - हे पवित्राः कुशाः ? यूयं सर्वे यज्ञसाधनभूतस्य दुग्धस्य पवित्रकारकाः स्थ । हे स्थालि ? त्वं द्यौः वर्तसे तथा त्वं पृथ्वी असि वायुदेवस्य दीपकरूपा वर्तसे । सर्वेषां धारिका असि । त्वं तेजोऽग्निना दृढा भव । एवं त्वं वक्रा मा भव । यज्ञस्य स्वामी अपि त्वां वक्रां कर्तुं न अर्हसि ॥ 2॥

मन्त्रः

व्वसोः पवित्रमसि शतधारंव्वसोः पवित्रमसिसहस्रधारम् ।

देवस्त्वा सवितापुनातुव्वसोः पवित्रेणशतधारेण सुप्प्वाकामधुक्षः ॥ शु.य.अ. 1 मन्त्र 3 ॥

पदपाठः

शतधारमितिशत धारम् । सहस्रधारमितिसहस्र धारम् ॥ देवः त्वा । सविता । पुनातु । व्वसोः । पवित्रेण । शतधारेणेतिशत धारेण । सुप्पवेतिसु प्वा । काम् । अधुक्षः ॥ 3॥

सरलार्थः - हे दर्भमुष्टे ! शतधारस्य क्षीरेण त्वं पवित्रस्य कारिका वर्तसे । सहस्रधारक्षीरे त्वं पवित्रस्य कारयित्री वर्तसे । हे क्षीर ? त्वां शोधकः भगवान् सविता देवः शतधारः पवित्रया दर्भमुष्ट्या पवित्रीकरोतु । हे दोग्धः ! विद्यमानानां सर्वासां गवां मध्ये त्वं कां गां दुग्धवान् ॥ 3॥

मन्त्रः

साव्विश्वायुः साव्विश्वकर्म्मासाव्विश्वधायाः ।

इन्द्रस्यत्त्वा भागꣳ सोमेनातनच्मिव्विष्णोहव्यꣳरक्ष ॥ शु.य.अ. 1 मन्त्र 4॥

पदपाठः

सा । व्विश्श्वायुरितिविश्श्व आयुः । व्विश्श्वकर्म्मेतिविश्श्व कर्म्मा । व्विश्श्वधायाऽ इतिविश्श्व धायाः ॥ इन्द्रस्य ॥ त्वा ॥ भागम् । सोमेन । आ । तनच्मि । व्विष्णोऽइतिविष्णो । हव्यम्। रक्ष ॥ 4॥

सरलार्थः – अध्वर्युः मन्त्रेऽस्मिन् कथयति यत् सा गौः विश्वायुः इति नाम्नी वर्तते । सा एव गौः सर्वस्य विश्वस्य निर्माणस्य कर्त्री वर्तते तथा विश्वस्य धाया नाम पाययित्री वर्तते । दुग्धामृतत्त्वेन भावितं जीर्णं सदबलहेतुर्भवामि, अनेन कारणेन हे क्षीर ? इन्द्रस्य भागरूपे दुग्धे दधि प्रक्षिप्य कठिनं दधि करोमि, अतः हे विष्णो ! भवान् अस्य हवनीयस्य दधिभाविनः दुग्धस्य रक्षणं करोतु ॥ 4॥

मन्त्रः

अग्ग्नेव्व्रतपते व्व्रतञ्चरिष्ष्यामितच्छकेयन्तन्मेराध्ययताम् । इदमहमनृतात्सत्यमुपैमि ॥

॥ शु.य.अ. 1 मन्त्र ५ ॥

पदपाठः

अग्गने । व्व्रतपतऽ इतिव्रत यते । व्व्रतम् । चरिष्ष्यामि । तत् । शकेयम् । तत् । मे । राद्धयताम् ।। इदम् । अहम् । अनृतात् । सत्यम् । उप । एमि ॥ 5 ॥

सरलार्थः – हे अग्ने ! हे यज्ञदूतस्य पालक ! अहं यजमानः अनुष्ठानमिदं पूर्णं करिष्यामि तथा च इदम् अनुष्ठानं विधातुं सक्षमो भवामि । हे अग्ने ! अस्मिन् काले अहं भवतः अनुकम्पया असत्यात् सत्यमं प्राप्नोमि ॥ 5॥

मन्त्रः

कस्त्वायुनक्ति सत्वा युनक्ति कस्म्मैत्त्वायुनक्तितस्मैत्त्वायुनक्ति । कर्म्मणेवांव्वेषायवाम् ॥

॥ शु.य.अ. 1 मन्त्र 6 ॥

पदपाठः

ॐ कः । त्वा । युनक्ति । सः । कस्म्मै । तस्स्मै ॥ कर्म्मणे । व्वाम् । व्वेषाय ।। व्वाम् ॥ 6॥

सरलार्थः – यज्ञार्थस्य जलस्य धारणपात्र ! को देवः त्वां कर्मणि अस्मिन् नियुक्तं करोति, त्वां स एव प्राजपतिः नियुक्तं करोति । हे पात्र ! त्वां यज्ञस्य अग्नये सः प्रजापतिः नियुक्तं करोति । हे शूर्प ? अहं युवयोः द्वयोः यज्ञकर्मणि तथा तस्मिन् यज्ञकर्मणि व्याप्तत्वाद् ग्रहणं करोमि ॥ 6 ॥

मन्त्रः

प्रत्त्युष्टꣳरक्षः प्प्रत्युष्ष्टाऽ अरातयोनिष्ट्टप्तꣳरक्षोनिष्ट्टप्ताऽ आरातयः । उर्व्वन्तरिक्षमन्वेमि ॥

॥ शु. य. वेद. अ. 1 मन्त्र. ॥ 7 ॥

पदपाठः

प्रत्त्युष्ट्टमितिप्प्रति उष्ट्टम् । रक्ष ÷ । प्रत्युष्ट्टाऽइति प्प्रति उष्ट्टाः। अरातयः । निष्ट्टप्तम् । निस्तप्तमितिनिः तप्तम् । रक्ष ÷ । निष्ट्टप्ताः। निष्तप्ताऽ इतिनिः तप्तः । अरातय ॥ उरा अन्तरिक्षम् । अनु । एमि ॥ 7 ॥

सरलार्थः – युवयोः द्वयोः तपनं कुरुतम् । मया सर्वे राक्षसाः भस्मसात्कृताः, तथा च सर्वे अदातारः नष्टाः कृताः सन्ति । सर्वे राक्षसाः पूर्णतया भस्मतां गताः सन्ति, एवं सर्वे अदातारोऽपि पूर्णतया दग्धतां प्राप्ताः, सम्प्रति अहं विस्तृते अस्मिन् अन्तरिक्षे प्रवेशं करोमि ॥ 7॥

मन्त्रः

धूरसिधूर्व्वन्तन्धूर्व्वन्तधूर्धतँष्षोस्मान्धूर्धतितन्धूर्धँषंव्वयन्धूर्व्वामः ।

देवानामसिव्वह्निन्तमध्सस्निन्तमम्पप्रितमज्जुष्टतमन्देवहूतमम् । शु.य.वे.अ. 1 मन्त्र 8 ॥

पदपाठः

धूः । असि । धूर्व्व । धूर्व्वन्तम् । धूर्व्व । तम् । अस्मान् । यः । अस्मान् धूर्व्वति । तम् । धूर्व्व । यम् । व्वयम् । धूर्व्वामः ॥ देवानाम् । असि । व्वह्निन्तममितितमम् । सस्निन्तममितिसस्निन्नि तमम् । पप्रितममितिपप्रि तमम् । जुष्टतममितिजुष्ट तमम् । देवहूतममितिदेव हूतमम् ॥8॥

सरलार्थः – हविर्धानस्य शकटस्य हे धूः ! त्वं धुरा असि, त्वं हिंसायां रतानां राक्षसानां हिंसां कुरु, तेषामपि हिंसां करोतु, ये अस्माकं हिंसां कुर्वन्तः सन्ति । हे शकट ! सर्वेषां देवानां त्वम् अत्यन्तो वाहकः, सम्भक्ता, पालकः प्रियः तथा आह्वानस्य कर्ता भव ॥ 8॥

मन्त्रः

अह्रुतमसि हविर्द्धानन्दृ ध्हस्वमाहव्वाम्मातेषज्ञपतिहर्व्वार्षीत् ।

व्विष्णुस्त्वाक्क्रमतामुरुव्वातायापहतध् रक्षोसच्छन्ताम्पञ्च ॥ शु.य.वे.अ. 1 मन्त्र 9 ॥

पदपाठः

अह्रुतम् । असि । हविर्द्धानमितिहविः धानम् ।। विष्णुः ॥ त्वा । क्रमताम् । ऊरु । व्वाताय । अपहतमित्त्यप हतम् । रक्षः । सच्छन्ताम् पञ्च ॥ 9॥

सरलार्थः – हे शकट ! त्वं कुटिलो नासि । ऋणुभावेन स्थितोऽसि । हे हविरारोहकस्य शकट ! त्वं दृढो भव, त्वं तिर्यक् मा भव । यज्ञपतिरपि त्वां वक्रं कर्तुं न शकनोति । तव उपरि भगवतः विष्णोः आरोहणं भवतु । त्वं वायुदेवस्य तिर्यक् विस्तृतो भव । सर्वे राक्षसाः विनष्टाः । सञ्जाताः सन्ति । हे शकट ? एताभिः पञ्चभिः अङ्गुलिभिः बद्धानां प्रवेशेन मुष्टियुक्तानां ब्रीहीणां यवानामपि प्रदानम् अस्मभ्यं करोतु ॥ 9॥

मन्त्रः

देवस्यत्त्वा सवितुः प्प्रसवेश्विनोर्व्वाहुब्भ्याम्पूष्णणोहस्ताब्भ्याम् ।

अग्ग्नयेजुष्टद्गृह्णणाम्म्यग्ग्नषोमाब्भ्याञ्जुष्टङ्गृह्णणामि । शु.य.वे.अ. 1 मन्त्र. 10 ॥

पदपाठः

देवस्य । त्वा । सवितुः । प्रसवऽइतिप्र सवे । अश्विनोः । बाहुब्भ्यामितिबाहुभ्याम् । पूष्णः । हस्ताब्भ्याम् ॥ अग्ग्नयौ जुष्टम् । गृह्णणामि । अग्ग्नीषोमाब्भ्याम् । जुष्टम् । गृह्णणामि ॥ 10॥

सरलार्थः – भगवतः भुवनदीपस्य सवितृदेवस्य अनुज्ञायाम् अहम् अध्वर्युः अश्विनीकुमारयोः बाहुभ्यां तथा पूष्णः हस्ताभ्यां हे हविः ! तव ग्रहणं करोमि । अग्निदेवस्य कृते प्रसन्नो भूत्वा अहं हविषः ग्रहणं करोमि । अग्निसोमाभ्यां प्रियस्य तव हविषः ग्रहणं करोमि ॥ 10॥

मन्त्रः

भूतायत्त्वानारातयेस्वरभिविक्ख्यैषन्दृध् हन्तान्दुष्षाः पृथिव्यामुर्व्वन्तरिक्षमन्नवैमि

पृथिव्व्यास्त्वानाभौसादयाम्मयदित्त्याऽ उपस्थेग्ग्नेहव्वयध् रक्ष ॥ शु.य.वे.अ. 1 मन्त्र 11 ॥

पदपाठः

भूताय । त्वा । न अरातये । स्वः । अभिविक्ख्येषुमित्त्यैभिव्विकख्यैषम् । ह ध हन्ताम् । दुर्ष्याः । पृथिव्व्याम् । उरु । अन्तरिक्षम् । अनु । एमि । पृथिव्याः । त्वा । नाभौ । सादयामि । अदित्याः । उपस्थऽइत्त्युपस्थे । अग्ग्ने । हृदयम् । रक्ष ॥11॥

सरलार्थः – हविर्धानस्यशकटे हे शेषाः व्रीहयः यवादयः ! शोभनायां भूमौ वपनाय अहम् अस्मिन् शकटे शेषान् व्रीहीन् यवादींश्च स्थापयामि । दानाय अहम् अवशिष्टान् स्थापयामि । स्वः नाम यज्ञरूपम् आदित्यरूपं च पूर्वं त्वां पश्यामि । अस्यां पृथिव्याम् उपरि सर्वेषु ग्रहेषु दृढाः भवेयुः । अहमपि विस्तृते सर्वस्मिन् व्याप्ते च अन्तरिक्षे च त्वां प्राप्नोमि । हे गृहीतहविः ? अहं त्वाम् अस्याः पृथिव्याः केन्द्रभूतायां नाभौ वा वेद्याः उपरि निवेदयामि, अदितेः क्रोडे स्थित हे अग्ने ? त्वाम् एषु हवनीययोग्येषु व्रीहिषु यवादिषु च रक्षितं करोमि ॥ 11॥

मन्त्रः

पवित्रेस्थोव्वैष्णव्व्यौसवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेणपवित्रेण सूर्य्यस्यरश्मिम्भिः ।
देवीरापोऽअग्ग्रेगुवोऽ अग्ग्रेपुवोग्ग्रऽइममद्ययज्ञन्नयताग्ग्रेयज्ञपतिध सुधातुँय्यज्ञपतिन्देवयुवम् ॥

शु.य.वे.अ.1 मन्त्रः 12 ॥

पदपाठः

पवित्रेऽइतिपवित्रे । स्थः । वैष्णव्यौ । सवितुः । व्वः । प्रसवऽ इतिप्र सवे । उत् । पुनामि । अच्छिद्रेण । पवित्रेण । सूर्य्यस्य । रश्मिम्भिरितिरश्मि भिः ॥ देवीः । आपः । अग्ग्रेगुवऽत्त्यग्ग्रेइ गुवः । अग्ग्रेयुवऽ इत्त्यग्ग्रे प्रवः । अग्ग्रे । इमम् । अद्य । यज्ञम् । नयत । अग्ग्रे । यज्ञपतिमितियज्ञपतिम् । सुधातुमितिसुधातुम् । यज्ञपतिमितियज्ञपतिम् । देवयुवमिति देव युवम् ॥12॥

सरलार्थः – हे कुशद्वय ! त्वं पवित्रस्य कारकमसि, त्वं विष्णुस्वरुपं यज्ञमयं सम्बन्धि वर्तसे । हे जनाः ! भगवतः सवितृदेवस्य अनुज्ञायां वर्तमानाः वयं त्वाम् अच्छिद्रकपवित्रेण पवित्री कुर्वन्तः स्मः । हे द्योतमानानानि मलानि ! यूयं सर्वे आगच्छत समुत्रं प्रति गमनशीलानि तथा ततोऽग्रे सोमरसस्य पानकारकाणि स्थ । अस्मिन् दिवसे अस्माभिः कृतं दर्शपूर्णमासनामकं यज्ञं सफलीकुरुत, तथा च सुष्ठुतया दक्षिणादातृभ्यः यज्ञस्य्, स्वामिभ्यः तथा देवकामाय यज्ञस्य यजमानाय स्वर्गे स्थानं ददतु ॥12॥

॥ मन्त्रः ॥

षुष्म्माऽ इन्द्रोवृणीतव्वत्रतूर्य्येषुयमिन्द्रमवृणीद्ध्वंव्वृत्रतूर्य्येर्ष्ये प्प्रोक्षितास्स्थ ।
अग्ग्नयैत्त्वाजुष्ट्टम्प्रोक्षाम्म्यग्ग्नीषोमाब्भ्या न्त्वाजुष्ट्टम्प्रोक्षामि ॥
दैव्व्यायकर्म्मणेशुन्धध्द्वन्देवयज्ज्यायैषट्टोशुद्धः पराजग्घ्नुरिदंव्वस्तच्छुन्धामि ॥

शु.य.वे.अ. 1 मंत्र 13॥

पदपाठः

षुम्माः । इन्द्रः । अवृणीत । व्वृत्रतूर्ष्ये इति वृत्र तूर्ष्ये । षुयम् । इन्द्रम् । अवृणीद्ध्वम् । व्वृत्रतूर्ष्ऽ इति वृत्र तूर्ष्ये । प्रोक्षिताऽ 3तिप्र उक्षिताः । स्थ । अग्ग्नयै । त्वा । जुष्टम् । प्र । उक्षामि । अग्ग्नीषोमाब्भ्याम् ।। दैध्याय । कर्म्मणे । शुन्धद्ध्वम् । देवयज्ज्यायाऽ इतिदेव परा जग्हनुः । इदम् । व्वः । तत् । शुन्धामि ॥ 13॥

सरलार्थः – हे जलानि ! वृत्रासुरस्य वधे स्वर्गराजेन इन्द्रेण वृतानि स्वीकृतानि सन्ति । पुनः अद्य वृत्रासुरस्य वधनिमित्ताय इन्द्रं वृणीत । हे जलानि ! यूयं प्रोक्षितानि सन्तः कुशानामपि प्रोक्षणं कुरुत । हे हविः ! अग्निदेवाय त्वं प्रसन्नीभूय हविः प्रोक्षितं करोमि । अग्नये सोमाय च प्रसन्नो भूत्वा यज्ञीयं हविः कुशैः प्रमार्ज्मि । देवानां कृते कृतानि सर्वाणि कर्माणि यज्ञाय शुद्धानि भवन्तु । देवानां पूजानार्थाः हे तण्डुलादयः ! भवतां समेषां भागानां स्पर्शेन अशुद्धान् कुर्वन्तः दासादयः । देवान् निवेदयन्तः आसन्, तस्मिन् समये अपवित्राः, कृताः । अनेन प्रकारेण सर्वान् भागान् अस्मिन् काले अहं दर्भपवित्रजलेन सम्प्रोक्ष्य पवित्रीकरोमि ॥ 13॥

मन्त्रः

शर्म्मास्यवधूतꣳ रक्षोवधूताऽअरातयोदित्यास्त्वगसिप्रति त्वादितिर्व्वेत्तु ।

अद्रिरसिव्वानस्प्पत्त्योग्रावासिपृथुबुध्नꣳ प्रतित्वादित्यास्त्वग्ग्वेत्तु ॥

शु.य.वे.अ. 1 मन्त्र. 14 ॥

पदपाठः

शर्म्म । असि । अवधूतमित्त्यवधूतम् । रक्षः । अवधूताऽइत्त्यवधूताः । अरातयः । अदित्त्याः । त्वक् । असि । प्रति । त्त्वा । अदितिः । व्वेषु । अद्रिः । असि । व्वानस्प्पत्त्यः । ग्रावा । असि । पृथुबुद्ध्नऽ इतिपृथुबुद्ध्नः । प्रति । त्वा । अदित्याः । त्वकाव्वेतु ॥ 14॥

सरलार्थः – हे चर्म ! त्वं चर्मरूपं वर्तसे । अस्माभिः अवधूतेन सर्वे दुष्टकारकाः राक्षसाः अस्मिन् यज्ञे नागच्छन्ति तथा अदातारः जना अपि एतस्माद् यज्ञस्थानाद् अपसर्पन्तु । हे चर्म ! त्वं कश्यपस्य पत्न्याः अदितेः स्वरूपमसि । अनेन कारणेन पृथ्वी स्वयमेव स्वत्वं मन्यते । हे उलूखल ! त्वं पाषाणेन निर्मितो वर्तसे । काष्ठेन निर्मितस्य मूसलस्य सङ्गिनी त्वं पाषाणमयी वर्तसे । पृथिव्याः त्वचामयं कृष्णाजिनमपि त्वां जानातु ॥ 14॥

मन्त्रः

अग्ग्नेस्तनूरसिव्वाचोव्विसर्ज्जनन्देववीतयेत्त्वागृहण्णामिबृह-दृग्रावासिव्वासिव्वानस्प्यत्यः सऽइदन्देवेब्भ्यो हविः शमीष्व्वसुशमिशमीष्व्व । हविष्क्कृदेहिहविष्क्कृदेहि ॥

शु.य.वे.अ. 1 मन्त्र 15 ॥

पदपाठः

अग्ग्नेः । तनूः । असि । व्वाचः । व्विसर्ज्जनमितिवि सर्ज्जनम् । देववीतयऽइतिदेव व्वीतये । त्वा । गृहण्णामि । बृहद्ग्रावेतिबृहत् ग्रावा । असि । व्वानस्प्पत्त्यः सः । इदम् । देवेब्भ्यः । हविः । शमीष्व्व । शमिष्व्वेतिशमिष्व्व । सुशमीतिसु शमी । शमीष्व्व । शमिष्षवेतिशमिष्षव । हविष्कृत् । हविः कृदितिहविः कृत् । आ । इहि ॥ 15 ॥

सरलार्थः – हे तण्डूलहविः ! त्वम् आहवनीयाग्नेः शरीरम् असि । सर्वेषां मन्त्राणां विसर्जने त्यागरूपं वर्तसे । त्वं मन्त्राणां पठनं कृत्वा अग्निदेवस्य कृते त्यागो भवति । अथवा यज्ञकुण्डे हविषां प्रक्षेपेण तेषां सदेवतानां मन्त्राणां यज्ञस्य कृते अहं तव ग्रहणं करोमि । हे मूसल ! त्वं काष्ठेन निर्मितः पाषाणेन कठोरः वर्तते । सः त्वं देवानां कृते इदं तण्डूल हविः सिद्धं याति । हे हविः संस्कारक ! आगच्छतु हे हविः संस्कारक ! आगच्छतु ॥ 15 ॥

शब्दार्थ :

श्रेष्ठतमाय - उत्तमाय । **अयक्ष्माः** - क्षयरोगरहितः । **प्रार्पयतु** - संयोजयतु । **ध्रुवाः** - नित्याः । **विश्वधाः** - विश्वधारकः । **द्यौः** - स्वर्गः । **मातरश्विनः** - वायुदेवस्य । **परमेण** - श्रेष्ठेन । **सहसुधारम** - ब्रह्माण्डधारकम् **वसोः** - यज्ञस्य । **काम्** - वेदवाणीम् । **शतधारम्** - शतधारकम् । **विश्वायुः** - आयुष्यप्रदाता । **विश्वकर्मा** - विश्वं कर्म यस्यपतेसः । **पवित्रेण** - वेदज्ञानेन । **विश्वधायाः** - वेदज्ञानस्य । **हे व्रतपते** - हे धमस्यपालकः । **अनृतात्** - असत्यात् । **उपैमि** - अनुष्ठानं करोमि । **राध्यताम्** - सिद्धं करोतु । **त्वाम्** - वेदाध्यायिनम् । **सः** - भगवान् नारायणः । **वेषाय** - विद्याप्राप्तये । **कस्मै** - प्रयोजनाय । **रक्षः** - गुणरहितः । **अरातयः** - दयारहिताः **प्रत्युष्ठाः** - निलयामि । **अन्वेमि** - प्राप्नोमि । **धूः** - सर्वेषां रक्षकः । **पप्रितमम्** - सर्वविद्यादातारम् वेद । **यम्** - पापिनम् । **धूवामः** - दु:खं यच्छामः । **अह्रुतम्** - कुटिलतारहितम् । **हविर्धानम्** - हविषाम् आधारः यज्ञः । **उरुवाताय** - वायोः शुद्धये । **दृंहस्व** - वर्धस्व । **प्रसवे** - रचिते संसारे । **पूष्णः** - सूर्यस्य । **जुष्टम्** - इष्टम् । **गृह्णामि** - स्वीकरोमि । **भूताय** - जीवाय । **दृंहन्दाम्** - वर्धन्ताम् । **नाभौ** - मध्ये । **सादयामि** - स्थापयानि । **सवितुः** - ईश्वरस्य । **अच्छिद्रेण** - दोष रहिततेन । **यज्ञपतिम्** - यज्ञस्य कर्तारम् । **उत्पुनामि** - पवित्री करोमि । **वृत्रतूर्ये** - मेघानां वधाय। **देवयज्यायै** - देवानां यज्यायै क्रियायै । **शुन्धध्वम्** - शुद्धं कुरुत । **शुन्धामि** - शोभनतया वृद्धिं करोमि । **शर्म** - सुजम् । **त्वक्** - त्वचा । **पृथुबुध्नः** - अन्तरिक्षे निवासि । **प्रतिवेत्तु** - प्रतिजानातु । **बृहदग्रावा** - महापाषाणः । **शमीष्व** - शुद्धं कुरु । **वानस्पत्यः** - काष्ठादिपदार्थः । **प्रतिगृह्णामि** - प्रतिग्रहं करोमि ।

स्वाध्यायः

1. प्रदत्तेषु विकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) सर्वस्य ज्ञानस्य ज्ञानराशिः वर्तते .... ।

(क) वेदः (ख) साहित्यम् (ग) व्याकरणम् (घ) ज्योतिषम्

(2) अस्मिन् पाठे कति मन्त्राः सन्ति ?

(क) 15 (ख) 16 (ग) 17 (घ) 10

(3) कस्य नित्यम् अनुष्ठानं कर्तव्यम् ?

(क) अध्ययनस्य (ख) श्लोकस्य (ग) यज्ञस्य (घ) मन्त्रस्य

(4) पशूनां रक्षणं कस्मिन् मन्त्रे वर्तते ?

(क) 84 (ख) 2 (ग) 1 (घ) 5

(5) ''हव्यम्'' इति शब्दस्य अर्थो भवति ।

(क) परिधयः (ख) यज्ञकुण्डः (ग) हवनीयः (घ) पञ्चपात्रम्

(6) ईश्वरः कानि कर्माणि कर्तुम् आज्ञापयति ।

(क) अशूभानि (ख) दु:खदानि (ग) शुभानि (घ) नाशकानि

(7) कः मनुष्यः मनुष्येभ्यः दु:खं ददाति ?

(क) पार्थी (ख) तपस्वी (ग) ज्ञानी (घ) दृषी

(8) कः देवः सर्वसंसारस्य प्रकाशको वर्तते ?

(क) इन्द्रः (ख) अग्निः (ग) सूर्यः (घ) विष्णुः

(9) दिव्यगुणयुक्तं किमस्ति ?

(क) दुग्धम् (ख) जलम् (ग) तक्रम् (घ) धृतम्

(10) जलनाशे कस्य नाशो भवति ?

(क) नगरस्य (ख) ग्रामस्य (ग) जीवस्य (घ) महानगरस्य

2. निम्नाङ्कितानाम् एकवाक्येन उत्तराणि लिखतु ।

(1) वैयाकरणाः वेदपदस्य कया रीत्या व्युत्पत्तिं कुर्वन्ति ?

(2) कीदृशाः पशवः जीवानां नाशाय समर्था भवन्ति ?

(3) कया नैकेषां गुणानां प्राप्तिर्भवति ?

(4) वाणी कीदृशी वर्तते ?

(5) शुभगुणानां प्रकटनाय ईश्वरः काम् आज्ञां ददाति ?

(6) सर्वस्य दोषस्य नाशकः को वर्तते ?

(7) सर्वसंसारस्य सुखदाता को वर्तते ?

(8) केन प्राणाः पवित्रिताः भवन्ति ?

(9) केन मनुष्याः शुद्धां वाणीं प्राप्नुवन्ति ?

(10) जलं जीवानां कृते कीदृशम् अस्ति ?

3. निम्नाङ्कितानां मन्त्राणां भावार्थं लिखतु ।

(1) वसोः पवित्रमसिशतधारं व्वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वासवितापुनातुव्वसोः पवित्रेणशतधारेणसुप्वाकामधुक्षः ॥

शु-य-वे-अ. 1 मन्त्र. 3.॥

(2) भूतायत्त्वा नारातये स्वरभिविकख्येषन्द ६ हन्तान्दुर्य्याः
पृथिव्व्यामुर्व्वन्तरिक्षमन्नवेमि पृथिव्व्यास्त्वा नाभौसादयाम्मय दित्याऽउपस्थेग्गने हव्व्य ६ रक्ष ॥

शु.य.वे.अ.1.मन्त्र-11 ॥

(3) युष्माऽ इन्द्रोवृणीतवृत्रतुर्य्येषूयमिन्द्रमषूणीद्ध्वं वृत्रतुर्य्येप्रोक्षि तास्स्थ ।
अग्गनयेत्वा जुष्टम्प्रोक्षाम्म्यग्गनीषो माबभ्यान्त्वा जुष्टुष्टम्प्रोक्षामि ।
दैव्व्यायकर्म्मणेशुन्धदद्धन्देवयज्जयायै येषद्वोशुद्धाः पराजग्नुरिदंव्वस्तच्छुन्धामि ॥

शु.य.वे.अ.1.मं.13 ॥

4. निम्नलिखित मन्त्राणां पूर्तिः विधेया ॥

(1) साव्विश्वायुः साविश्त्व .... हव्व्य ६ रक्ष ॥

(2) देवस्यत्वासवितुः .... ञ्जुष्टङ्गृहण्णामि ॥

(3) अग्गनेस्तनूरसि .... हविष्कृदेहि ॥

5. निम्नाङ्कित शब्द-रूपाणां परिचयं यच्छत ।

(1) सविता (2) वसो: (3) शतधारेण (4) विश्वकर्मा (5) व्रतपते (6) देवानाम् (7) वैष्णव्यौ (8) यज्ञपतिम् (9) दैव्याया (10) वाच: ।

6. निम्नाङ्किकतानां धातुरुपाणां परिचयं यच्छत ।

(1) राध्यताम् (2) युनक्ति (3) धूर्वाम: (4) यच्छन्ताम् (5) शुन्धामि (6) प्रोक्षामि (7) शमीष्व (8) गृह्णामि (9) सादयामि (10) उत्पुनामि

7. सन्धिविच्छेद करोतु ।

(1) प्रजावतीरनमीवा (2) वस्तेन (3) द्यौरसि (4) पवित्रमसि (5) इदमहम् (6) कस्त्वा (7) देवीराप: (8) यूयमिन्द्रम् (9) वस्तच्छुन्धामि (10) तनूरसि

8. सन्धि योजनं कुरुत ।

(1) त्वा + ऊर्ज्जे (2) घर्म + असि (3) सोमेन + आतनच्मि (4) प्रत्युष्टम् + रक्ष: (5) प्रसवे + अश्विनौ (6) पराजग्ध्नु: + इदम् (7) अद्रि: + असि (8) उत्पुनामि + अच्छिद्रेण (9) हव्यम् + रक्ष (10) अग्ने: + तनू:

छात्रप्रवृत्ति:

''जलनाशे जीवनाश:'' एतादृशीं सूक्तिं प्रदाय जलस्य महत्त्वं कथयतु ।

विशिष्टज्ञानम्

सत्तायां विद्यते ज्ञाने -
वेत्ति विन्ते विचारणे ।
विन्दते विन्दति प्राप्तौ -
श्यन्लुक्श्नम्शेष्विदं क्रमात् ॥

●

8 शुक्लयजुर्वेदे प्रथमोऽध्यायः (माध्यन्दिनीय) भाग-2

प्रस्तावना

शुक्लयजुर्वेदे प्रथमाध्यायस्य अस्मिन् द्वितीये भागे अन्नस्य पर्यावरणस्य च विशेषेण महत्त्वं प्रतिपादितमस्ति । कथं यद्-अन्नादः पुरुषः स्मृतः अन्नेन जातानि जीवन्ति, इत्थं मन्त्रेषु अन्नस्य महत्त्वं प्रदाय पर्यावरणस्य महत्त्वं प्रदत्तमस्ति यद्-जलमेव जीवनम्, जलनाशे जीवनाशः इत्थं पर्यावरणस्य महत्त्वं प्रदाय जीवानां कृते तत्रापि सर्वेषां मानवानां कृते वृक्षाः मित्रस्वरुपाः सन्ति । वृक्षस्य काष्ठेन एव यज्ञसाधनानि भवितुम् अर्हन्ति, तैः काष्ठैः यजनं विधाय प्रीताः देवाः मानवानां कृते वर्षां कुर्वन्ति । इत्थं सर्वे विद्यार्थिनः अन्नस्य महत्त्वम्, वृक्षाणां छेदनेन जीवानामपि नाशो भवति, इत्थं वृक्षाणां महत्त्वं प्रदाय सर्वेषां हवनीय द्रव्याणां कूटनविधिः, कपालविधिः इत्थं हविः कूटकपालादीनां विधिनां महत्त्वं प्रतिपादितमस्ति, तेषां सर्वेषां हविर्द्रव्याणां महत्त्वम् उपयोगं च सर्वे विद्यार्थिनः जानीयुः तथा च अस्मिन् पाठे प्रदतेषु मन्त्रेषु स्वयं भगवान् उपदेशम् अस्मभ्यं प्रददाति यत्-को नाम यज्ञः ? यज्ञस्य कीदृशं स्वरुपम् ? अयमेव यज्ञशब्दो देवपूजार्थकाद् संगतीकारकाद् दानार्थकाद् ''यज्'' इति धातोः निष्पन्नो भवति । एतादृशे ''यज्'' इति धातोः निष्पन्ने यज्ञशब्दस्वरुपे यज्ञनारायणे प्रदीप्तः अग्निः कानि कानि हविर्द्रव्याणि गृह्णाति केन हविर्द्रव्येण अग्निः यजमानाय किं किं फलं प्रददाति ? इत्येतत्सर्वं मन्त्रेषु वर्णनमायाति । इति उद्देशेन अस्मिन् पाठे षोडशमन्त्राद् आरभ्य एकत्रिंशन्मन्त्रपर्यन्ताः प्रस्तूयन्ते ।

स्वाध्याययज्ञपात्रचित्राणि

मन्त्रः

कुक्कुटोसिमधुजिहव्वऽइषमूर्ज्जमावदत्त्वयाव्वयꣳ सउघातꣳ सहघात ञ्जेष्म्मव्वर्षवृद्धमसिप्प्रतित्वा-वर्षवृद्धंव्वेत्तुपरापूतꣳ रक्षꣳ परापूताऽ अरातयोपहतꣳ रक्षोव्वायुर्व्वोव्विविजक्तुदेवावः सविता हिरण्यपाणिꣳ प्प्रतिगृभ्ण्णात्त्वच्छिद्रेणपाणिना ॥

शु. य. अ. 1 मन्त्र 16 ॥

पदपाठः

कुक्कुटः असि । मधुजिह्वऽइतिमधु जिह्वः । इषम् । ऊर्ज्जम् । आ । व्वद । त्वया । व्वयम् । सङ्घातꣳ सङ्घातमिति सङ्घातम् । जेष्म्म । व्वर्षवृद्द्धमितिवर्षद्द्धम । असि । प्रति । त्वा । व्वर्षवृद्द्धमितिव्वर्ष वृद्द्धम् । व्वेत्तु । परापूतमितिपरा

पूतम् । रक्षः । परापूताऽइति परा पूताः । अरातयः । अपहतमित्यपहतम् ? रक्षः । वायुः । वः । वि । विनक्तु । देवुः । वः । सविता । हिरण्यपाणिरिति हिरण्यपाणिः । प्रति । गृभ्भणातु । अच्छिद्रेण । पाणिना ॥ 16 ॥

सरलार्थः – हे कुक्कुट ! त्वं कुक्कुटो वर्तसे, त्वं मधुरया, जिह्वया युतः असि कथं यत् सर्वेभ्यः प्रातःकालीनां सूचनां त्वं ददासि, तं ध्वनिं श्रुत्वा नक्तञ्चराः राक्षसादयः दूरी भवन्ति, उपासकाः तपस्विनः जाग्रति, अतः हे कुक्कुट ! त्वम् अस्मान् अद्य वर्षायाः अन्नस्य च कथनं कुरु, त्वया प्रबुद्धाः वयं राक्षसानां समूहं पराजयामहे । हे सूर्य ! त्वं वर्षया वर्धितो वर्तसे अतो वर्षया वर्धितान् तण्डुलान् स्वजनं कुरु त्वया शुद्धीकृतैः तण्डुलैः यज्ञो भविष्यति, अनेन यज्ञेन इन्द्रादयो देवाः प्रीताः भविष्यन्ति ते प्रसन्नाः देवाः राक्षसानाम् अपसरणं करिष्यन्ति, तान् शुद्रान् अक्षतान् हिरणयपाणिः सूर्यः अच्छिद्रेण हस्तेन स्वीकरोतु ॥ 16 ॥

मन्त्रः

धृष्टिरस्यपाग्ग्नेऽ अग्ग्निमामादञ्जहिनिष्क्रव्व्यादिँ सेधादेवयजंव्वह ।

ध्रुवमसि पृथिवीन्द्रँ हब्ब्रह्मम्वनित्वाक्षत्रवनिसजातन्युर्यदया मिब्भ्रातृव्व्यस्य व्वधाय ।।

शु. य. वे. अ. 1. मन्त्र 17 ॥

पदपाठः

धृष्टिः । असि । अप । अग्ग्ने । अग्ग्निम् । आमादमित्याम अदम् । जहि । निः । क्रव्व्यादमितिक्कव्व्य अदम् । सेध । आ । देवयजमितिदेवयजम् । व्वह । ध्रुवम् । असि । पृथिवीम् । दृँ ह । ब्रहममवनीतिब्रह्म व्वनि । त्वा । क्षत्रव्वनीतिक्षत्रव्वनि । सजातवनीतिसजातव्वनी । उप । दधामि । भातृव्व्यस्य । व्वधाय ॥ 17 ॥

सरलार्थः – हे पलाश ! प्रज्वलितानि काष्ठानि चालयितुं त्वं पूर्णः प्रगल्भो वर्तसे । हे गार्हपत्याग्ने ! त्वम् अपक्वस्य अन्नस्य पाचने अग्निं पृथक्कृत्य मृतस्य शरीरस्य मांसादिकं प्रज्वालकं क्रव्यम् (अपक्वम्) अत्ति इति क्रव्याद्, तम् अग्निम् अपवर्जं, परन्तु येषां देवानां मननम् उपयुक्तं हवनीयम् अग्निम् आनय हे कपाल ! त्वम् अतिशयितो दृढो वर्तसे, त्वं पृथ्वीं दृढां कुरु । ब्राह्मणैः सम्प्राप्त ! हे कपाल ! क्षत्रियैः वा यजमानैः सम्प्राप्त । हे कपाल ! स्वशत्रूणां वधाय अहं प्रज्वलितानि काष्ठानि दधामि ॥ 17 ॥

मन्त्रः

अग्ग्नेब्रहम्म ।

गृब्भणीष्ष्वधरुणमस्यन्तरिक्षन्द्रँ हव्व्रहम्मवनित्वाक्षत्रवनिसजातवन्युपदधामिष्भ्रातृव्व्यस्यव्वधाय ।

व्विश्वाब्भ्यस्त्वाशाब्भ्यऽउपदाधामिचितस्त्योर्द्धचितोभृगूणामङिगरसान्तपसातप्प्यद्ध्वम् ॥

शु. य. वे. अ – 1 मन्त्र. 18 ॥

पदपाठः

अग्ग्ने । ब्रहम । गृब्भणीष्व । धरुणम् । अन्तरिक्षम । धर्त्रम् । दिवम् । विश्वाब्भ्यः । त्वा । आशाब्भयः । उप । दधामि । चितः । स्य । ऊर्द्ध्वचितऽइत्यूर्ध्वचितः । भृगूणाम् । अङ्गिरसाम् । तपसा । तप्प्यद्ध्वम् ॥ 18 ॥

सरलार्थः – हे अग्ने ! त्वं पुरोडाशस्य अन्नस्य संस्कारकं कपालं स्वशिरसि धारय, हे कपाल ! त्वं पुरोडाशस्य धारकोऽसि, त्वम् अन्तरिक्षं दृढं कुरु । ब्राह्मणद्वारा वरणीयः क्षत्रियैः वरणीयः यजमानेन वरणीयः त्वं कपालं शत्रूणां वधाय, अग्नेः उपरि धारय । हे अन्ये कपालाः यूयं पुरोडाशस्य धारकाः इमं द्युलोकं दृढं कुरुत । ब्राहमणैः क्षत्रियैः यजमानैश्च वरणीयः त्वं द्वितीयं तृतीयं च कपालम् अग्नौ शत्रूणां वधाय विजयाय अहं त्वाम् अग्नेः उपरि धारयामि । हे कपालाः अनेन प्रकारेण सर्वे प्रतप्ताः भूत्वा भृगूणाम् अङ्गिरसाम् ऋषीणां तपसा यूयं तप्यध्वम् ॥ 19 ॥

मन्त्रः

शर्म्मास्यवधूत रक्षोवधूताड अरातमोदित्तयास्त्वगसिप्प्रतित्वादितिर्व्वेतु ।

धिषणा सिपर्व्वतीप्प्रतित्वादित्यास्त्वग्वेत्तु दिवस्क्कम्भनीरसिधिषणासिपार्व्वतेयीप्प्रतित्वापर्व्वतीर्व्वेतु ॥

शु. य. वे. अ. 1 मन्त्र - 19 ॥

पदपाठः

धिषणा । असि । पर्व्वती । प्रति । त्वा । अदित्याः । त्वक् । व्वेतु । दिवः । स्कम्मभनीः । अस्ति । धिषणा । असि । पार्व्वतेयी । प्रति । त्वा । पर्व्वती । व्वेतु ॥ 19 ॥

सरलार्थः - हे चर्म ! त्वं कृष्णाजिनम् असि । तव धारणेन राक्षसा अपि अपसारिता भवन्ति । हे कृष्णाजिन ! त्वं सर्वस्याः पृथिव्याः त्वक् समानम् असि । हे सिले ! त्वं घर्षिका वर्तसे, पाषाणेन संभूता त्वम् असि, अतः हे शय्ये ! त्वं द्युलोकस्य स्कम्भनीः असि । हे लोहके ! त्वं घर्षिका असि, कथं यत् त्वं शिलायाः पुत्री वर्तसे, अनेन कारणेन शिलाः त्वां स्वकीयां जानीयुः ॥ 19 ॥

मन्त्रः

धान्यमसि । धिनुहिदेवान्प्राणायत्त्वोदानायत्त्वाव्व्यानायत्त्वा ।

दीग्धामनुप्प्रसितिमायुषेधान्देवोवः सविताहिरण्णयपाणिः प्प्रतिगृब्भ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्त्वा महीनापयोसि ॥

शु. य. वे. अ. 1. मन्त्र. 20 ॥

पदपाठः

धान्यम् । असि । धिनुहि । देवान् । प्राणाय । त्वा । उदानायेत्युत् आनाय । ह्यानायेतिवि आनाय दीर्घाम् । अनु । प्रसितिमितप्रसितिम् । आयुषे । धाम् । चक्षुषे । त्वा । महीनाम् । पयः । असि ॥ 20 ॥

सरलार्थः - हे तण्डुल ! त्वं पोषणयुक्तं धान्यम् असि । त्वं देवानामपि पोषणं करोषि, अहं तुभ्यं प्राणानां कृते पेषणं करोमि उदानवायुः दानाय ततो व्यानवायुः प्रदानाय च तव पेषणं करोमि । हे तण्डुलाः ! अहं त्वाम् आयुर्वृद्धये महति कृष्णाजिने । स्वर्णहस्तः सूर्यदेवः त्वां स्वस्य अच्छिद्रहस्तेन ग्रहणं कुरु हे घृत ! महतीनां धेनूनां दुग्धेन समन्वितं धृतमस्ति ।। 20 ॥

मन्त्रः

देवस्यत्वा सवितुः प्प्रसवेॅशिवनोब्बाहुबभ्यांम्पूषण्णोहस्ताब्भ्याम् ।

संव्वपामिसमापऽओषधीभिः समोषधयोरसेन ।

स ६ रेवतीर्ज्जगतीभिः पृच्चयन्ताथ्व सम्मधुमतीर्म्मधुमतीभिः पृच्च्यन्ताम् ॥

॥ शु. य. वे. अ. 1 मन्त्र. 21 ॥

पदपाठः

सम । व्व्यामि । आपः । ओषधिभिः । ओषधयः । रसेन । रेवतीः । जगतीभिः । पृच्चयन्ताम् । मधुमतीरितिमधुमतीः। मधुमतीभिरिति मधु मतीभिः । पृच्चयन्ताम् ॥ 21 ॥

सरलार्थः - हे पिष्ट तण्डुल ! सूर्यदेवस्य अनुरुपम् अश्विनौ हस्ताभ्यां पूषन्देवस्य हस्ताभ्यां त्वां पूर्णरुपेण सम्मिश्रितं करोमि । इदं जलमपि ओषधीभिः सम्मिश्रितं भवतु, अतः पिष्टं तण्डुलम् औषधियुक्तं सङ्गतं भवतु, एवं मधुरं जलं मधुना रसेन ओषधीभिः सम्मिश्रितं सदा सर्वदा सर्वथा च भवतु ॥ 21 ॥

मन्त्रः

जनयत्त्यैत्त्वासँय्यौमीदमग्ग्नेरिदमग्ग्नीषोमयोरिषेत्त्वा धर्म्मोसिव्विश्श्वायुरुरुप्प्रथाऽउरुप्प्रथस्वोरुतेयज्ञपतिः
प्प्रथतामग्ग्निष्ट्टेत्त्वचम्माहिँः सीद्देवस्त्वासविताश्श्रपयतुव्वर्षिष्ठ्ठेणेधिनाके ॥

शु. य. वे. अ. 1. मन्त्र ॥ 22 ॥

पदपाठः

जनयत्त्यै । त्वा । सम् । यौमि । इदम् । अग्ग्नेः। इदम् । अग्गनीषोमयोः। इषे । त्वा । धर्म्मः । असि । धिश्श्वायुरितिविश्श्व आयुः। उरुप्प्रयाड इत्युरु प्रथाः । उरु । प्रथस्व । उरु । ते यज्ञपतिरितियज्ञ पतिः । प्रथताम् । अग्ग्रिः । ते । त्वचम् । मा । हिंसीत् । देवः । त्वा । सविता । श्रपयतु । व्वर्षिष्ठ्ठे । अधि । नाके ॥ 22 ॥

सरलार्थः - हे पिष्ट तण्डुल ! यजमानाय स्वर्गस्य प्राप्तये त्वां जलेन सम्मिश्रितं करोमि । इदं पिष्टं तण्डुलम् अग्निदेवस्य पुरोडाशो वर्तते तथा च सोमस्य पुरोडाशो वर्तते । अतः हे घृत ! अहं त्वां वर्षणनिमिताय तप्तं करोमि । हे पुरोडाश ! त्वं प्रवर्ग्यः असि । त्वं सर्वायुः वर्तसे त्वम् ऊरुविस्तारस्वभावः असि, अतः पूर्णरुपेण पूर्णतया वा विस्तारं प्राप्नुयात् । एवं तुभ्यं यज्ञपतिः पूर्णं विस्तारं दद्यात्, एवम् अग्निरपि तव त्वचं न दग्धीकरोतु, भगवान् सविता नाके नाम स्वर्गे श्रपयतु ॥ 22 ॥

मन्त्रः

माभेर्म्मासंव्विक्क्थाऽ अतमेरुर्यज्ञोतमेरुर्यजमानस्य ! प्प्रजाभूयात्रितायत्वाद्द्वितायत्वैकतायत्वा ॥

शु. य. वे. अ. 1. मन्त्र. 23 ॥

पदपाठः

मा । भेः । मा । व्विक्क्थाः । अतमेरुः । यज्ञः । अतमेरुः । यजमानस्य । प्रजेतिप्प्रजा । भूयात् । त्रिताय । त्वा । द्विताय । एकताय ॥ 23 ॥

सरलार्थः - हे पुरोडाश ! त्वं किञ्चिदपि भयं मा कुरु । त्वं कदाचिदपि विचलितो न भव । अयं यज्ञसाधनरूपी पुरोडाशः ऊष्णेन भस्मना आच्छादितोऽपि ग्लानिरहितो भव । हे प्रोक्षणजल ! त्रिताय द्विताय एकताय च तव ग्रहणं करोमि ॥ 23 ॥

मन्त्रः

देवस्यत्वा सवितुः प्प्रसवेश्श्वनोर्व्वाहुब्भ्याम्पूष्णोहस्ताब्भयाम् ।
आददेद्ध्वरकृतनदेवेब्भ्यऽइन्द्रस्यबाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाव्वायुरसितिग्ग्मतेजाद्विषतोव्वधः ॥

शु. य. वे. अ. 1. मन्त्र. 28 ॥

पदपाठः

आ । ददे । अध्वरकृतमित्यध्वर कृतम् । देवेब्भ्यः । इन्द्रस्य । बाहुः । असि । दक्षिणः । सहस्त्रभृष्टिरितिसहस्त्र भृष्टिः । शततेजाऽइतिशततेजाः । वायुः । अस्ति । तिग्ग्मतेजाड इति तिग्ग्मतेजाः । द्विषतः । व्वधः ॥ 28 ॥

सरलार्थः - हे स्फ्य ! (खड्गाकारस्य काष्ठस्य आकृतिः) भगवतः सूर्यस्य आज्ञया वर्तमानः अहं त्वां अश्विनौ बाहुभ्याम् एवं पूष्णोहस्ताभ्यां स्वीकरोमि । त्वं देवानां निमित्ताय यज्ञाय वेदीं कर्तुं समर्थः । त्वं इन्द्रस्य दक्षिणो बाहुः त्वं सहस्त्रधारः, शततेजाः, तीक्ष्णतेजाः वायुः, तस्य सदृशो त्वं वर्तसे । हे स्फ्य ! त्वं शत्रूणां वधाय सामर्थ्यवान् वर्तसे ॥ 24 ॥

मन्त्रः

पृथिविदेवयजन्यौषद्ध्यास्ते मूलम्माहिँ ६ सिषंव्व्रजङ्गच्छगोष्ठ्ठानंव्वर्षतुतेद्यौर्व्बधानदेवसवितः
परमस्याम्पृथिव्व्या ६ शेनपाशैर्ष्षोस्म्मानद्वेष्ट्टियञ्चव्वयन्द्विष्म्मस्तमतोमामौक् ॥

शु. म. वे. अ. 1. म. 25 ॥

पदपाठः

पृथिवि । देवयजनीतिदेव यजनि । ओषध्याः । ते । मूलम् । मा । हि ꣳसिषम् । व्व्रजम् । गच्छ । गोष्ठान् । गोस्थानमितिगो स्थानम् । व्वर्षतु । ते द्यौः बधान । देव । सवितरितिसवितः । परमस्याम् । पृथिव्वयाम् । शतेन । पाशैः । षः । अस्मान् द्वेष्टि । यम् । च व्वयम् । द्विष्मः । तम् । अतः । मा । मौक् ॥ 25 ॥

सरलार्थः – हे देवानां यजनस्य भूमि ? अहं तव ओषधीनां यज्ञाय ग्रहणं करिष्यामि । अहम् ओषधीनां मूलानां कर्तनं न करिष्यामि । स्फयेन छेदनार्था हे मृद् ? त्वं गवां स्थानं यत्र वर्तते तं गोशालं प्राप्नुहि, हे वेदि ! हे सूर्य ! अस्याः पृथ्व्याः अत्यन्ते निम्नतले विद्यमानस्य ''अन्धता मिस्रम्'' नामकस्य नरके त्वं नैकेषां बन्धनानां छेदनं करोतु । ये जनाः अस्माकं द्वेषं कुर्वन्ति तथा वयमपि येषां द्वेषं कुर्मः, तान् सर्वान् मोचनं मा करोतु ॥ 25 ॥

मन्त्रः

अपाररुम्पृथिव्यैदेवमजनाद्वद्वयासंव्व्रजउगच्छगोष्ठानंव्वर्षतुतेद्यौर्व्वधानदेवसवितः परमस्यम्पृथिव्वया
शतेनपाशैष्षोस्म्मान्द्वेष्टियश्चव्वयन्द्विष्मस्तमतोमामौक् ।
अररोदिवम्मापप्प्तोद्रप्प्सस्तेद्याम्मास्कन्व्रजउगच्छगोष्ठानंवर्षतुतेद्यौर्व्वधान
देवसवितः परमस्याम्पृथिव्वयाꣳ शतेनपाशैर्योस्म्मान्द्वेष्टियश्चव्वयन्द्विष्मस्तमतोमामौक् ॥

शु.य.वे.अ. 1 मन्त्र. 26 ॥

॥ पदपाठः ॥

अप । अररुम् । पृथिव्वयै । देवयजनादितिदेवयजनात् । व्वद्ध्यासम् । अररोऽइत्यररो । दिवम् । मा । पप्प्तः । द्रप्प्सः । ते । द्याम् । मा । स्कन् ॥ 26 ॥

सरलार्थः – देवानां यजनस्य भूमितः सुदूरं वयम् असुरदैत्यानाम् अपसारणंकुर्मः । हे मृत्तिके ! त्वमपि यत्र गावः निवसन्ति, तत्र गोशालायां गच्छ । हे वेदि ! त्वमपि भगवतः भास्करस्य उपरि वर्षणं कुरु । हे सवितः ! भवानपि अररुदैत्यादीनां सर्वेषां राक्षसानां पृथिव्याः निम्नतमे स्थले ''अन्धतामिस्रम्'' तन्नामके नरके असंख्यैः बन्धनं कृत्वा व्यापादयतु । एवं ये जीवाः अस्माकं द्वेषं कुर्वन्ति, तथा वयमपि येषां जीवानां द्वेषं कुर्मः, तान् अखिलान् जीवान् वध्नातु । हे अररुदैत्य ! त्वं द्युलोकम् आरोढुं न समर्थः । तव रक्तं वा वीर्यम् अस्मिन् लोके कदापि न पततु ॥ 26 ॥

मन्त्रः

गायत्रेणत्त्वाच्छन्दसापरिगृह्णामित्रैष्टुभेनत्त्वाच्छन्दसापरि गृह्णामिजागतेनत्वाच्छन्दसापरिगृह्णामि ।।
सुक्ष्माचासिशिवा चासिस्योनाचासुसिषदाचास्युर्ज्जस्वतीचासिपयस्वतीच ॥

शु.य.अ. 1 मन्त्र. 27 ॥

पदपाठः

गायत्रेण । त्वा । छन्दसा । परि । गृह्णामि । त्रैष्टुभेन । त्रैस्तुभेनेतित्रैस्तुभेन । जागतेन । सुक्ष्मा । च । असि । शिवा । च । असि । स्योना । सुषदा । सुसदेतिसुसदा । ऊर्ज्जस्वती । पयस्वती ॥ 27 ॥

सरलार्थः – पूर्वस्यां दिशि उपविश्य वेदिं खननाय पश्चिमायां दिशि, दक्षिणस्यां दिशि, एवम् उत्तरस्यां दिशि वेद्याः सदृश्याः आकृतिमत्यः तिस्रः रेखाः स्फयेन सेचनं कुर्वन् हे विष्णो ! अहं त्वां गायत्रीच्छन्दसा ग्रहणं करोमि । तथा त्रिष्टुप् छन्दसा अपि त्वां ग्रहणं कुर्वे, एवं जगतीच्छन्दसा भवतः विष्णोः ग्रहणमपि करोमि । हे वेदि भूमे ! त्वं सुशोभनावेदिभूमिः असि त्वं सुखस्वरूपा वा सुखस्वरुपिणी वर्तसे, अतः भवती आनन्देन निरन्तरम् उपवेष्टुं योग्या असि, भवती अन्नमयी जलमयी च सततं भवतु ॥ 27 ॥

मन्त्रः

पुराक्क्रूरस्य विसृपोविरप्पिशन्नुदादायपृथिवीञ्जीवदानुम् ।
यामैरयँश्चन्द्रमसिस्वधाभिस्तामुधीरसोऽ अनुदिश्य यजन्ते॥ प्रोक्षणीरासादयद्विषतोव्वधोसि ॥

शु. म. वे. अ. 1 मन्त्र 28 ॥

पदपाठः

पुरा । क्रूरस्य । विसृपऽइतिविसृपः । विरप्पिशन्नितिविरप्पिशन् । उदादायेत्युत् आदाय । पृथिवीम् । जीवदानुमितिजीव-दानुम् । षाम् । ऐरयन् । चन्द्रमसि । स्वधाभिः । ताम् । उँ॒ऽइत्यूँ । धीरासः । अनुदिश्येत्यनु दिश्य । यजन्ते ॥ प्रोक्षणीरितिप्र उक्षणीः । आ सादय । द्विषतः । व्वधः ।

सरलार्थः - हे महाविष्णो ! पूर्वस्मिन् काले देवासुराणां संग्रामात् पूर्वं सर्वैः स्वर्गनिवासिभिः देवैः सर्वेषां जीवानां जीवनदात्रीं भगवतीं पृथ्वीम् उत्थाप्य स्वधाभिः चन्द्रमसं प्रति प्रेरितः । तामेव यजमानस्य योग्याम् एवं चन्द्रस्थिताम् उद्दिश्य अद्यापि सर्वे वेदनिष्णाताः ऋत्विजः देवानां यजनं नित्यं कुर्वन्तः सन्ति । हे अग्नीध्र ! भवानपि प्रोक्षणयुक्तं योग्यं पवित्रं जलम् अस्याः यज्ञवेद्याः उपरि स्थापयतु । हे स्फय ! त्वं शत्रूणां वध्यो भव ॥ 28 ॥

॥ मन्त्रः ॥

प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयोनिष्टप्तꣳ रक्षोनिष्टप्ता ऽ अरातयः ।
अनिशितोसिसपत्नक्षिद्वाजिनन्त्वाव्वाजेद्ध्यायैसम्मार्ज्मि ।
प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽ अरातयोनिष्टप्तꣳ रक्षोनिष्टप्ताऽअरातयः ।
अनिशितासिसपत्नक्षिद्वाजिनीन्त्वाव्वाजेद्धायैसम्मार्ज्मि ॥

शु. य. वे. अ. 1 मन्त्र. 29 ॥

पदपाठः

अनिशितऽइत्यनिशितः । असि । सयत्नक्षिदिति सपत्नक्षित् । व्वाजिनम् । त्वा । व्वाजेद्धयायाऽइतिवाज इद्धायै । सम् । मार्ज्मि ॥ अनिशितेत्यानिशिता । असि । सपत्नक्षिदितिसपत्नक्षित् । व्वाजिनीम् । त्वा । व्वाजेद्धयायाऽइतिवाज इद्धयायै । सम् । मार्ज्मि ॥ 29 ॥

सरलार्थः - यज्ञस्य साधनभूतां स्त्रुवाम् उत्थाय तापयन्तीं कथयति यत्-सर्वे राक्षसाः प्रतिदग्धाः संजाताः सर्वे अदातारः जनाः प्रतिदग्धाः संजाताः । सर्वे राक्षसाः नितान्तं तप्ताः, अदातारः नितरां तप्ताः संजाताः । हे स्त्रक् ! त्वं यद्यपि तीक्ष्णीकृता न वर्तसे, तथापि दीप्तये प्रदीप्तये अहं शुद्धं करोमि । हे जुहूः ! अनेन सर्वे राक्षसाः प्रतिदग्धाः अभवन् । अदातारः सर्वे प्रतिदग्धाः संञ्जाताः सन्ति । राक्षसा अपि सर्वे नितान्तं तप्ता जाताः, तथैव सर्वे अदातृजनाः नितान्तं परितप्ताः सन्ति । हे जुहूः ! यद्यपि त्वम् अतिशयेन तीक्ष्णीकृता न वर्तसे तथापि शत्रूणां सर्वेषां छेदने समर्था त्वं वर्तसे एतावत् कारणेन अन्नवती हविः त्वं वर्तसे, अतः अन्नवतीं हविः त्वं यज्ञस्य दीप्तये प्रदीप्तये शुन्धामि ॥ 29 ॥

मन्त्रः

अदित्त्यैरास्नासिविष्णोर्व्वेष्प्योस्यूर्ज्जेत्त्वादब्धेनत्त्वाचक्षुषावपश्श्यामि ।
अग्नेर्जिह्वासिसुहूर्देवेभ्योधाम्नेधाम्नेमेभवयजुषे यजुषे ।

शु. य. वें. अ. 1 मन्त्र. 30 ॥

पदपाठः

अदित्त्यैः रास्ना । असि । विष्णोः व्वेष्पः । असि । उर्ज्जे । त्वा । अदब्बधेन । त्वा । चक्षुषा । अव । पश्श्यामि । अग्नेः । जिह्वा । असि । सुहूरितिसुहूः । देवेभ्यः । धाम्नेधाम्नऽइतिधाम्ने धाम्ने । मे । भव । यजुषेयजुषऽइतियजुषे यजुषे ॥ 30 ॥

सरलार्थः - मुञ्जेन त्रिरावृत्या रज्वा गार्हपत्याग्नेः दक्षिणस्य भागे उपविष्टां यजमानस्य पत्नीं बद्ध्वा हे रज्जुः ! त्वं समस्तायाः पृथ्व्याः बन्धिका रज्जुः वर्तसे । हे दक्षिणपाशः ! त्वम् यज्ञे वा यजनकर्मणि व्यापनशीलो असि । हे आज्य ! अहं त्वाम् अन्नस्य प्राप्तये अहिंसकाभ्यां नेत्राभ्यां पश्यामि । हे आज्य ! त्वम् अग्नेः रसना नाम जिह्वा असि, अतः त्वं देवानां सर्वेषां कृते द्योतको वर्तसे । हे आज्य ! त्वम् अपि मां यज्ञस्य निमित्ते स्थाने स्थाने प्राप्नुहि । अनेन कारणेन त्वं मां प्रति कस्मिन् यज्ञे प्राप्तं भवेः, अनेन प्रकारेण घृतस्य महत्त्वं यज्ञे प्रदत्तमस्ति ॥ 30 ॥

मन्त्रः

सवितुस्त्वा । प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिम्भिः ।
सवितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिम्भिः ।
तेजोसिशुक्क्रमस्यमृतमसिधामनामासिप्प्रियन्देवानामनाधृष्ट्टन्देवयजनमसि ॥

शु. य. वे. अ. 1 मन्त्र. 31 ॥

पदपाठः

सवितुः । त्वा । तेजः । असि । शुक्क्रम् । अमृतम् । धाम । नाम । प्रियम् देवानाम् । अनाधृष्टम् । देवयजन मितिदेव षजनम् । असि ॥ 31 ॥

सरलार्थः - हे आज्य ! अस्य भुवनत्रयस्य साक्षिभूतस्य भगवतः सूर्यस्य आज्ञायां वर्तमाने अहं त्वाम् अच्छिद्रे पावनपवने तथा च भगवतः भुवनभास्करस्य सूर्यस्य सहस्रकिरणैः त्वां पवित्रीकरोमि । हे प्रोक्षणानि जलानि ! भगवतः सूर्यस्य अनुज्ञायां वर्तमाने । अहं त्वां छिद्ररहितेन पवित्रकारिणा पवनेन तथा वासकस्य सूर्यस्य रश्मिभिः पवित्रं करोमि । हे घृत ! त्वं तेजः असि । बलवीर्यं च असि, एवं त्वम् अमृतं नाम अमरणरूपं हेतुत्त्वम् असि, अत्र सर्वेषां चित्तकृते धारणाय त्वं सदा सर्वदा सर्वथा च समर्थः असि । अनेन कारणेन वयं सर्वे नमनं कुर्मः । समेषां देवानां प्रियं त्वं यज्ञस्य साधनभूतम् अङ्गं वर्तसे ॥ 31 ॥

शब्दार्थः

हिरण्यपाणिः - सुवर्णहस्तः **आरातयः** - शत्रवः **पाणिना** - हस्तेन **जहि** - हिंसी **देवयजम्** - देवानां यजनम् **क्षत्रवनि** - राजा यजमानः **अवधूता** - दूरीभूताः **उपदधामि** - धारयामि **अन्तरिक्षम्** - आकाशः **धीः** - कर्मवुद्धिः **पार्वतेयी** - पर्वतस्य पुत्री **देवान्प्राणाय** - देवानां पोषणाय **मदीनांपयः** - गोदुग्धम् **अच्छिद्रेण** - स्वच्छेन **प्रसवे** - जन्मदाय **बाहुभ्याम्** - हस्ताभ्याम् **जगतीभिः** - ओषधिभिः **पृच्यन्ताम्** - मिश्रीकुर्वन्तु **जनयत्यै** - उत्पादनाय **संयौमि** - मिश्रीकरोमि **नाके** - स्वर्गे **मा** - भयं न कुरु **संविक्था** - विचलिताः मा भवत् **पूष्णः** - सूर्यस्य **बाहुरसि** - हस्तो वर्तसे **सहस्त्रष्टिः** - सहस्रधारः **द्विषतः** - द्वेषं कुर्वतः **गोष्ठानम्** - गोशाला **पाशैः** - बन्धनैः **मा हिंसिषम्** - ओषधीनां कर्तनं न कुरु **मा मौक्** - बन्धनान् मुक्तान् न करोतु **दिवं मा** - स्वर्गं मा ददातु **अस्मान् द्वेष्टिः** - अस्माभिः सह द्वेषं करोति **शिवा असि** - सुखरुपा वर्तसे **परिगृहणामि** - स्वीकारं करोमि **जागतेन** - जगतीच्छन्दस्व **ऊर्जस्वती** - सर्वशक्तिमती **पयस्वती** - जलस्यदात्री **क्रूरस्य** - दयाहीनस्य **जीवदातुम्** - जीवनस्य संप्रदात्री

स्वाध्यायः

1. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्त्वा उत्तरं लिखतु ।

(1) कपालः कस्य धारको वर्तते ?

(क) पुरोडाशस्य (ख) घृतस्य (ग) दुग्धस्य (घ) हुतद्रव्यस्य

(2) अग्नेः उपरि कथं धारयामि ?

(क) पराजयाय (ख) विजयाय (ग) स्वर्गाय (घ) नरकाय

(3) प्रज्वलितानि काष्ठानि कथं धारयति ?

(क) मित्रवधाय (ख) स्ववधाय (ग) शत्रुवधाय (घ) स्वजनवधाय

(4) पिष्टतण्डुलं जलेन मिश्रितं कथं करोति ?

(क) स्वर्ग प्राप्तये (ख) नरकार (ग) संसाराय (घ) जीवनाय

(5) पुरोडाशः केन आच्छादितो वर्तते ?

(क) भस्मना (ख) मृदा (ग) जलेन (घ) पयसा

(6) स्फ्य केषां निमित्ताय वेदीं कर्तुं समर्थः ?

(क) मानवानाम् (ख) देवानाम् (ग) पशूनाम (घ) पक्षिणाम्

(7) भगवान् भुवनभास्करः को वर्तते ?

(क) गणपतिः (ख) चन्द्रः (ग) सूर्यः (घ) इन्द्रः

(8) अन्धतामिसुं किमस्ति ?

(क) पातालः (ख) पृथिवी (ग) स्वर्ग (घ) नरकम्

(9) केन छन्दसा विष्णोः ग्रहणं करोति ?

(क) गायत्री (ख) अनुष्टुप् (ग) आर्या (घ) उपजातिः

(10) के जनाः प्रतिदग्धाः संजाताः ?

(क) दयालवः (ख) अदातारः (ग) दातारः (घ) सुन्दराः

2. निम्नाङ्कितानाम् एकवाक्येन उत्तराणि लिखतु ।

(1) कुक्कुटः कया जिह्वया युतो अस्ति ?
(2) प्रज्वलितानि काष्ठानि चालयितुं कः प्रगल्भो वर्तते ?
(3) सर्वस्याः पृथिव्याः त्वक्समानं किमस्ति ?
(4) जलं केन रसेन सम्मिश्रितं भवतु ?
(5) भगवतः सूर्यस्य आज्ञया कौ स्वीकरोमि ?
(6) केषां मूलानां कर्तनं वयं न करिष्यामः ?
(7) देवानां यजनस्य भूमितः केषाम् अपसरणं कुर्मः ?
(8) सर्वेषां जीवानां जीवनदात्री का वर्तते ?
(9) यज्ञस्य साधनभूतां काम् उत्थाप्य तापयन्तीं कथयति ?
(10) गार्हपत्याग्नेः दक्षिणभागे का उपविष्टा वर्तते ?

3. निम्नाङ्कितानां मन्त्राणां भावार्थं लिखतु ।

(1) शर्म्मास्यवधूतछंरक्षोवधूताः अरातयोदित्त्यास्त्वर्गसिप्प्रतित्त्वा दितिर्व्वेत्तु ।
धिषणासिपर्व्वतीप्प्रतित्त्वादित्यास्त्वग्गवेत्तुदिवस्क्कम्भनीरसिधिषणासियार्व्वतेयीप्प्रतित्त्वामर्व्वतीव्वेत्तु ॥

शु.य.वे.अ. 1 मन्त्र 19 ॥

(2) अपाररुम्पृथिव्व्यैदेवयजनाद्वद्ध्यासंव्रड्गाच्छगोष्ठानं वर्षतुते
धौर्व्वधानदेवसवितः परमस्याम्पृथिव्व्याः शतेन पाशैष्ष्योस्म्मा
न्द्वेष्ट्टिषञ्चव्वयन्द्विष्म्मस्तमतोमामौक् ॥ अररोदिवम्मापप्तो-
द्रप्प्सस्तेद्याम्मास्कन्न्व्रजड्गच्छगोष्ठानंव्वर्षतुतेद्यौर्व्वधानदेवस-
वितः परमस्याम्पृथिव्वयाः शतेन पाशैय्योस्म्मान्द्वेष्ट्टिषञ्चव्वयन्द्विष्म्मस्तमतोमामौक् ॥

शु.य.वे.अ. 1 मन्त्र. 26 ॥

(3) पुराक्क्रूरस्य । विसृपोव्विरप्प्शिन्नुदादाय पृथिवीञ्जीवदानुम् ।
यामैरैर्यंश्चन्द्रमसिस्वधाभिस्तामुधीरासोऽ अनुदिश्श्यषजन्ते ।
प्रोक्षणीरासादय द्विषतोव्वधोसि ॥

शु.य.वे.अ. 1 मन्त्र. 28 ॥

4. निम्नलिखित मन्त्राणां पूर्तिः विधेया ।

(1) धृष्टिरस्ययाग्नेऽअग्निं .... तृव्यस्यव्वधाय ॥

(2) धान्यमसि धिनुहि देवा .... महीनाम्पयोसि ॥

(3) गायत्रेणत्त्वाच्छन्दसा .... चासिपर्यस्वतीच ॥

5. निम्नाङ्कितानां शब्दानां विभक्ति परिचयं करोतु ।

(1) पाणिना (2) वधाय (3) अग्ने (4) दिवः (5) देवान् (6) सवितुः (7) त्वा (8) यजमानस्य (9) देवेभ्यः (10) पृथिवि

6. निम्नाङ्कितानां धातुरुपाणि परिचनोतु ।

(1) विविनक्तु (2) जहि (3) तप्पद्ध्वम् (4) असि (5) धिनुहि (6) पृच्यन्ताम् (7) श्रपयतु (8) भूयात् (9) गच्छ (10) वर्षतु

7. सन्धि विच्छेद करोत्तु ।

(1) देवोवः (2) अग्निमामादम् (3) धरुणमस्यन्तरिक्षम् (4) त्वादितिः (5) धान्यमसि (6) प्रसवेऽश्विनोः (7) संयौमीदम् (8) भेर्मा (9) आददेऽध्वरकृतम् (10) योऽस्मान्

8. सन्धि योजनं कुरुत ।

(1) कुक्कुटः + असि (2) द्यौः + बधान (3) धृष्टिः + असि (4) धर्त्रम् + असि (5) रक्षः + अवधूता (6) त्वा + उदानाय (7) तु + अच्छिद्रेण (8) संयौमि + इदम् (9) अनिशितः + असि (10) षाम् + ऐरयन्

छात्र-प्रवृत्तिः

सर्वासां नवानां समिधां महत्त्वं प्रदाय वृक्षाः मानवपोषकाः सन्ति अनेन प्रकारेण वृक्षाणां महत्त्वमपि प्रदेयम् ।

विशिष्टज्ञानम्

वेदोऽखिलो धर्ममूलं
स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनाम्
आत्मनस्तुष्टिरेव च ॥

(मनुस्मृतिः) 2/6

●

9 शुक्लयजुर्वेदे द्वितीयोऽध्यायः (माध्यन्दिनीय) भाग-1

प्रस्तावना :

वेत्ति जानाति सर्वविधं ज्ञानम् अस्मिन् इति वेदः । अस्मिन् शुक्लयजुर्वेदस्य द्वितीयाध्याये यज्ञस्य साधनभूतानां हवनीयानां द्रव्याणां मानवजीवने का उपयोगिता ? एतानि यज्ञसाधन-भूतानि द्रव्याणि मानवेभ्यः किं किं प्रयच्छन्ति इति विशेषरूपेण लिखितमस्ति । सर्वप्रथमं पुरोडाशस्य विषये विशेषतया पुरः प्रथमं दाशन्ति यज्ञे एनमिति पुरोडाशः । अयमेव पुरोडाशः मानवानां पार्श्वे स्थितान् सर्वान् शत्रून् दूरीकृत्य स्वर्गानुकूलं सुखं दातुम् अर्हति तदनन्तरं दर्भस्य वर्णनं वर्तते, दर्भानां दृभ्यन्ते ग्रथ्यन्ते सर्व सुखानि अनेन इति दर्भः, अस्यैव शब्दस्य पर्यायवाची शब्दः कुशो वर्तते, तेन कुशजलेन प्रोक्षिता पृथिवी सर्वलाभान् ददाति । इध्यते दीप्यते अग्निदेवः अनेन तद् इति इन्धनम् इत्थं पुरोडाशकुशेन्धनादीनां हवनीयानां द्रव्याणां वर्णनं कृत्वा कथितमस्ति यद्-एतानि पुरोडाश-कुशेन्धनानि मानवाय इष्टं फलं दातुमर्हन्ति, अस्य कुशस्य महत्त्वं कथयति यद्-''कुशमूले स्थितोब्रह्मा कुशमध्ये जनार्दनः ।''

''कुशाग्रे शंकरो देवः तेन नश्यतु पातकम् ॥'' अनेन प्रकारेण विद्यार्थिनः हवनीयानां द्रव्याणां विशेषं महत्त्वं तत् विषयकं ज्ञानं च अवाप्स्यन्ति इति ध्यायेन शुक्लयजुर्वेदस्य द्वितीयाध्यायस्य प्रथममन्त्राद् आरभ्य षोडशमन्त्रपर्यन्तं प्रदीयन्ते ।

वृत्तकुण्डस्वरूपम्



दर्शपूर्णसोमयागस्यदेवाः

मन्त्रः

हरिः ॐ कृष्णोऽस्याखरेष्ठोऽग्नयेत्वाजुष्टम्प्रोक्षामिव्वेदिरसिबर्हिषेत्वाजुष्टाम्प्रोक्षामिबर्हिरसिस्रुग्भ्यस्त्वाजुष्टम्प्रोक्षामि ॥ शु.य.वे.अ. 2 मन्त्र. 1 ॥

पदपाठः

कृष्णः । असि । आखरेष्ठः । आखरेस्थऽइत्याखरे स्थः । अग्नये । त्वा । जुष्टम् । प्र । उक्षामि । व्वेदिः । असि । बर्हिषे । त्वाः । जुष्टाम् । प्र । उक्षामि । बर्हिः । असि । स्रुग्भ्यऽइतिस्रुक्भ्यः । त्वा । जुष्टम् । प्र । उक्षामि ॥ 1 ॥

सरलार्थः - हे इन्धन ! तृणबहुले प्रदेशे वा तृणयक्ते वने स्थितः त्वं कृष्णमृगः वर्तसे । अग्निदेवस्य प्रियं त्वां दर्भजलेन त्वाम् अहं पवित्रीकरोमि । सम्पूर्णां वेदिं दर्भजलेन प्रोक्षणं कुर्वन् कथयति यद् हे वेदिके । त्वं सर्वस्मै लाभय दात्री यज्ञस्य वेदिका असि । अनेन कारणेन दर्भस्य प्रतीतिभाजनां त्वां वेदिकां पवित्रीकरोमि । हे दर्भ । त्वं कुश-रूपो वर्तसे । समस्तानां स्रुवाणां प्रीतिभाजनस्वरूपाय त्वाम् अहं सर्वदा पवित्रीकरोमि ॥ 1 ॥

मन्त्रः

अदित्यै व्वयुनन्दनमसिव्विष्णोस्तुपोस्यूर्णम्म्रदसन्त्वास्तृणामिस्वासस्थान्देवेभ्योभुवपतये स्वाहा भुवनपतयेस्वाहाभूतानाम्पतयेस्वाहा ॥ शु.य.वे.अ. 2 मन्त्र-2 ॥

पदपाठः

अदित्यै । व्युन्दनमितिवि उन्दनम् । असि । विष्णोः । स्तुपः । असि । ऊर्णम्म्रदसमित्यूर्ण म्रदसम् । त्वा । स्तृणामि । स्वासस्थामितिसु आसस्थाम् । देवेभ्यः । भुवपतयऽइतिभुवपतये स्वाहा । भुवनपतयऽइति-भुवनपतये । भूतानाम् ॥ पतये ॥ 2 ॥

सरलार्थः - हे प्रोक्षणस्य शेष जल ! त्वं सम्प्रति अवशिष्टं जलम् इमां पृथिवीम् आर्द्रां कुर्वती भव । हे दर्भ ! त्वं भगवान्विष्णोः शिखावृन्तेन युक्तोभव । ऊर्णेन कोमलानि कोमलम् और्णं कृत्वा त्वाम् अस्य यज्ञस्य वेद्याः उपरि आच्छादयामि । हे वेदि ! त्वं देवानां सर्वेषां कृते सुखेन उपवेशनार्थम् आसनस्य स्थानं भव । होमस्य समये वेदिं परितः पतितस्य हविरन्नस्य स्पर्शं कुर्वन् कथयति यद्-अग्नि देवस्य प्रथमस्य बान्धवस्य भुवपतये तद् अवशिष्टं हविरन्नं प्रोक्षन् समये वेदिम् अभितः पतितं हविः आहुतमस्ति । भगवतः अग्निदेवस्य द्वितीयाय भ्रात्रे भुवनपतये इदं हविरन्नम् आहुतमसि । भगवतः अग्निदेवस्य तृतीयाय सहोदराय भुवपतये इदम् अवशिष्टं हविः आहुतमस्ति ॥ 2 ॥

मन्त्रः

गन्धर्व्वस्त्वा । व्विश्वावसुः परिदधातुव्विश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्गिनरिडऽईडितः । इन्द्रस्यबाहुरसि दक्षिणोव्विश्वस्यारिष्ट्यैसजमानस्यपरिधिरस्यग्गिनरिडऽईडितः । मित्रावरुणौत्त्वोतरतः परिधत्तान्ध्रुवेणधर्म्मणाव्विश्व स्यारिष्ट्यैसजमानस्यपरिधिरस्यग्गिनरिडऽईडितः ॥ शु.य.वे.अ. 2 मं. 3 ॥

पदपाठः

गन्धर्व्वः । त्वा व्विश्वावसुः । व्विश्वर्वसुरितिविश्वर्वसुः । परि । दधातु । व्विश्वस्य । अरिष्ट्यै । षजमानस्य । परिधिरितिपरि धिः । असि । दक्षिणः । मित्रावरुणौ । त्वा । उत्तरतः । परि । धत्ताम् । ध्रुवेण । धर्म्मणा ॥ 3 ॥

सरलार्थः - हे प्रथम परिधे ! सर्वासाम् अहिंसानां निमित्ताय त्वां परिधिम् आहवनीयायां पश्चिमदिशायां स्थापयामि । हे परिधे ! त्वं यजमानस्य अपि रक्षायाः परिधिः असि । हे भुवनपतये अग्ने ! त्वं सर्वेषां जीवानां स्तुत्यो वर्तसे, अतः सर्वैः होत्रादिभिः त्वं भुवनपतिः अग्निः संस्तुतो वर्तते हे दक्षिण परिधे ! त्वं स्वर्गाधिपतेः देवराजस्य इन्द्रस्य दक्षिणा भुजा भव, सर्वासाम् अहिंसानां समाप्तये अहं त्वाम् आहवनीयस्य दक्षिणभागे स्थापयामि त्वं यजमानस्य अपि रक्षा-

परिधिः भव । हे अग्ने । द्वितीयभुवनपते भ्रातः ! त्वं सर्वेषां स्तुत्योऽसि, अनेन कारणेन होतृप्रभृतिभिः सदा सर्वदा सर्वथा च स्तुतो वर्तसे । हे उत्तरपरिधे ! उत्तरस्यां दिशायां त्वां मित्रवरुणयोः स्थिरधारणद्वारा त्वां संस्थापयामि । त्वं यजमानस्य अपि रक्षापरिधिः भव । हे अग्नेः भूतपतिनामकतृतीय भ्रातः ! त्वमपि स्तोतुं योग्योऽसि, अतः त्वं होतृप्रभृतिद्वारा संस्तुतो वर्तसे, त्वमपि सर्वस्य यजमानस्य रक्षापरिधिः भव ।

मन्त्रः

व्वीतिहोत्रन्त्वा । कवेद्युमन्तꣳ समिधीमहि ॥

अग्नेबृहन्तमद्ध्वरे ॥ शु.य.वे.अ. 2 मन्त्र. 8 ॥

पदपाठः

व्वीतिहोत्रमितिव्वीति होत्रम् । त्वा । कवे । द्युमन्तमितिद्युमन्तम् । सम् । इधीमहि । अग्ने । बृहन्तम् । अद्ध्वरे ॥ 8॥

सरलार्थः – अग्निहोमे समिधायाः होमं कुर्वन्तः कथयन्ति यदहे आहवनीयाग्ने ! हे क्रान्तदर्शिन् ! यज्ञकर्मणि वयं होमद्वारा देवानां सर्वेषां ''पानगोष्ठी'' सम्पादयन्तः द्युतियुक्तस्य महतः अग्नेः समिधाभिः प्रज्वलनं कुर्मः ॥ 8 ॥

मन्त्रः

समिदसिसूर्य्यस्त्वापुरस्तात्पातुकस्याश्चिदभिशस्त्यै ।

सवितुर्व्वाहूस्थऽऊर्ण्णम्म्रदसन्त्वास्तृणामिस्वासस्थन्देवेब्भ्यऽआत्त्वाव्वसवोरुद्राऽआदित्याः सदन्तुः ॥

शु.य.वे.अ. 2 मन्त्र. 5 ॥

पदपाठः

समिदितिसम् इत् । असि । सूर्य्यः त्वा । पुरस्तात् । पातु । कस्याः चित् । अभिशस्त्याऽइत्त्यभिशस्त्यै । सवितुः । बाहुऽइतिबाहू । स्थः । ऊर्ण्णम्म्रदसमित्त्यूर्ण्णम्रदसम् । त्वा । स्तृणामि । स्वासस्थमितिसु आसस्थम् । देवेब्भ्यः । आ । त्वा । व्वसवः । रुद्राः । आदित्याः । सुदन्तु ॥ 5 ॥

सरलार्थः – यज्ञहोमे द्वितीयां समिधां जुह्वन्तः वयं समिधायाः स्तुतिं कुर्महे हे समिधे ! त्वं समिधा वर्तसे, अतः नौकभिः हिंसाभिः त्वां पूर्वस्यां दिशायां भगवान् भुवनभास्करः सूर्यः रक्षतु । हे दर्भपूल । त्वं भगवतः सूर्यस्य द्विबाहुरुपः असि । त्वम् ऊर्णेन कोमलेन और्णवस्त्रेण त्वां वेद्याः उपरि आच्छादयामि । त्वं सर्वेषां देवानां सुखेन उपवेशनार्थं साधनं भव । हे विस्तारितदर्भासन ! वसुः, रुद्रः, आदित्यगणः, एते सर्वे देवाः आगत्य अस्मिन् विस्तारिते दर्भासने उपवेशनं कुर्वन्तु ॥ 5 ॥

मन्त्रः

घृताच्च्यसि । जुहूर्न्नाम्नासेदम्प्रियेणधाम्नाप्प्रियछंसदऽआसीद घृताच्च्यस्युपभृन्नासेदम्प्रियेणधाम्नाप्प्रियछं सदऽआसीदघृताच्च्यसिद्धुवानाम्नासेदम्प्रियेणधाम्नाप्प्रियछं सदऽआसीदप्प्रियेणधाम्नाप्प्रियछंसदऽआसीद ।

ध्रुवाऽ असदन्नृतस्ययोनोताव्विष्णणोपाहिपाहियज्ञम्पाहियज्ञपतिंपाहिमाँय्यज्ञन्न्यम् ॥ शु.य.वे.अ. 2 मन्त्र. 6 ॥

पदपाठः

घृताची । असि । जुहूः । नाम्ना । सा । इदम् प्रियेण । धाम्ना । प्रियम् । सदः । आ । सीद । उपभृदित्युप भृत् । ध्रुवा ॥ ध्रुवा । असदन् । ऋतस्य । योनौ । ता ॥ ह्विष्णोऽइति व्विष्णो । पाहि । पाहि । षज्ञम् । पाहि । यज्ञपतिमितियज्ञपतिम् । पाहि । माम् । यज्ञन्युमितियज्ञ न्यम् ॥ 6 ॥

सरलार्थः – यज्ञस्य वेद्याः उपरि जुहूं स्थापयत । कथयन्ति यदहे जुहूः । घृतम् अञ्जता त्वं नामकेन जुहूः भवतु । त्वं सर्वेषां देवानां प्रियेण तेजोघृतेन सह स्वस्य प्रियस्य दर्भासनस्य उपरि स्थिता भवन्तु । हे उपभृद् ! ''घृताची''

इति नामकेन त्वम् उपभृद् असि, त्वं सर्वेषां देवानां प्रियेण तेजसा आज्येन सह स्वप्रियस्थाने दर्भासने उपविशतु । हे ध्रुवे । घृतदातृत्वात् त्वं यज्ञस्य तृतीया स्रुवा ध्रुवा वर्तसे । त्वमपि देवानां प्रियेण घृतेन सह दर्भासनस्य स्थिरभावेन प्रतिष्ठताम् । यज्ञस्य हवनीयानि द्रव्याणि संस्पृश्य सर्वाणि स्थिराणि हवनीयानि द्रव्याणि यज्ञस्य वेद्याम् उपरि स्थितानि सन्ति । हे यज्ञस्य हवनीयानि ! भवान् हवनीयानां राक्षसेभ्यः रक्षणं करोतु । यज्ञस्य रक्षणं करोतु ॥ 6 ॥

मन्त्रः

अग्ग्नेव्वाजजिद्वाजन्त्वासरिष्यन्तंव्वाजजितछं सम्माज्र्मि । नमो देवेब्भ्यः स्वधापितृब्भ्यः सुयमेनेभूयास्तम् ॥

॥ शु. य. वे. अ. 2 मन्त्र. 7 ॥

पदपाठः

अग्ग्ने । व्वाजजिदितिवाजजित् । व्वाजम् । त्वा । सरिष्यन्तम् । व्वाजजितमितिवाजजितम् । सम् । माज्र्मि नमः । देवेब्भ्यः । स्वधा । पितृब्भ्यऽइतिपितृब्भ्यः । सुयमेऽइतिसुषमो मे । भूयास्तम् ॥ 7 ॥

सरलार्थः – हे हविरन्नस्य विजेतः अग्ने ! हविरन्नस्य विनयं कुर्वाणाय तुभ्यम् अहम् अन्नं प्रयच्छन् पवित्रं करोमि । उत्तरस्याम् दिशायां हस्तौ बद्ध्वा कथयति यद् – सर्वेषां देवानां नमनम् अस्तु । दक्षिणस्यां दिशि हस्तकमलौ बद्ध्वा कथयति यद् – सर्वेभ्यः पितृभ्यः नमोऽस्तु । जुहुम् उपभृतम् उत्थापयन् वक्ति यद् – इमौ द्वौ – उत्थापितौ मया सदा सर्वदा सर्वथा च नियन्त्रणीयौ भवताम् ॥ 7 ॥

मन्त्रः

अस्कन्नमद्य । देवेब्भ्यऽआज्यछंसम्भ्रियासमङ्घ्रिणाव्विष्णणोमात्त्वावक्क्रमिषंव्वसुमतीमग्ग्नेतेच्छायामुपस्थेषं-व्विष्णणोस्थानमसीतऽ इन्द्रोव्वीर्यमकृणोदूर्द्ध्वोध्वरऽआस्थात् ॥

शु. य. वे. अ. 2 मन्त्र. 8 ॥

पदपाठः

अस्कन्नम् । अद्य । देवेब्भ्यः । आज्यम् । सम् । भ्रियासम् । अङ्घ्रिणा । व्विष्णणोऽइतिविष्णणो । मा । त्वा । अव । क्रमिषम् । व्वसुमतीमितिवसुमतीम् । अग्ग्ने । ते । छायाम् । उप । स्थेषम् । व्विष्णणोः । स्थानम् । असि । इतः । इन्द्रः । व्वीर्यम् । अकृणोत् । ऊर्द्ध्वः । अद्ध्वरः । आ । अस्थात् ॥ 8 ॥

सरलार्थः – अस्मिन् दिवसे अहं प्रोक्षणं कुर्वन् इतस्ततः पतितं हविरन्नं पुनः देवेभ्यः संबिभर्मि । हे यज्ञपते ! अहं त्वां क्षमां कुर्वन् पद्भ्याम् अतिक्रान्तस्य अपमानं कदापि न करिष्यामि । हे अग्ने अहं तव धनमय्याः अथवा वासमित्र्याः छायायाः एव सदा आश्रयं करिष्यामि । एतस्मादेव स्थानाद् स्वर्गराजेन इन्द्रेण पराक्रमः क्रतो वर्तते । तस्य इन्द्रस्य पराक्रमस्य अनन्तरं हिंसनरहितो यज्ञः ऊर्ध्वं गतः ॥ 8 ॥

मन्त्रः

अग्ग्नेव्वेर्होत्रंव्वेर्दूत्त्यमवतान्त्वान्द्यावापृथिवीऽअवत्वन्द्यावा पृथिवीसिवष्टकृद्देवेब्भ्यऽइन्द्रऽ आज्ज्येन हविषाभूत्स्वाहा सञ्ज्योतिषाज्ज्योतिः ॥

शु. य. वे. अ. 2 मन्त्र. 9 ॥

पदपाठः

अग्ग्ने । व्वेः । होत्रम् । व्वेः । दूत्त्यम् । अवताम् । त्वाम् । द्यावापृथिवीऽइतिद्यावापृथिवी । अव । त्वम् । द्यावापृथिवीऽइति द्यावा पृथिवी । स्विष्टकृदितिस्विष्टकृत् । देवेब्भ्यः । इन्द्रः आज्ज्येन । हविषा । भूत् । स्वाहा । सम् । ज्योतिषा । ज्योतिः ॥ 9 ॥

सरलार्थः – हे अग्ने ! भवान् अग्निहोत्रं निरन्तरं जानातु । भवान् दूतस्य कर्माणि जानातु । दूतस्य कर्माणि सततं

कुर्वती द्यावापृथिवी त्वां रक्षतु ।

घृतेन हविषा च प्रीतः स्वर्गराजः इन्द्रः सर्वेषां देवानां कृते शुभेन कर्मणा सर्वेषां यज्ञानां पूर्णस्य कर्ता भवतु । इयम् आहूतिः इन्द्राय अस्तु । एवम् अयं यज्ञः ज्योतिषा संगतोऽपि भूयात् ॥ 8 ॥

मन्त्रः

मयीदमिन्द्रऽइन्द्रियन्दधात्वस्मान्रायोमघवानः सचन्त्वाम् ।
अस्माकछं सन्त्वाशिषः सत्यानः सन्त्वाशिषऽउपहूतापृथिवीमातोपमाम्पृथिवीमाताहव्वयता मग्गिनराग्ग्नीध्द्रात्त्स्वाहा ॥

शु. य. वे. अ. 2 मन्त्र. 10 ॥

पदपाठः

मयि । इदम् । इन्द्रः । इन्द्रियम् । दधातु । अस्म्मान् । रायः । मधवानऽइतिमधव्वानः । सचन्ताम् । अस्म्माकम् । सन्तु । आशिषऽइत्याशिषः । सत्त्याः । नः । सन्तु । आशिषऽइत्याशिषः । उपहूतेत्तयुपहूता । पृथिवी । माता । उप । माम । पृथिवी । माता । हवयताम् । अग्गिनः । आग्ग्नीध्द्रातास्वाहा ॥ 10 ॥

सरलार्थः – प्रधानयागस्य अनन्तरं शेषस्य पुरोडाशस्य भक्षणं कुर्वन् स्वयमेव यज्ञस्य यजमानः जयं करोति यत्स्वयमेव स्वर्गराजइन्द्रः हुतशेषस्य पुरोडाशस्य भक्षणेन मम इन्द्रियाणि बलयुतानि करोतु । वयम् इन्द्रस्य धनेन संगताः भवामः । अस्माकं सर्वाः अभिलाषाः पूर्णतां यान्तु । इयं माता पृथिवी मया यजमानेन आहूता वर्तते, तथैव इयं पृथिवी माता मामपि सततम् आह्वयतु । अग्निध्रेण अग्निध्रस्वरनपोऽहं शेषस्य पुरोडाशस्य भोजनं करोमि ॥ 10 ॥

मन्त्रः

उपहूतोद्यौष्प्पितोपमान्द्यौष्प्पिताहव्वयतामग्गिनराग्ग्नीध्द्रात्त्स्वाहा ।
देवस्यत्त्वासवितुः प्प्रसवेश्श्विनोर्व्वाहुब्भ्याम्पूष्णणो हस्ताब्भ्याम् । प्रतिगृहण्णाम्म्यग्ग्नेष्ट्वास्येनप्प्राश्नामि ॥

॥ शु. य. वे. अ. 2 मन्त्र. 11 ॥

पदपाठः

उपहूतऽइत्त्युपहूतः । द्योः । पिता । डप । माम् । द्यौ । पिता । हवयताम् । अग्गिनः । आग्ग्नीध्द्रात् । स्वाहा॥ प्रति । गृहण्णामि । अग्ग्ने । त्वा । आस्येन । प्र । अश्नामि ॥ 11 ॥

सरलार्थः – मया द्यौःपिता नाम जगत्पालकः आहूतो वर्तते, स एव जगतः पालकः मध्यं पुरोडाशस्य भक्षणाय मह्यम् आज्ञां ददातु । अहम् अग्निर्भूत्वा अग्नीध्रस्य हस्तेन शेषं पुरोडाशं खादामि । हे पुरोडाशशेष । भगवतः भास्करस्य आज्ञायां वर्तमा नोऽहं अश्विन्योः बाहुभ्यां तथा पूषदेवस्य हस्ताभ्यां प्राशित्रस्य ग्रहणं करोमि । हे पुरोडाश ! अहं त्वाम् अग्नि देवस्य मुखेन खादामि ॥ 11 ॥

मन्त्रः

एतन्तेदेवसवितर्य्यज्ञम्प्राहूर्बृहस्प्पतयेब्रह्मणे । तेनयज्ञमवतेनयज्ञपतिन्तेनमामव ॥

शु. य. वे. अ. 2 मन्त्र. 12 ॥

पदपाठः

एतम् । ते । देव । सवितः । षज्ञम् । प्र । आहुः । बृहस्प्पतये । ब्रह्मणे । तेन । षज्ञम् । अव । तेन । षज्ञपतिमितियज्ञ पतिम् । तेन । माम् । अव ॥ 12 ॥

सरलार्थः – हे सवितः ! अस्माभिः क्रियमाणस्य यज्ञस्य तव कृते कथयति, तथा देवतानां गुरोः बृहस्पतेः कृते एवं सृष्टिसर्जकस्य ब्रह्मणः कृते कथयति । हे भुवनभास्कर ! तेन यज्ञेन मां रक्षतु एवं तेनैव कारणेन त्वं ब्रह्मादीन् सर्वान् ऋत्विजश्च द्योतमय ॥ 12 ॥

मन्त्रः

मनोजूतिर्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंयज्ञꣳसमिमन्दधातु ।
व्विश्श्वेदेवासऽइहमादयन्तामो ॥ ऊँम्प्रतिष्ट्ठ ॥

शु. य. वे. अ. 2 मन्त्र. 13 ॥

पदपाठः

मनः । जूतिः । जुषताम् । आज्ज्यस्य । बृहस्प्पतिः । यज्ञम् । इमम् । तनोतु । अरिष्टम् । यज्ञम् । सम् । इमम् । दधातु । व्विश्श्वे । देवासः इह । मादयन्ताम् । ऊम् । प्र । तिष्ठ ॥ 13 ॥

सरलार्थः - सर्वेषां मनसो वेगवान् भगवान् सविता आहूतस्य घृतस्य सेवनं करोतु । देवानां गुरुः बृहस्पतिदेवः अस्माभिः विहितस्य यज्ञस्य विस्तारं सदा सर्वदा करोतु, स एव बृहस्पतिः अस्माकं यज्ञस्य धारणं स्वयमेव करोतु । अस्मिन् यज्ञे सर्वे विश्वेदेवाः आनन्दमतिशयं प्राप्नुवन्तु । ते सर्वे स्वर्गवासिनो देवाः सफलान् आशीर्वादान् अस्मभ्यं ददतु ॥ 13 ॥

मन्त्रः

एषातेऽअग्ग्नेसमित्तयाव्वर्द्धस्वचाचप्प्यायस्व । व्वर्द्धिषीमहिचव्वयमाचप्प्यासिषीमहि ।
अग्ग्नेव्वाजजिद्वाजन्त्वाससृवाꣳसंव्वाजजितꣳसम्मार्ज्जिम ॥

शु. य. वे. अ. 2 मन्त्र. 14 ॥

पदपाठः

एषा । ते । अग्ग्ने । समिदितिसम् इत् । तया व्वर्द्धस्व । च । आ । च । प्यायस्व ॥ व्वर्द्धिषीमहि । च । व्वयम् । आ । च । प्यासिषीमहि ॥ ससृवाꣳसमितिससृव्वाꣳसम् । व्वाजजितमिति वाजजितम् ॥ 14 ॥

सरलार्थः - हे भगवन् अग्ने ! एताः सर्वाः भवतः समिधः सन्ति, तथा ताः सर्वाः समिधः सर्वान् यजमानान् अभिवर्धन्ताम् । वयं सर्वे ऋत्विजः ज्ञानेन यज्ञकर्मणा च वर्धिषीमहि, तथा सर्वेषां यजमानानाम् अभिवर्धनं करोतु हे हविरन्नस्य विजयकोऽग्ने ! हविरन्नं लिलिक्षुस्तया अस्माकं कृते अन्नस्य विजेता अग्निः वर्तते, अहं त्वां पवित्रीकरोमि ॥ 14 ॥

मन्त्रः

अग्ग्नीषोमयोरुज्जितिमनूज्जेषंव्वाजस्यमाप्रसवेनप्प्रोहामि ।
अग्ग्नीषोमौतमपनुदतांय्योस्म्मान्द्वेष्ट्टियञ्चव्वयन्द्विष्मोव्वाजस्यैनम्प्रसवेनापोहामि ।
इन्द्राग्ग्नयोरुज्जितिमनूज्जितिमनूज्जेषंव्वाजस्यमाप्प्रसवेनप्प्रोहामि ।
इन्द्राग्ग्नीतमपनुदत्तांय्योस्म्मान्द्वेष्ट्टियञ्चव्वयन्द्विष्मोव्वाजस्यैनम्प्रसवेनापोहामि ॥

शु. य. वे. अ. 2 मन्त्र. 15 ॥

पदपाठः

अग्ग्नीषोमयोः । उज्जितिमित्युत् जितिम् । अनु । उत् । जेषम् । व्वाजस्य । मा । प्रसवेनेतिप्रसवेन । प्र । ऊहामि ॥ अग्ग्नीषोमौ । तम् अप । नुदताम् । व्वाजस्य । एनम् । प्रसवेनेतिप्रसवेन । अप । ऊहामि ॥ इन्द्राग्ग्न्योः । इन्द्राग्ग्नीऽइतीन्द्राग्ग्नी ॥ 15 ॥

सरलार्थः – देवानां कृते निवेदयित्रीं जुहूम् उपभृतं च पृथक् कुर्वतः भावनया प्रथमां जुहूं पूर्वस्यां दिशि अपसारयन् यजमानः कथयति यद् – अग्निदेवेन (सोम–देवेन) जितः स्वर्गलोकः अनुकूलो भूत्वा अहं विजयं प्राप्नोमि । हविरन्नं समर्पणेन अहं स्वयं (जुहू–रूपे) पूर्वस्यां दिशि प्रोत्साहितं करोमि । स्वयमेव भगवन्तौ अग्निसोमौ तम् अपसारयताम् अन्नस्य समर्पणेन एव अहं तेषां सर्वेषां शत्रूणाम् अपसारणं करोमि । इन्द्रदेवेन अग्निदेवेन च मम कृते विजितस्य स्वर्गादिकस्य अहम् अनुकूलो भूत्वा विजयम् आप्नोति । उपभृतं पश्चिमायां दिशि निवेदयन् अधुना अहं हविरन्नस्य समर्पणेन स्वयमेव पश्चिमायां प्रोत्साहितं करोमि । स्वर्गराजः इन्द्रस्तमा भगवान् अग्निः तेषां शत्रूणाम् अपबाधितं कुरुतः ये अस्माभिः सह द्वेषं कुर्वन्तः सन्ति, तया वयमपि यैः सह द्वेषं कुर्वन्तः स्मः । हविरन्नस्य समर्पणेन अहं तेषां शत्रूणां अपसारणं करोमि ॥ 15 ॥

मन्त्रः

व्वसुब्भ्यस्त्वा । रुद्रेब्भ्यस्त्वादित्येब्भ्यस्त्वासञ्जानाथान्द्यावापृथिवीमित्रावरुणौत्त्वाव्वृष्ट्यावताम् ।
व्वयन्तुव्वयोक्तꣳ रिहाणामरुताम्पृषतीर्गच्छव्वशापृश्निर्भूत्त्वादिवङ्गच्छततोनोव्वृष्टिमावह ।
चक्षुष्पाऽअग्नेसिचक्षुर्म्मेपाहि ॥ शु. य. वे. अ. 2 मन्त्र. 16 ॥

पदपाठः

व्वसुब्भ्यऽइतिवसुभ्यः । त्वा । रुद्रेब्भ्यः । आदित्येब्भ्यः । सम् । जानाथाम् । द्यावापृथिवीऽइतिद्यावापृथिवी । मित्रावरुणौ । त्वा । व्वृष्ट्या । अवताम् । व्वयन्तु । व्वयः । अक्कतम् । रिहाणाः मरुताम् । पृषतीः । गच्छ । व्वशा । पृश्निः भूत्त्वा । दिवम् । गच्छ । ततः न ः । व्वृष्टिम् । आ । व्वह ॥ चक्षुष्पाः । चक्षुपाऽइति चक्षुपा । अग्ने । असि । चक्षुः । मे । पाहि ॥ 16 ॥

सरलार्थः – पश्चिमस्य, उत्तरस्य, दक्षिणस्य च परिधेः जुहूद्वारा घृतेन आर्द्रं कुर्वन् यजमानः कथयति यद्–हे पश्चिम परिधे ! त्वाम् अष्टानां वसूनां कृते घृतेन आप्लुतं करोमि । हे दक्षिणपरिधे ! एकादशानां रुद्राणां कृते त्वाम् आप्लुतं करोमि । हे उत्तरपरिधे ! द्वादशानाम् आदित्यानां कृते त्वाम् आज्येन आप्लुतं करोमि । द्वित्रान् दर्भान् हस्ते निधाय कथयति यदहे द्यावापृथिवी ! भवन्तौ द्वौ मम अस्य प्रस्तरग्रहणस्य अनुमोदनं कुरुताम् । हे प्रस्तररूपयजमान मित्रावरुणौ त्वां वृष्ट्या सुरक्षितं कुरुतः । घृतेन आप्लुतं लिलिक्षु गायत्रीप्रभृतिछन्दो द्युलोकं प्राप्नोतु । हे प्रस्तर त्वं यज्ञयोग्यतागौः पृथिवी च भूत्वा स्वर्गलोकस्य प्राणं करोतु, तस्मात् स्वर्गलोकाद् अस्माकं कृते वृष्टिम् आनयतु । हे अग्ने ! भवान् नेत्रपालको वर्तते । मम नेत्रे सुरक्षिते करोतु, अनेन प्रकारेण स्वस्य नेत्रे उपस्पृशन् कथयति ॥ 16 ॥

शब्दार्थः

प्रोक्षामि – प्रोक्षणं करोमि । **जुष्टम्** – पवित्रम् **आखरेष्ठ** – कृष्णमृगः । **अदित्यै** – पृथिव्यै । **ऊर्णम्** – उर्णेननिर्मितं–वस्त्रम् । **उन्दनम्** – जलम् । **गन्धर्वः** – विश्वावसुः । **अरिष्ट्यै** – अविनाशाय । **ईडित**– – प्रार्थिता । **वीतिहोत्रम्** – गायत्री । **द्युमन्तम्** – दीप्तिमन्तम् । **समिधीमहि** – संदीपं कुर्मः । **पातु** – रक्षतु । **पुरस्तात्** – समीपे । **सदन्तु** – उपविशन्तु । **घृताचीः** – घृतेन पूजिता । **धाम्ना** – स्थानेन ।**सीद** – उपवेशनं कुरु । **यज्ञन्यम्** – यज्ञन्तः । **वाजजित्** – अन्नजित् । **संमार्ज्मि** – पवित्रीकरोमि । **वाजम्** – अन्नम् । **अस्कन्नम्** – सम्पूर्णम् । **वसुमतीम्** – पृथिवीम् । **वीर्यम्** – शक्तिः । **अध्वरः** – यज्ञः । **वेः** – ज्ञानार्थीभव । **स्विटकृत्** – इष्टं करोति । **अवताम्** – रक्षतु । **इन्द्रियम्** – इन्द्रस्य शक्तिः । **मघवानः** – धनवन्तः । **रायः** – घनानि । **उपहूताः** – कथिता । **प्राशित्रम्** – हुतशेषम् । **आस्येन** – मुखेन । **जूतिः** – वेगः । **जुषताम्** – सेवनं करोतु । **तनोतु** – विस्तारयतु । **देवासः** – सर्वे देवाः । **अरिष्टम्** – अविनष्टम् । **मादयन्ताम्** – आनन्दम् । **प्राप्नुवन्तु** – समितः समिदिन्धनानि । **संमार्ज्मि** – शुद्धीकरोमि । **प्यायस्व** – वर्धस्व । **वृष्ट्या** – वर्षणेन । **अग्निषोमयोः** – यज्ञस्य प्रधानदेवतयोः । **अवतु** – पालनं करोतु । **रिहाणाः** – आस्वादनं कुर्वाणाः । **वाजस्य** – पुरोडाशस्य । **संजानाथाम्** – ज्ञानंकुरुतम् ।

स्वाध्याय:

1. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) कृष्णमृग: को वर्तते ?

(क) इन्धनम् । (ख) घृतम् । (ग) हवि: । (घ) पायसम् ।

(2) पृथिवीम् आर्द्रां कर्त्तुं कं कथयति ?

(क) पय: । (ख) जलम् । (ग) दुग्धम् । (घ) घृतम् ।

(3) प्रथमपरिधिं कस्यां दिशि स्थापयति ?

(क) उत्तरस्याम् । (ख) दक्षिणस्याम् । (ग) पश्चिमायाम् । (घ) पूर्वस्याम् ।

(4) आहवनीयाग्नि: कीदृशो वर्तते ?

(क) प्रियदर्शी । (ख) अप्रियदर्शी । (ग) क्रान्तदर्शी । (घ) सुदर्शी ।

(5) पूर्वस्यां दिशि कस्य रक्षणार्थं कथयति ?

(क) अग्ने: । (ख) चन्द्रस्य । (ग) इन्द्रस्य । (घ) सूर्यस्य ।

(6) जुहू: कस्य आसनस्य उपरि स्थिता भवतु ?

(क) दर्भस्य । (ख) पुष्पस्य । (ग) वस्त्रस्य । (घ) दुर्वाङ्कुरस्य ।

(7) उत्तरस्यां दिशि किं बद्ध्वा कथयति ?

(क) पादौ । (ख) हस्तौ । (ग) वस्त्रम् । (घ) आसनम् ।

(8) यज्ञपते: किं कदापि न करिष्यति ?

(क) स्तुति: । (ख) मानम् । (ग) अपमानम् । (घ) पूजनम् ।

(9) अग्नि: कं जानातु ?

(क) पुरोहितम् । (ख) देवम् । (ग) राक्षसम् । (घ) अग्निहोत्रम् ।

(10) मम इन्द्रियाणि बलयुतानि क: करोतु ?

(क) इन्द्र: । (ख) अग्नि: । (ग) विष्णु: (घ) शिव: ।

2. निम्नाङ्कितानां (एक-वाक्येन) उत्तराणि लिखतु ।

(1) कस्मै लाभाय यज्ञस्य वेदिका वर्तते ?

(2) भगवत: विष्णो: केन युक्तो भव ?

(3) कै: भुवनपति: अग्नि: संस्तुतो वर्तते ?

(4) काभि: अग्ने: प्रज्वालनं कुर्म: ?

(5) केन वेदीम् आच्छादयति ?

(6) हवनीयानां रक्षणं केभ्य: करोतु ?

(7) हविरन्नस्य विजेता देव: को वर्तते ?

(8) कस्या: आश्रयं सदा करिष्यामि ?

(9) केन प्रीत: स्वर्गराज: इन्द्रो वर्तते ?

(10) ‘‘द्यौ: पिता’’ इत्यस्य को अर्थो भवति ?

3. निम्नाङ्किषानां शब्दानां विभक्ति परिचयं करोतु ।

(1) बर्हिषे (2) अदित्यै (3) विश्वावसुः (4) अध्वरे (5) नाम्ना (6) पितृभ्यः (7) वसुमतीम् (8) अग्ने (9) आशिषः

4. निम्नाङ्कितानां धातु रुपाणि परिचिनोतु ।

(1) प्रोक्षामि (2) स्तृणामि (3) परिदधातु (4) सदन्तु (5) धीमहि (6) आसीत् (7) पाहि (8) भूयास्तम् (9) आस्थयात् (10) सन्तु ।

5. सन्धि विच्छेद करोतु ।

(1) वेदिरसि (2) व्युन्दनमसि (3) गन्धर्वस्त्वा (4) बृहन्तमध्वरे (5) मयीदम् (6) समिदसि (7) घृताच्यसि (8) अस्कन्नमद्य (9) वेर्दूत्यम् (10) प्राहुर्बृहस्पतये

6. सन्धि योजनं कुरुत ।

(1) बर्हिः + असि (2) स्तुपः + असि (3) विश्वस्य + अरिष्ट्यै (4) सूर्यः + त्वा (5) कस्याः + चिद् (6) सा + इदम् (7) वसुमतीम् + अग्ने (8) दूत्यम् + अवताम् (9) दधातु + अस्मान् (10) द्यौः + पिता

7. निम्नाङ्कितानां मन्त्राणां भावार्थं लिखतु ।

(1) गन्धर्व्वस्त्वा व्विश्वावसुः परिदधातुव्विश्श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः ।
इन्द्रस्यबाहुरसि दक्षिणोव्विश्श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः ।
मित्रोवरुणौत्त्वोतरतः परिधत्तान्ध्रुवेण धर्म्मणाव्विश्श्वस्यारिष्ट्यैयजमानस्य परिधिरस्यग्निरिडऽईडितः ॥

शु. य. वे. अ. 2 मन्त्र. 3 ॥

(2) मयीदमिन्द्रऽ इन्द्रियन्दधात्त्वस्म्मान्रायोमघवानः सचन्ताम् ।
अस्म्माकःं सन्त्वाशिषः सत्त्यानः सन्त्वाशिषऽउपहूता-
पृथिवीमातोपमाम्पृथिवीमाताहव्वयतामग्निराग्नीध्रत्त्स्वाहा ॥

शु. य. वे. अ. 2 मन्त्र. 10 ॥

(3) एतन्तेदेवसवितर्य्यज्ञम्प्राहुर्बृहस्प्पतयेब्ब्रह्मणे ।
तेनयज्ञमवतेनयज्ञपतिन्तेनमामव ॥

शु. य. वे. अ. 2 मन्त्र. 12 ॥

8. निम्नलिखित मन्त्राणां पूर्तिः विधेया ।

(1) समिदसिसूर्य्यस्त्वा .... आदित्त्याः सदन्तु ॥
(2) अग्नेव्वाजजिद्वाजन्त्वा .... सुयमैमेभूयास्तम् ॥
(3) एषातेऽ अग्नेसमित्तया .... जजितछंसम्मार्जि्म ॥

छात्रप्रवृत्तिः

उदात्त अनुदात्त-स्वरितादीनां ज्ञानं विद्यार्थिभ्यो वितरतु ।

विशिष्ट ज्ञानम्

इष्टप्राप्त्यनिष्टपरिहारौ
यो ग्रन्थः वेदयति सः वेदः ।

●

10 शुक्लयजुर्वेदे द्वितीयोऽध्यायः (माध्यन्दिनीय) भाग-2

प्रस्तावना:

ओम् सहनाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु । मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ।

यदि कस्यापि देशस्य प्रजासु एकता न स्यात्, तर्हि तस्य देशस्य विनाशो भवत्येव, एकतायामेव सर्वेषां विकासो भवितुमर्हति । इदमेव (शुक्ल-यजुर्वेदस्य) मन्त्राणां ज्ञानमिदमेव वर्तते यत्-हे ईश्वर ! प्रजासु परस्परम् अविरतं च सौहार्दं भवेत्, तेन सौहार्देन स्वस्य विकासेन सह देशस्य विकासः कल्पनीयो भवति । इत्थम् एकतायामेव सर्वस्य शान्तिः भवति, एकतायाः षण्णाम् ऋतूणां मानवजीवनस्य शान्तये विकासाय च श्रेष्ठतमस्य योगदानस्य चर्चा प्रदत्तेषु मन्त्रेषु कथिता वर्तते, तत्र भारतीयसंस्कृतौ षड्ऋतवः सन्ति (ऋतु) शब्दस्य अर्थो भवति यद्-इयर्ति ऋच्छति ददाति जीवेभ्यो जीवनम् इति ऋतुः । एतेषां नामानि सन्ति यथा हेमन्तः, शिशिरः, वसन्तः, ग्रीष्मः, वर्षर्तुः, शरद्-इत्थं हेमन्तः ऋतुः (घोर-रूपो) वर्तते । शिशिरः शीतकारको वर्तते । वसन्ति मदनोत्सवाः यत्र इति वसन्तः रसभूषोऽस्ति । ग्रसते रसान् इति ग्रीष्मः शोषणकर्ता कथितः । वर्षर्त्तुः सर्वेषां जीवानां जीवनस्य प्रदात्ता ऋतः । पाकेन ओषधयः शीर्यन्ते अस्मिन्निति शरदृतुः शीतदायी वर्तते । एतेषां षण्णाम् ऋतूनां महत्त्वं ज्ञानं च विद्यार्थिनः सर्वे लभेरन् इति उद्देश्येन शुक्लयजुर्वेदस्य द्वितीयाध्यायस्य सप्तदशमन्त्राद् आरभ्य द्वितीयाध्यायसमाप्तिं यावत् अष्टादशमन्त्राः प्रस्तूयन्ते ।

दर्शपूर्णमासयागस्य देवताः

(1) अग्निः



(2) अग्निसोमौ

(3) प्रजापतिः

(4) विष्णुः

मन्त्रः

षम्परिधिम्पर्ष्यधत्याऽअग्नेदेवपणिभिर्गुह्यमान ।
तन्तऽएतमनुजोषम्भराम्येषनेत्त्वदयचेतयाताऽअग्ने प्रियम्पा थोपीतम् ॥

शु. य. वे. अ. 2 मन्त्र. 17 ॥

पदपाठः

षम् । परिधिमितिपरिधिम् । पर्ष्यधत्त्थाऽइतिपरि अधत्त्था । अग्ग्ने । देव । पणिभिरितिपणिभिः । गृहष्यमान । तम् । ते । एतम् । अनु । जोषम् । भरामि । एष । न । इत् । त्वत् । अपचेतयाताऽइत्यप चैतयातै । अग्ग्ने । प्रियम् । पार्थः । अपि । इतम् ॥ 17 ॥

सरलार्थः

हे द्योतमान् आहवनीय अग्ग्ने ! सर्वैः पक्षिभिः गृह्यमानं द्योतमानम् आहवनीयम् अग्निं यस्यां पश्चिमायां दिशि विशायां स्थापितवान्, तमेव पश्चिमदिशास्थं परिधिं सम्प्रति अहम् अग्नौ स्थापयामि, अयमेव परिधिः वेदितः बहिर्न गच्छेत्, इति ध्यानं निधाय अग्नेः प्रियम् अन्नं तमेव परिधिं सम्प्राप्नुयाम् अयं शुक्लयजुर्वेदस्य द्वितीयाध्यायस्य सप्तदशीयम् मन्त्रं पठित्वा दक्षिणम् उतरं च परिधिम् अग्नौ प्रक्षिपेत् ॥ 17 ॥

मन्त्रः

सं स्रवभागास्स्थेषाबृहन्तः प्प्रस्तरेष्ठाः परिधेयाश्च्चदेवा ।
इमांव्वाचमभिविश्श्वेगृणन्तऽआसद्यास्मिन्नबर्हिषिमादयद्ध्वं स्वाहाव्वाट् ॥

शु. य. वे. अ. 2 मन्त्र. 18 ॥

पदपाठः

सं स्रवभागाऽइतिसं स्रवभागाः । स्थ । इषा । बृहन्तः । प्रस्तरेष्ठाः । प्रस्तरेस्थाऽइतिप्रस्तरे स्पाः । परिधेयाऽइतिपरि धेयाः । च । देवाः ॥ इमाम् । व्वाचम् । अभि । विश्श्वे । गृणन्तः । आसद्यत्या सद्य । अस्मिन् । बर्हिषि । मादयद्ध्वम् । स्वाहा । व्वाट् ॥ 18 ॥

सरलार्थः

हे विश्वदेवाः ! आहुतीनां प्रदानस्य समये अग्नेः बहिः पतितस्य हविरन्नस्य भगवान् त्वं संस्रवः भव तथापि त्वं सर्वस्मात् हपिरन्नत्वाद् महान् वर्तसे । त्वत्तः केचन दर्भासनस्य उपरि उपदेशकाः सन्ति तथा च केचन परिधिस्थिताः वर्तन्ते । भवन्तः सर्वे मया कृतां स्तुतिं प्रशंसन्तु । भवान् अस्य धर्मासनस्य उपरि उपविश्य अनेन हविरन्नेन सन्तुष्टो भव । विश्वेदेवानां कृते इयं प्रथमा आहुतिरस्ति ॥ 18 ॥

मन्त्रः

घृताचीस्स्थोधुर्ष्यौपातध्सुम्नेस्स्थःसुम्मनेमाधत्तम् ।
षज्ञनमश्च्चतऽउपचषज्ञस्यशिवेसन्तिष्ठस्वस्विष्टेमेसन्तिष्ठस्व ॥

शु. य. वे. अ. 2 मन्त्र. 19 ॥

पदपाठः

घृताचीऽइतिघृताची । स्थः । धृर्ष्यौ । पातम् । सुम्नेऽइतिसुम्मने । स्थः । सुम्मने । मा । धत्तम् ॥ षज्ञ । नमः । च । ते । उप । च । षज्ञस्य । शिवे । सम् । तिष्ठस्व । स्विष्टऽइतिसु इष्टे । मे । सम् । तिष्ठस्व ॥ 19 ॥

सरलार्थः

हे जुहूः उपभृत् ! युवां द्वौ घृतेन प्रक्षिप्तौ वर्तेथे । तां जुहूं हविर्धानस्य शकटस्य धुरायाम् उपरि संस्थाप्य युवां द्वौ अनयोः अनडुहोः विपत्तितः रक्षणं कुरुतम् । आवयोः समीपे युवयोः कृते स्वर्गासुखं स्थापयतम् । हे यज्ञ ! अहं त्वां सदा नमस्कारोमि । यज्ञस्य अस्य कृते अधिकानि कार्याणि कृतानि तदा वयं क्षमां प्रार्थिनः स्मः । हे यज्ञ ! भवतः उपचयो भवतु । अस्य यज्ञस्य कृते काचिद् न्यूनता स्यात् तदा पूर्तिं विदधातु । हे यज्ञ ! त्वं मम यजमानस्य कल्याणं नितरां सततं च कुरु ॥ 19 ॥

मन्त्रः

अग्ग्नेदब्धायो शीतमपाहिमादिद्योः पाहिप्प्रसित्त्यैपाहिदुरिष्ट्यैपाहिदुरदूमन्न्याऽअविषन्नः
पितुङ्कृणुसुषदाषोनौस्वाहाव्वाडग्ग्नयेसंव्वेशपतयेस्वाहासरस्वत्यैषशो भगिन्न्यैस्वाहा ॥

॥ शु. य. वे. अ. 2 मन्त्र. 20 ॥

पदपाठः

अग्ग्ने । अदब्धायोऽइत्त्यदब्ध आयो । अशीतम् । अशितमेत्यशितम । पाहि । मा । दिद्द्योः । प्रसित्त्याऽइतिप्र सित्त्ये । दुरिष्ट्याऽ इतिदुःईष्ट्यै । दुरदम्न्याऽहितिदुः अद्म्न्यै । अविषम् । नः । पितुम् । कृणु ॥ सुषदा । सुसदेतिसु सदा । षोनौ । स्वाहा । व्वाट् । अग्ग्नये । सँव्वेशपतयऽइतिसँव्वेशपतये । स्वाहा । सरस्वत्यै । षशोभगिन्न्याऽइतियशः भगिन्न्यै । स्वाहा ॥ 20 ॥

सरलार्थः

हे अहिंसितयजमानस्य अग्ने ! हे सर्वभुक् ! त्वं मम अशनिपातेन रक्षणं कुरु, तथा भवान् मृत्युजालेन च मम रक्षणं नित्यं करोतु । हे अग्ने ! त्वं मम अन्नं विपरहितं कुरु । हे अग्ने ! भवान् सुखेन युक्ते गृहे स्थापितं करोतु । अग्नेः कृते इयं प्रत्यक्ष आहुतिरस्ति, तथाच भगवतः (अग्नि-देवस्य) निमित्ता अप्रत्यक्षा आहुतिरपि वर्तते । सर्वस्य भोगस्य कामनायै आवां दम्पती एकस्मिन् शयने अर्थे अधिदेवतायाः कृते इयम् आहुतिरस्ति, इयं यशो भगिन्याः भगवत्याः सरस्वत्याः कृते इयमाहूतिरस्तु ॥ 20 ॥

मन्त्रः

व्वेदोसिषेनत्त्वन्देवव्वेदेवेब्भ्योव्वेदोभवस्तेनमहष्षंव्वेदोभूयाः ।
देवागातुविदोगातुंव्वित्त्वागातुमित । मनसस्प्पतऽइमन्देवषज्ञ-स्वाहाव्वातेधाः ॥

शु. य. वे. अ. 2 मन्त्र. 21 ॥

पदपाठः

व्वेदः । असि । षेन । त्वम् । देव । व्वेद । देवेब्भ्यः । व्वेदः । अभवः । तेन । महष्षम् । व्वेद । भूयाः । देवाः । गातुविदऽइतिगातु व्विदः । गातम् । व्वित्त्वा । गातुम् । इत । मनसः । पते । इमम् । देव । षज्ञम् । स्वाहा । व्वाते धाः । ॥ 21 ॥

सरलार्थः

अस्य यज्ञस्य यजमानस्य पत्नी दर्भमुष्टेः ग्रहणं करोति कथयति यद्-हे दर्भमुष्टे ! त्वं समस्ता ज्ञानस्वरुपा वर्तसे । हे देव ! भवती भगवती सरस्वती एव सर्वेभ्यः देवेभ्यः ज्ञानं ददौ । तस्मै हेतवे मध्यमपि सम्पूर्णं ज्ञानं ददातु । अस्य यज्ञस्य ज्ञातारः सर्वे देवाः यज्ञस्य भागं गृहीत्वा एतस्माद् यज्ञस्थानात् स्वर्गं गच्छन्तु । हे मनसो द्योतमान् चन्द्रः । भवानपि अस्माकम् इमं यज्ञं वायौ धारयतु । अतः अस्मिन् यज्ञे इयम् आहुतिः चन्द्रस्य कृते प्रदत्ता वर्तते ॥ 21 ॥

मन्त्रः

सम्बर्हिरङ्क्ताँहविषाघृतेनसमादित्त्यैर्व्वसुभिः सम्मरुद्भिः ।
समिन्द्रोव्विश्श्वदेवेभिरङ्क्तान्दिव्व्यन्नभोगच्छतुषत्स्वाहा ॥

॥ शु. य. वे. अ. 2 मन्त्र. 22 ॥

पदपाठः

सम् । बर्हिः । अङ्क्ताम् । हविषा । घृतेन । आदित्यैः । व्वसुभिरितिवसुभि । मरुद्भिरितिमरुत्भिः ॥ इन्द्रः । व्विश्श्वेदेवेभिरितिविश्श्वदेवेभिः । अङ्क्ताम् । दिव्वयम् । नभः । गच्छतु । षत् । स्वाहा ॥ 22 ॥

सरलार्थः

सह नाववतु । सहनौ भुनक्तु । सहवीर्यं करवावहै । तेजस्विनावधीतमस्तु । मा विद्विषावहै ।

इति मन्त्रस्य भावं धारयन् मन्त्रोऽयं सर्वेभ्यः मानवेभ्यः उपदेशं ददाति यद् - सर्वे (द्वादश-आदित्याः), अष्टवसवः सर्वे मरुतः, एवं विश्वेदेवाः एकमतिं कृत्वा स्वर्गराजः इन्द्रः हविषा घृतेन च आप्लुतान् करोतु, अनेन हविषा घृतेन च आप्लुतः दर्भः दिव्यज्योतिर्युक्तं कर्मसाक्षिणं जगत्साक्षिणं भुवनभास्करं सप्तभिः अश्वैः आरुढं सूर्यं प्राप्नोतु ॥ 22 ॥

मन्त्रः

कस्त्वाविमुञ्चतिसत्त्वाविमुञ्चतिकस्मैत्त्वाविमुञ्चतितस्मैत्त्वाविमुञ्चति । पोषायरक्षसाम्भागोसि ॥

शु. य. वे. अ. 2 मन्त्र. 23 ॥

पदपाठः

कः । त्वा । वि । मुञ्चति । सः । कस्मै । तस्मै ॥ पोषाय । रक्षसाम् । भागः । असि ॥ 23 ॥

सरलार्थः

इमां प्रणीतां वेदितः दूरं स्वगृहं नयन् यज्ञस्य यजमानः कथयति यद्-हे प्रणीते ! कः देवः त्वां कर्मभ्यः विमुक्तां कर्तुम् अर्हति । सः प्रजापतिः त्वाम् अस्माद् यज्ञाद् विमोक्तुं शक्नोति ? सः प्रजापति कस्य कृते त्वां विमुक्तां कर्तुम् अर्हति । तस्य एव कृते त्वामहं विमुक्तां करोमि । हे प्रणीते ! अहं त्वां प्रणीतां सन्तानादीनां पोषणाय भरणाय विमुक्तां करोमि । कृष्णाजिने मृगचर्मणि प्रोक्षणात् पतितस्य पुरोडाशस्य हे कणभागाः ! भवन्तः राक्षसानां कृते भागाः सन्ति, तानेव प्राप्नुवन्तु ॥ 23 ॥

मन्त्रः

संव्वर्चसापयसासन्तनूभिरगन्नमहिमनसाꣳशिवेन । त्वष्टासुदत्रोव्विदधातुरायोनुमाष्टुतन्वोषद्विलिष्टम् ॥

॥ शु. य. वे. अ. 2 मन्त्र. 24 ॥

पदपाठः

सम् । व्वर्चसा । पयसा । सम् । तनूभिः । अगन्नमहि । मनसा । सम् । शिवेन । त्वष्टा । सुदत्रऽ इतिसुदत्रः । वि । दधातु । रायः । अनु । मार्ष्टु । तन्वः । षत् । व्विलिष्टमितिवि लिष्टम् ॥ 24 ॥

सरलार्थः

सर्वविधस्य सुखस्य प्राप्तये मन्त्रोऽयं सर्वविधानि सुखानि ददाति, तस्य मन्त्रस्य भावोऽयं वर्तते यद्-हे त्वष्टः ! वयं ब्रह्मवर्चस्विनः भवेम, वयं नितरां प्राप्तदुग्धप्रदातृगावो भवेम पुत्रादीन् वयं सम्प्राप्नुयामः, अस्माकं सदा कल्याणं भवेत्, तदर्थं वयं सर्वे प्रयुक्तमनसः संगताः भवामः, अनेन (सर्व-विधस्य) सुखस्य प्रदाता भगवान् त्वष्टा धनम् अस्मभ्यं ददातु तया अस्माकम् शरीरे ये ये विकाराः सन्ति तैः विकारैः वयं सुस्वरूपाः भवामः ॥ 28 ॥

मन्त्रः

दिविव्विष्णुर्व्व्यक्रꣳस्तनागतेनच्छन्दसाततोनिर्भक्तोषोस्मान्द्वेष्टियञ्चव्वयन्द्विष्मोन्तरिक्षेव्विष्णुर्व्व्यक्रꣳतुत्रैष्टु भेनच्छन्दसाततोनिर्भक्तोषोस्मान्द्वेष्टियञ्चव्वयन्द्विष्मोस्मादन्नादस्यैप्रतिष्ठायाऽ अगन्नमस्वः सञ्ज्योतिषाभूम ॥

शु. य. वे. अ. 2 मन्त्र. 25 ॥

पदपाठः

दिवि । व्विष्णुः । व्वि । अक्रꣳस्त । जागतेन । छन्दसा । ततः । निर्भक्तऽ इतिनिः भक्तः । अन्तरिक्षे । त्रैष्टुभेन । त्रैस्तुभेनेतित्रैस्तुभेन । पृथिव्व्याम् । गायत्रेण । अस्म्मात् । अन्नात् । अस्मै । प्रतिष्ट्टायै । प्रतिस्थायाऽइतिप्रतिस्थायै । अगन्नम । स्वरितिस्वः । सम् । ज्योतिषा । अभूम ॥ 25 ॥

सरलार्थः

भगवतः विष्णोः त्रयाणां पादानां क्रमणं करोमि । वेदितः पूर्वस्यां दिशि सार्धत्रीन् पादान् संस्थापयामि । जगती छन्दोरूपेण पादेन यज्ञस्य देवेन भूलोके एक पादः स्थापितः तदा ततः एव सः दुष्टो भागरहितः विहितः । यः अस्माभिः सः द्वेषं करोति तथा वयमपि तेनैव सह द्वेषं कुर्मः । त्रिष्टुप्छन्दोरूपेण द्वितीयेन पादेन यज्ञस्य देवेन भगवता विष्णुना अन्तरिक्षे लोके द्वितीयः पादः स्थापितः यः अस्माकं द्वेषं करोति, तस्य एव द्वेषं वयं कुर्मः । गायत्रीच्छन्दोरुपेण तृतीय पादेन

भगवतः विष्णुना पृथ्वी समतिक्रान्ता, तस्मिन्नेव समये सः दृष्टः ततः पृथ्वीतः भागहीनो जातः । यः अस्माभिः सह ईर्ष्यां करोति, तेन सह वयमपि ईर्ष्यां कुर्महे । अनेन प्रकारेण प्रकाशवर्षारूपेण अन्नादिना तथा स्थितिप्रदानस्यदात्री अनया यज्ञभूम्या विहीना संजाता । भगवतः (विष्णु-देवस्य) दयया वयं स्वर्गं प्राप्तवन्तः तथा भुवनभास्करस्य सूर्यस्य ज्योतिषा सह एकत्वं प्राप्ताः ॥ 25 ॥

मन्त्रः

स्वयम्भूरसिश्रेष्ठोरश्मिर्वर्च्चोदाऽअसिवर्च्चोमेदेहि । सूर्ष्यस्यावृतमन्वावर्त्ते ॥

शु. य. वे. अ. 2 मन्त्र. 26 ॥

पदपाठः

स्वयम्भूरितिस्वषम् भूः । असि । श्रेष्ठः । रश्मिः । वर्च्चोदाऽइतिवर्च्च दाः । असि । वर्च्चः । मे । देहि ॥ सूर्ष्यस्य । आवृतमित्त्याव्वृतम् । अनु । आ । व्वर्त्ते ॥ 26 ॥

सरलार्थः

हे सूर्य ! त्वम् अन्येन केनापि अनिष्पन्नो भूत्वा स्वयमेव समुत्पन्नोऽसि । हे हिरण्यगर्भस्य प्रधानरश्मे ! त्वमेव स्वयं श्रेष्ठः रश्मी वर्तसे । त्वमेव ब्रह्मवर्चसः प्रदाता असि, अतः भवानेव मध्यं ब्रह्मवर्चः संप्रददातु । अहं यजमानः सूर्यस्य आवर्तनस्य समानमेव आवर्तनं नाम प्रदक्षिणां करोमि ॥ 26 ॥

मन्त्रः

अग्ग्नेगृहपते । सुगृह्यपतिस्त्वयाग्ग्नेहङ्गृहपतिनाभूयास सुगृहपतिस्त्वम्मयाग्ग्नेगृहपतिनाभूयाः । अस्थूरिणौगार्हपत्त्यानिसन्तुशत हिमाः सूर्ष्यस्यावृतमन्वावर्ते ॥

॥ शु. य. वे. अ. 2 मन्त्र. 27 ॥

पदपाठः

अग्ग्ने । गृहपतऽइतिगृहपते । सुगृहपतिरितिसुगृहपतिः । त्व्या । अग्ग्ने । अहम् । गृहपतिनेतिगृहपतिन । भूयासम् । सुगृहपतिरितिसुगृहपतिः । त्वम् मया । अग्ग्ने । गृहपतिनेतिगृहपतिना । भूयाः ॥ अस्थूरि । नौ । गार्हपत्त्यानीतिगार्हपत्त्यानि । सन्तु । शतम् । हिमाः ॥ 27 ॥

सरलार्थः

हे गार्हपत्याग्ने ! भवान् सर्वेषां जीवानां गृहस्य शोभनतमः पालको वर्तते । हे अग्ने ! त्वया गृहपालकेन सह अहम् अपि यजमानस्य सुष्ठु गृहपालको भवामि । हे अग्ने ! त्वमपि मम गृहपतिद्वारा सुष्ठु गृहपतिः भवतु । हे अग्ने ! आवां द्वौ गृहपालकादिकस्य कार्यस्य सम्यग् निर्वाहं करिष्यावः, यथा एकेन अनडुहा आकृष्टा धुरा रथस्य स्थाने द्वौ अनड्वाहौ शोभनतया शकटं वोढुं समर्थौ भवतः । वयमपि शतवर्षपर्यन्तं संमताः भविष्यामः । यथा-भुवनप्रदीपः सूर्यः पृथिव्याः प्रदक्षिणां करोति, तथैव अहमपि प्रदक्षिणां करोमि ॥ 27 ॥

मन्त्रः

अग्ग्नेव्रतपते व्व्रतमचारिषन्तदशकन्तन्मेराधीदमहंष्षऽएवास्मिसोस्मि ॥

शु. य. वे. अ. 2 मन्त्र. 28 ॥

पदपाठः

अग्ग्ने । व्व्रतपते । व्रतम् । अचारिषम् । तत् । अशकम् । तत् । मे । अराधि । इदम् । अहम् । षः । एव । अस्मि । सः । अस्मि ॥ 28 ॥

सरलार्थः

हे वृतानां पालकाग्ने ! अहम् अस्य यज्ञरूपस्य व्रतस्य आचरणं कृतवान् । अहं यथाविधि आचरितस्य व्रतस्य समाप्तिं करिष्यामि । तदेव आचरितं व्रतं फलरूपेण संमतं करोतु । सम्प्रति तस्य यज्ञस्य विसर्जनं कृत्वा अयम् अहं स एव अस्मि, यत्-पूर्वस्मिन् जन्मनि मनुष्यो भूतः ॥ 28 ॥

मन्त्रः

अग्ग्नयेकव्व्यवाहनाय । स्वाहासोमायपितृमतेस्वाहा । अपहताऽअसुरारक्षाꣳसिव्वेदिषदः ॥

शु. य. वे. अ. 2 मन्त्र. 29 ॥

पदपाठः

अग्ग्नये । कव्व्यवाहनायेतिकव्व्यव्वाहनाय । स्वाहा । सोमाय । पितृमतऽइतिपितृमते । स्वाहा अपहताऽइत्यपहताः । असुराः । रक्षा-सि । व्वेदिषदः । व्वेदिसदऽइति वेदिसदः ॥ 29 ॥

सरलार्थः

मम समस्तानां पितृणां कव्यस्य वहनाय समर्थाय अग्निदेवाय इयम् आहुतिः अस्ति । पितृयुक्ताय सोमाय इयम् आहुतिः वर्तते । वेद्याम् उपरि उपवेशनं कुर्वाणाः सर्वे असुराः राक्षसादयः अपसारिताः अभवन् ॥ 29 ॥

मन्त्रः

षेरुपाणि । प्प्रतिमुञ्चमानाऽअसुराः सन्तः स्वधयाचरन्ति ।
परापुरोनिपुरोषेभरन्त्यग्गिनष्टांल्लोकात्प्रणुदात्यस्म्मात् ॥

शु. य. वे. अ. 2 मन्त्र. 30 ॥

पदपाठः

षे । रुपाणि । प्रतिमुञ्चमानाऽइतिप्रति देवेब्भ्यमुञ्चमानाः । असुराः । सन्तः । स्वधया । चरन्ति ॥ परापुरऽइतिपरापुरः । निपुरऽइतिनिपुरः । षे । भरन्ति । अग्निः । तान् । लोकात् । प्र । नुदाति । अस्म्मात् ॥ 30 ॥

सरलार्थः

विविधानां स्वरूपाणां धारणं कृत्वा यः असुरजनः सर्वेषां पितृजनानां कृते स्वधायाः भक्षणेन स्वजीवनस्य धारणं करोति, तान् सर्वान् असुरादीन् राक्षसान् अस्मात् स्थानात् अग्निदेवः सुदूरं करोति ॥ 30 ॥

मन्त्रः

अत्रपितरोमादयद्ध्वंषथाभागमावृषायद्ध्वम् । अमीमदन्तपितरोषथाभागमावृषायिषत ॥

शु. य. वे. अ. 2 मन्त्र. 31 ॥

पदपाठः

अत्र । पितर । मादयद्ध्वम् । षथाभागमितियथाभागम् । आ । व्वृषायद्ध्वम् । व्वृषयद्ध्वमितिवृष षद्ध्वम् ॥ अमीमदन्त । पितरः । षथाभागमितियथा भागम् । आ । अवृषायिषत ॥ 31 ॥

सरलार्थः

हे सर्वे पितरः ! भवन्तः सर्वे अस्मिन् (पिण्ड-स्थले) आनन्दिताः भवन्तु । यूयं सर्वे पितरः स्वस्य स्वस्य भागस्य पिण्डं वृषभवद् यथारुचि भक्षणं कुरुत । पितृजनाः समे हर्षान्विताः सञ्जाताः । तैः सवैः पितृभिः वृषभसमानम् इच्छानुसारं स्वस्य पिण्डस्य भक्षणं कृतमस्ति ॥ 31 ॥

मन्त्रः

नमोवःपितरोरसायनमोवः पितरः शोषायनमोवः पितरोजीवायनमोवः पितरः स्वधायैनमोवः पितरोघोरायनमोवः पितरोमन्न्यवेनमोवः पितरः पितरोनमोवोगृहान्नः पितरोदत्तसतोवः पितरोदेष्म्मैतद्वः पितरोव्वासः ॥

शु. य. वे. अ. 2 मन्त्र. 32 ॥

पदपाठः

नमः । व्वः । पितरः । रसाय । शोषाय । जीवाय । स्वधायै । घोराय । मन्न्यवे । नमः । व्वः । पितरः । पितरः । नमः । वः । गृहान् । नः । पितरः । दत्त । सतः । व्वः । पितरः । देष्म्म । एतत् । व्वः । पितरः । व्वासः ॥ 32 ॥

सरलार्थः

षड्ऋतवः एव षट् पितरः सन्ति, इति सर्वे आमनन्ति एतस्मात् कारणात् षड्वारं नमस्कारं कुर्वाणः यज्ञस्य यजमानः कथयति यद् हे पितरः ! भवते रसभूताय वसन्ताय ऋतवे नमोऽस्तु । हे पितरः ! भवन्तं शोषणं कुर्वन्तं ग्रीष्मं नमस्करोमि । हे पितरः ! भवते जीवनदायिने वर्षर्तवे नमोऽस्तु । हे पितरः ! अहं त्वाम् अन्नपाचकं शरदृतुं नमस्करोमि । हे पितरः ! तुभ्यं घोरस्वरुपाय हेमन्ताय नमस्कारो भवतु । हे पितरः ! अहं भवन्तं शीतप्रधानस्य कारणं शिशिरं ऋतुं नमस्करोमि । हे पितरः ! भवान् अस्मभ्यं स्त्रीपुत्रादिकं धनं ददातु । हे पितरः ! अस्माकं गृहे अन्नादित्वेन एव वयं भवते पिण्डादिकं दानं कर्तुं समर्थाःस्मः ॥ अनेन कारणेन भवान् अस्मभ्यम् अन्नादिकं प्रददातु । हे पितरः ! तुभ्यं वयं वस्त्रं समर्पयामः एतावता भवान् वस्त्रं धारयतु ॥ 32 ॥

मन्त्रः

आधत्त पितरोगर्ब्भङ्कुमारम्पुष्करस्रजम् । षथेहपुरुषोसत् ॥

शु. य. वे. अ. 2 मन्त्र. 33 ॥

पदपाठः

आ । धत्त । पितरः । गर्ब्भम् । कुमारम् । पुष्करस्रजमितिपुष्कर स्रजम् । षपा । इह । पुरुषः । असत् ॥ 33 ॥

सरलार्थः

हे पितरः ! कमलपुष्पाणां मालां धारयन्तः अश्विनीकुमारवत् पुत्ररूपं गर्भं त्वं मम गृहपत्न्यां धारिताः भवन्तु । येन प्रकारेण सा मम गृहे पुरुषाणां संख्यां पूरयका भवतु ॥ 33 ॥

मन्त्रः

ऊर्ज्जंव्वहन्तीरमृतङ्घृतम्पयः कीलालम्परिस्रुतम् । स्वधास्थतर्प्पयतमे पितृन् ॥

शु. य. वे. अ. 2 मन्त्र. 34 ॥

पदपाठः

ऊर्ज्जम् । व्वहन्ती । अमृतम् । घृतम् । पयः । कीलालम् । परिस्रुतमितिपरिस्रुतम् । स्वधाः । स्प । तर्प्पयत । मे । पितृन् ॥ 34 ॥

सरलार्थः

हे आपः ! अन्नम्, अमृतम्, घृतम्, दुग्धम्, रसः, सुरा, एतेषां सर्वेषां वहनं कुर्वन्त्यः स्वधारूयाः भवन्तु तथा अस्माकं सर्वेभ्यः पितृभ्यः पूर्णतया जीविताय जलस्य दानं कुर्वन्तु ॥ 34 ॥

शब्दार्थः

पणिभिः - असुरैः । **पाथः** - अन्नस्य नामधेयम् । **अमीतम्** - अपिगच्छतम् । **संस्रवभागाः** - संस्रवभागाः येषां ते इति संस्रवभागाः विश्वेदेवाः । **बृहन्तः** - महान्तः । **परिधेयाः** - परिधिभवाः देवा । **मादयध्वम्** - हर्षम् अवाप्नु-ध्वम् । **विश्वे** - सर्वो अभिगृणन्तः + स्तुतिं कुर्वन्तः । **घृताचीः** - घृत्तम् अञ्चाति इति । **धुर्यो** - धुरिभवौ । **सुम्ने** - सुखाय । **स्विष्टम्** - साधुइष्टम् । **अदब्धः** - खण्डितरहितः । **अशीतमः** - अतिशयेन व्यापकः । **विद्योः** - एकं वज्रस्य नामधेयम् । **सरस्वती** - सरोज्ञानम् अस्ति यस्यां सा । **गातुविदः** - गातुवेतारः । **वित्त्वा** - ज्ञानं कृत्वा । **मनसस्पतेः** - (मनोद्योतमान-चन्द्रस्य) । **दिव्यम्** - दिविभवम् । **बर्हिः** - विराड्रूपा त्रिष्टुप् । **हविषा** - घृतेन । **रक्षसाम्** - राक्षसा-नाम् । **भागः** - हविरन्नस्य कणः । **तनूभिः** - शरीरैः । **त्वष्टा** - इन्द्रः । **सुदत्रः** - प्रदात्ता । **दिवि** - स्वर्ग । **त्रैष्टभेनः** - तन्नाम केन छन्दसा । **निर्भक्तः** - निर्गतभागः । **रश्मि** - किरणः । **आवृतम्** - प्रदक्षिणा । **वर्चोदाः** - ब्रह्मवर्चस्विनः प्रदातारः । **सुगृहपतिः** - सुष्ठुगृहस्थः । **हिमाः** - वर्षाणि । **कव्यवाहनाय** - क्रान्तदर्शिनां वाह-नाय । **सोमाय** - पितृमहे । **वैदिषदः** - यज्ञस्य वेद्यां सीदन्ति । **अपहताः** - दूरीभूताः । **परापुरः** - पराक्रान्ताः पुरः शरीराणि । **जीवाय** - जीवनस्य हेतुभूताय । **मन्युः** - क्रोधः । **घोराय** - समरहिताय । **पुष्करस्त्रजम्** - कमलानां मालां पद्मानां । **कीलालम्** - अन्नरसम् ।**परिस्रुतम्** - सुरापानम् ।

स्वाध्यायः

1. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) पक्षिभिः गृह्यमानः कस्यां दिशायां परिधिं स्थापयामि ?

(क) पश्चिमायाम् (ख) पूर्वस्याम् (ग) उत्तरस्याम् (घ) दक्षिणस्याम्

(2) कस्मात् पतितः हविरन्नस्य भागो वर्तते ?

(क) पात्रात् (ख) अग्नेः (ग) हस्तात् (घ) पञ्चपात्रात्

(3) युवां द्वौ केन प्रक्षिप्तौ वर्तये ?

(क) पुरोडाशेन (ख) पयसा (ग) घृतेन (घ) जलेन

(4) भवान् मम रक्षणं कस्मात् करोतु ?

(क) भोगेन भोगात् (ख) सुखेन सुखात् (ग) अन्नेन अन्नात् (घ) मृत्युना मृत्योः

(5) दर्भमुष्टिः का स्वरूपा वर्तते ?

(क) ज्ञानस्वरूपा (ख) अन्नस्वरूपा (ग) लक्ष्मीस्वरूपा (घ) मानवरूपा

(6) आदित्याः कति सन्ति ?

(क) 11 (ख) 10 (ग) 12 (घ) 14

(7) प्रणीतां केन कारणेन विमुक्तां करोमि ?

(क) स्वर्गाय (ख) धनाय (ग) पोषणाय (घ) कामाय

(8) वयं कीदृशाः भवेम् ?

(क) आयुष्मन्तः (ख) रोगिणः (ग) धनिनः (घ) ब्रह्मवर्चस्विनः

(9) अन्तरिक्षे भगवता विष्णुना कः पादः स्थापितः ?

(क) द्वितीयः (ख) तृतीयः (ग) प्रथमः (घ) चतुर्थः

(10) सूर्यः कस्य प्रदाता वर्तते ?

(क) इच्छायाः (ख) ब्रह्मवर्चसः (ग) धनस्य (घ) जलस्य

2. निम्नाङ्कितानाम् (एक-वाक्येन) उत्तराणि लिखत ।

(1) पश्चिमदिशास्थं परिधिं कस्मिन् स्थापयति ?

(2) विश्वेदेवाः कस्यासने उपविष्टाः सन्ति ?

(3) आवयोः समीपे युवां किं स्थापयतात् ?

(4) इयम् आहुतिः कस्याः कृते वर्तते ?

(5) सर्वे देवाः एतस्माद् (यज्ञ-स्थानात्) कुत्र गच्छन्तु ?

(6) स्वर्गराजः इन्द्रः केन आप्लुतान् करोतु ?

(7) अन्नस्य कणभागाः केषां कृते सन्ति ?

(8) केन पादेन भगवता विष्णुना समतिक्रान्ता ?

(9) जगतीच्छन्दोरूपेण विष्णुना कुत्र पादः स्थापितः ?

(10) गार्हपत्याग्निः कस्य पालको वर्तते ?

3. निम्नाङ्कितानां मन्त्राणां भावार्थं लिखत ।

(1) अग्ग्नेदब्धायो । शीतमपाहिमादिद्योः पाहिप्रसित्यैपाहिदुरिष्ट्यै पाहिदुरहमन्याऽ अविषन्नः पितुङ्कृणु सुषदायोनौ स्वाहाव्वाडग्ग्नयै संव्वेशपतयेस्वाहा सरस्वत्यैषसोभगिन्यैस्वाहा ॥ शु. य. वे. अ. 2 मन्त्र. 20 ॥

(2) अग्ग्नेगृहपते सुगृहपतिस्त्वयाग्ग्नेहङ्गृहपतिनाभूयासꣳ सुगृहपतिस्त्वम्मयाग्ग्नेगृहपतिना भूयाꣳ ॥ अस्थूरिणौगार्हपत्यानि सन्तशतꣳ हिमाꣳ सूर्य्यस्यावृतमन्वावर्त्ते ॥ शु. य. वे. अ. 2 मन्त्र. 27 ॥

(3) ऊर्ज्जव्वहन्तीरमृतङ्घृतम्पयः कीलालम्परिस्रुतम ॥
स्वधास्थतर्प्पयतमे पितृन् ॥ शु. य. वे. अ. 2 मन्त्र. 38 ॥

4. (निम्नलिखित-मन्त्राणां) पूर्तिः विधेया ।

(1) कस्त्वाव्विमुञ्चति .... रक्षसाम्भागोसि ॥ 23 ॥

(2) अग्ग्नयेकव्व्यवाहना .... सिव्वेदिषदः ॥ 29 ॥

(3) अत्रपितरोमादय .... गमावृषायिषत ॥ 31 ॥

5. निम्नाङ्कितशब्दरूपाणां परिचयं यच्छत ।

(1) परिधिम् (2) बृहन्तः (3) सुम्ने (4) अग्ने (5) देवेभ्यः (6) घृतेन (7) कस्मै (8) पयसा (9) वयम् (10) सूर्यस्य

6. निम्नाङ्कितानां धातुरुपानां परिचयं यच्छत ।

(1) भरामि (2) संनिष्ठस्व (3) पाहि (4) मादयध्वम् (5) भूयाः (6) गच्छत (7) विमुञ्चति (8) विदधातु (9) असि

7. सन्धिविच्छेदं करोतु ।

(1) परिधेयाश्च (2) नमश्च (3) अग्नेऽदब्धायः (4) संबार्हरङ्क्ताम् (5) वेदोऽसि (6) कस्त्वा (7) रायोऽनुमार्ष्टुम् (8) षोऽस्मान् (9) स्वयंभूतिरिति

8. सन्धि योजनं कुरुत ।

(1) पाथः + अपीतम् (2) वाचम् + अभि (3) दुर् + अद्मन्यै (4) वेदः + अभवः (5) भागः + असि (6) विश्वेदेवेभिः + अङ्क्तान् (7) तनूभिः + अगन्महि (8) द्विष्मः + अन्तरिक्षे (9) सूर्यस्य + आवृत्तम् (10) आवृतम् + अन्वावर्ते

छात्रप्रवृत्तिः

सप्ताश्वरथारूढस्य अरुणसारथेः भगवतः भास्करस्य स्वरूपं विद्यार्थिभ्यो ददातु ।

विशिष्ट ज्ञानम्

ऋचो यजुंषि सामानि, तपार्थः पादवाक्ययोः ।
श्रुतपश्चात्र याः प्रोक्ता योऽर्थवादश्च कर्मणः ॥

•

11 शुक्लयजुर्वेदे तृतीयोऽध्यायः (माध्यन्दिनीय) भाग-1

प्रस्तावना

सप्तहस्तश्चतुःश्रृङ्गः सप्तजिह्वो द्विशीर्षकः ।
त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥
स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा
बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्तं स्त्रुचं स्त्रुवम् ॥

अङ्गति नाम ऊर्ध्वं गच्छति इति अग्निः । नैकविधः अग्निरस्ति, तत्रापि यज्ञकर्मणि मुख्यत्वेन त्रिविधोऽग्निरस्ति यथा-गार्हपत्याग्निः आहवनीयाग्निः दक्षिणाग्निः । गार्हपत्याग्निः नाम गृहपतिना नित्यं संयुक्तो भवति सः गाहपत्याग्निः । इममेव अतिथिभूतम् अग्निं चारुपुरोडाशादिभिः यज्ञकुण्डे प्रज्वलितं कुर्मः । अयमेव अग्निः जीवानां शरीरे जठराग्निरूपेण वर्तते, अतः स एव अग्निदेवः जीवानां सुहृद् वर्तते, कथं यद्-शरीरस्थः अग्निः शरीरं कदापि भस्मान्तं न करोति, अपि तु अन्नस्य पाचनं कुर्वाणः शरीरं पोषयति रक्षति च । यज्ञकर्तृकैः आचार्यैः प्रज्वालितोऽग्निः अमृततुल्यं जलं सर्वेभ्यः प्रददाति, तेनैव जलेन वयम् अन्नं प्राप्नुमः अतो मन्त्रोऽयं वर्तते यद् -

अग्निम्मूर्धादिवः ककुत्पतिः पृथिव्याऽअयम् ।
अपाॅरेताॅसि जिन्वति ॥

इत्थं सर्वे विद्यार्थिनः वेदज्ञानेन सह जलस्य अन्नस्य च महत्त्वं प्राप्नुयुः इति विचारं हृदि निधाय शुक्लयजुर्वेदस्य तृतीयाध्यायस्य प्रथममन्त्राद् आरभ्य षोडशमन्त्राः प्रस्तूयन्ते ।

॥ अग्निहोत्रयागस्य चित्रम् ॥

प्रथमाकृतौ 'श्रौताग्निकुण्डं' ज्ञेयम् । द्वितीयायां तु 'स्मार्ताग्निकुण्डम्' ॥

1. आहवनीयकुण्डम् 6. ब्रह्मासनम्

2. आवसथ्यकुण्डम्

3. सभ्यकुण्डम्



2. स्मार्त् कुण्डम्

7. यजमानासनम्



4. गार्हपत्यकुण्डम्

5. दक्षिणाग्निकुण्डम्

'अथाऽग्निहोत्रशालाकुण्डरचनाप्रकारः' कुण्डरत्नप्रदीपे

मन्त्रः

समिधाग्ग्निन्दुवस्यतघृतैर्ब्बौधयतातिथिम् । आस्मिन्हव्याजुहोतन ॥

शु. य. वे.अ.-3 मन्त्र ॥ 1 ॥

पदपाठः

समिधेतिसम् इधा । अग्ग्निम् । दुवस्यत । घृतैः । बोधयत । अतिथिम् । आ । अस्मिन् । हव्या । जुहोतन ॥1॥

सरलार्थः

हे ऋत्विजादयः समिधाभिः अग्निदेवस्य परिचरितं कुर्वन्तु । इमम् अतिथिभूतम् अग्निं धृतस्य आहूतिभिः प्रज्वलितं कुर्वन्तु । अस्मिन् प्रज्वालिते अग्नौ विविधैः चारुपुरोडाशादिभिः द्रव्यैः होमं कुर्वन्तु । इमं मन्त्रं पठित्वा पिप्पलवृक्षस्य अष्टाङ्गुलिपरिमितां समिधां घृतेन अग्नौ आजुहोतु ॥1॥

मन्त्रः

सुसमिद्धायशोचिषे घृतन्तीव्रञ्जुहोतन । अग्नयेजातवेदसे ॥

शु.य.वे.अ. 3 मन्त्र. 2 ॥

पदपाठः

सुसमिद्धायेतिसु समिद्धाय । शोचिषे । घृतम् । तीव्रम् । जुहोतन । अग्नये । जातवेदसऽइतिजातव्वेदसे ॥ 2॥

सरलार्थः

हे ऋत्विजः । सर्वेण प्रकारेण जातवेदसे अस्मै अग्निदेवाय अत्यन्तं सुस्वादु शुद्धं घृतं प्रददतु ॥ 2॥

मन्त्रः

तन्त्वा समिद्भिरङ्गिरोघृतेनव्वर्द्धयामसि । बृहच्छोचाषविष्ठ्य ॥

शु.य.वे.अ. 3 मन्त्र. 3 ॥

पदपाठः

तम् । त्वा । समिद्धिरितिसमित् भिः । अङ्गिरः । घृतेन । व्वर्द्धयामसि ॥ बृहत् । शोच । षविष्ठ्य ॥ 3॥

सरलार्थः

हे अग्ने । वयं त्वां समिधाभिः तथा घृतस्य आहुतिभिः प्रवृद्धं कुर्महे । भवान् सदा सर्वदा सर्वथा च तरुणो भवतु, अनेन कारणेन वृद्धिं प्राप्तः अग्निः प्रदीप्तिं धारयतु ॥ 3॥

मन्त्रः

उपत्त्वाग्ग्नेहविष्म्मतीघृताचीर्ष्यन्तुहर्ष्यत । जुषस्वसमिधोमम ॥

शु.य.वे.अ.3 मन्त्र ॥ 4 ॥

पदपाठः

उप । त्वा । अग्ग्ने हविष्म्मतीः । घृताचीः । षन्तु । हर्ष्यत ॥ जुषस्व । समिधऽइतिसम् इधः । मम ॥ शु.य.वे.अ.3 मन्त्र ॥ 4 ॥

सरलार्थः

हे अग्ने । घृतेन प्रदीप्ता हविर्युक्ता । इयं समिधा त्वां सदा प्राप्नोतु । त्वमिमां तेजस्विनाम् समिधां प्रसन्नो भूत्वा सेवस्व ॥ 4॥

मन्त्रः

भूर्भुवः स्वद्यौरिवभूम्नापृथिवीवव्वरिम्णा ।
तस्यास्तेपृथिविदेवयजनिपृष्ठेग्निमन्नादमन्नाद्यायादधे ॥

शु.य.वे.अ. 3 मन्त्र ॥ 5॥

पदपाठः

भूः । भुवः । स्वः । द्यौरिवेतिद्यौः इव । भूम्ना । पृथिवीवेतिपृथिवी इव । व्वरिम्णा ॥ ते । पृथिवि । देवयजनीतिदेव षजनि । पृष्ठ्ठे । अग्निम् । अन्नादमित्यन्न अदम् । अन्नाद्यायेत्यन्न अद्याय । आ । दधे ॥ 5॥

सरलार्थः

हे अग्ने । त्वं सम्पूर्णायां पृथिव्याम्, सर्वस्मिन् अन्तरिक्षे स्वर्गे च एतेषु त्रिषु लोकेषु व्याप्तो वर्तसे । हे पृथिवि ! त्वं देवानां सर्वेषां यज्ञस्य योग्यो वर्तसे । तव पाठस्य उपरि श्रेष्ठानाम् अन्नानां सिद्धये अन्नभक्षकस्य गार्हपत्यादिनामकस्य अग्निदेवस्य स्थापनां करोमि ॥ 5॥

मन्त्रः

आयङ्गौ पृश्निरक्रमीदसदन्मातरम्पुरः । पितरञ्चप्रयन्त्स्वः ॥

शु. य. वे. अ. 3 मन्त्र. 6 ॥

पदपाठः

आ । अयम् । गौ । पृश्निः । अक्रमीत् । असदत् । मातरम् । पुर ॥ पितरम् । च । प्रयन्नितिप्रयन् । स्वरितिस्वः ॥ 6 ॥

सरलार्थः

अयम् अग्निः प्रत्यक्षः दृष्टो वर्तते, अयमेव अग्निदेवः यज्ञस्य सम्पन्नतायै यजमानस्य गृहे गमनशीलस्य अत्यन्तस्य ज्वालयुक्तस्य रूपस्य धारणं चकार तथा सर्वप्रकारेण आहवनीयस्य गार्हपत्यस्य दक्षिणाग्नेः स्थानेषु पादविक्षेपम् अकरोत् तथा पूर्वस्यां दिशायां पृथिवीं प्राप्तवान् वर्तते ॥ 6 ॥

मन्त्रः

अन्तश्चरतिरोचनास्यप्राणादपानती । व्यख्यन्महिषोदिवम् ॥

शु. य. वे. अ. 3 मन्त्र ॥ 7 ॥

पदपाठः

अन्तरित्यन्त । चरति । रोचना । अस्य । प्राणात् । अपानतीत्यप अनती ॥ वि । अख्यत् । महिष । दिवम् ॥ 7 ॥

सरलार्थः

अयम् अग्निः देवानां प्राणापानादीनां वायूनां व्यापारं कुर्वाणः शरीरस्य मध्ये गमनं करोति । अयं जठराग्निः एव शरीरे जीवनस्य रूपयुक्तो वर्तते । अनेन प्रकारेण वायुरूपेण सूर्यरूपेण च समस्तस्य संसारस्य उपरि अनुग्रहं कुर्वन् भगवान् यज्ञानुष्ठानस्य कृते प्रकाशितो भवति ॥ 7 ॥

मन्त्रः

त्रि ꣳ शद्धामविराजतिवाक्पतङ्गायधीयते । प्रतिवस्तोरहद्युभिः ॥

शु. य. वे. अ. 3 मन्त्र ॥ 8 ॥

पदपाठः

त्रि ꣳ शत् । धाम । वि । राजति । वाक् । पतङ्गाय । धीयते । प्रति । वस्तोः । अह । द्युभिरितिद्युभिः ॥ 8 ॥

सरलार्थः

या वाणी त्रिंशत्सु मुहूर्तरूपेषु स्थानेषु शोभते । सा एव वन्दनीया वाणी अग्निदेवस्य कृते उच्चरिता भवति । सा एव प्रत्यहं देवानां सर्वेषां स्तुतये सरस्वती यज्ञादीनां श्रेष्ठेषु कर्मसु अग्नि देवस्य एव स्तुतिं करोति, अतः ''ऋते ज्ञानाद् न मुक्तिः'' । इति सूक्तिः चरितार्था भवति ॥ 8 ॥

मन्त्रः

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्योज्योतिर्ज्योति सूर्यः स्वाहा ।
अग्निर्वर्चोज्योतिर्वर्चः स्वाहा सूर्योवर्चोज्योतिर्वर्चः स्वाहा ।
ज्योतिः सूर्यः सूर्योज्योतिः स्वाहा ॥

शु. य. वे. अ. 3 मन्त्र. 9 ॥

पदपाठः

अग्निः । ज्योतिः । ज्योतिः । अग्ग्निः । स्वाहा । सूर्य्यः । ज्योतिः । ज्योतिः । सूर्य्यः । स्वाहा अग्ग्निः । व्वर्च्चः । ज्योतिः । व्वर्च्चः । स्वाहा । सूर्य्यः । व्वर्च्चः । ज्योतिः । व्वर्च्चः स्वाहा ॥ ज्योतिः । सूर्य्यः । सूर्य्यः । ज्योतिः । स्वाहा ॥ 9 ॥

सरलार्थः

अग्निरेव ज्योतिरस्ति तथा ज्योतिरेव अग्निर्वर्तते, अनेन कारणेन तस्य ज्योतिर्मयस्य अग्निदेवस्य कृते इयम् आहुतिर्वर्तते । सूर्यः एव ज्योतिरस्ति एवं ज्योतिरेव सूर्यो वर्तते, तस्य भुवनभास्करस्य कर्मसाक्षिभूतस्य भगवतः सूर्य देवस्य कृते इयम् आहुतिर्वर्तते । अग्निरेव ब्रह्मवर्चरस्ति एवं ब्रह्मवर्चः एव अग्निर्वर्तते तस्य ब्रह्मवर्चो रूपस्य अग्निदेवस्य कृते इयम् आहुतिरस्ति । सूर्यः एव ब्रह्मवर्चः वर्तते, तथैव ब्रह्मवर्चरेव भगवान् सूर्यो वर्तते तस्य ब्रह्मवर्चोरूपस्य भगवतः सूर्यस्य कृते एषा आहुतिरस्ति । ज्योतिरेव सूर्यो वर्तते, एवं सूर्यः एव ज्योतिरस्ति, तस्य जीवनप्रदीपस्य भगवतः सूर्य्यस्य कृते आहुतिरियमस्ति ॥ 9 ॥

मन्त्रः

सजूर्द्देवेन सवित्रासजूरात्र्येन्द्रवत्त्या ॥ जुषाणोऽअग्ग्नि र्व्वेतुस्वाहा ।
सजूर्द्देवेन सवित्रा सजूरुषसेन्द्रवत्या ॥ जुषाणः सूर्य्यो व्वेतुस्वाहा ॥

शु. य. वे. अ. 3 मन्त्र. 10 ॥

पदपाठः

सजूरितिसजूः । देवेन । सवित्रा । सजूरितिसजूः । रात्र्या । इन्द्रवत्त्येन्द्रव्यत्या । जुषाणः । अग्ग्निः । व्वेतु । स्वाहा । उषसा । सूर्य्यः ॥ 10 ॥

सरलार्थः

कर्मसाक्षिभूतेन भगवता सूर्यदेवेन सह समाना प्रीतिः तथा इन्द्रवत्या रात्र्या सह समान प्रीति युक्ताय अग्नि देवाय प्रदत्तहविः सेवमाना इमाम् आहुतिं स्वीकरोतु, तस्य देवस्य कृते सुहुतं हविरेव भवतु । भगवता सवितृदेवेन सह समान प्रीतियुक्तेन स्वर्गराजेन इन्द्रेण सह समानां प्रीतिम् आपन्नः सूर्यः प्रदत्तं हविं सेवमानः एतत्प्रदत्तं हविः स्वीकरोति, तस्य भगवतः सूर्यस्य कृते इयम् आहुतिर्भवतु ॥ 10 ॥

मन्त्रः

उपप्प्रयन्तोऽ अद्ध्वरम्मन्त्रंव्वोचेमाग्ग्नये । आरेऽअस्म्मेचश्शृण्वते ॥

शु. य. वे. अ. 3 मन्त्र. 11 ॥

पदपाठः

उपप्प्रयन्तऽ इत्युपप्रयन्तः । अद्ध्वरम् । मन्त्रम् । व्वोचेम । अग्ग्नयो आरे । अस्म्मेऽइत्त्यस्म्मे । च । शृण्वते ॥ 11 ॥

सरलार्थः

यजन कर्मणि समाप्तः दूरीभूय च अस्माकं सर्वेषां जीवानां विषये ध्यानयुक्ताय अग्निदेवाय अस्य स्तोत्रस्य उच्चारणं कुर्मः ॥ 11 ॥

मन्त्रः

अग्ग्निर्म्मूर्द्धादिवः ककुत्पतिः पृथिव्व्याऽ अयम् ।
अपाँरेताँसिजिन्वति ॥

शु. य. वे. अ. 3 मन्त्र. 12 ॥

पदपाठः

अग्ग्नि । मूर्द्धा । दिवः । ककुत् । पतिः । पृथिव्व्याः । अयम् । अपाम् । रेताँसि । जिन्वति ॥ 12 ॥

सरलार्थः

अस्य आहवनीयाग्नेः वेदिस्थः अग्निः स्वर्गलोकस्य मूर्धा वर्तते । सः एव शीतांशुः चन्द्रः पृथिव्याः स्वामी अस्ति । स एव तारागणपतिः चन्द्रः भूलोकस्य अमृतस्य जलस्य सारो वर्तते ॥ 12 ॥

मन्त्रः

उभावामिन्द्राग्ग्नीऽ आहुवध्याऽ उभाराधसꣳ सहमादयद्ध्यै ।
उभादातारविषाᳬरयीणामुभाव्वाजस्यसातयेहुवेवाम् ॥

शु. य. वे. अ. 3 मन्त्र. 13 ॥

पदपाठः

उभा । व्वाम् । इन्द्राग्ग्नीऽइतीन्द्राग्ग्नी । आहुवद्ध्याऽ इत्याहुवद्ध्यै । उभा । राधसꣳ । सह । मादयद्ध्यै ॥ उभा । दातारौ । इषाम् । रयीणाम् । उभा । व्वाजस्या सातयै । हुवे । व्वाम् ॥ 13 ॥

सरलार्थः

हे इन्द्र ! हे अग्ने ! युवयोः द्वयोः इन्द्राग्न्योः आह्वानाय तथा हरिरन्नेव समं प्रसन्नस्य हेतवे अहं इन्द्रस्य अग्नि-देवस्य च वरणं करोमि । युवां द्वौ अन्नस्य तथा धनस्य प्रदातारौ वर्तेथे । अन्नस्य लाभाय अहं युवयोः द्वयोः आहवानं करोमि ॥ 13 ॥

मन्त्रः

अयन्तेयोनिर्ऋत्त्वियोषतोजातोऽ अरोचथाꣳ ।
तञ्ञानन्नग्ग्नऽआरोहाथानोव्वर्द्धयारयिम् ॥

शु. य. वे. अ. 3 मन्त्र. 14 ॥

पदपाठः

अयम् । ते । योनिः । ऋत्त्वियः षतः । जातः । अरोचथाꣳ । तम् । जानन् । अग्ग्ने । आ । रोह । अथ । नꣳ । व्वर्द्धय । रयिम् ॥ 14 ॥

सरलार्थः

हे आहवनीयाग्ने ! अयं सम्मुखो विद्यमानः गार्हपत्याग्निर्वर्तते, तस्य गार्हपत्याग्नेः उत्पत्तेः भूमिरस्ति यद्-येन उत्पन्नो भूत्वा त्वं देदीप्यमानोऽस्ति । हे अग्ने ! तां स्वस्य उत्पत्तेः भूमिं जानम् त्वं गार्हपत्याग्ने वेद्याम् उत्थितो भव तथा त्वं सदा सर्वदा सर्वथा च धनेन अस्मान् अभिवृद्धान् कुरु ॥ 14 ॥

मन्त्रः

अयमिहप्प्रथमोधायिधातृभिर्होतायजिष्ठोऽ अध्ध्वरेष्वीड्यः ।
षमप्न्वा नोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विभ्वंव्विशेविशे ॥

शु. य. वे. अ. 3 मन्त्र. 15 ॥

पदपाठः

अयम् । इह । प्रथमः धायि । धातृभिरितिधातृभिः । होता । षजिष्ठꣳ । अद्ध्वरेषु । ईड्यः । षम् । अप्न्वानꣳ । भृगवꣳ । व्विरुरुचुरितिविरुरुचुः । व्वनेषु । चित्रम् । व्विभ्वमितिविभ्वम् । व्विशेविशऽ इति विशे व्विशे ॥ 15 ॥

सरलार्थः

अस्य यज्ञस्य विधाता, सर्वेभ्यः यज्ञकारकेभ्यः ऋत्विग्भ्यः पूजितानां सर्वेषां देवानाम् आह्वाता, यजनीयतमः, देवानाम् अत्यन्तो याजकः तथा सर्वेषु यज्ञेषु स्तुतियोग्योऽयम् अग्निः प्रधानतया स्थापितो वर्तते । स्पृहणीयः, व्यापकस्तथा प्रत्येकस्य यजमानस्य गृहे आहवनीयादिषु रूपेषु विद्यमानोऽस्ति । यम् अग्निदेवम् आप्तुं भृगुगोत्रिणः ऋषयः सर्वासु समिधासु पूर्णतया प्रज्वलितं चक्रुः ॥ 15 ॥

मन्त्रः

अस्यप्रत्नामनुद्युतꣳ शुक्रन्दुदुह्रेऽ अह्रयः ।
पयः सहस्रसामृषिम् ॥

शु. य. वे. अ. 3 मन्त्र. 16 ॥

पदपाठः

अस्य । प्रत्वाम् । अनु । द्युतम् । शुक्रम् । दुदुह्रे । अह्रयः । पयः । सहस्रसामितिसहस्र साम् । ऋषिम् ॥ 16 ॥

सरलार्थः

अस्य अग्निदेवस्य पुरातनविहितेन शुभ्रेण सहस्रधनानां प्रदानकारणेन तथा देवानां सर्वेषां गमनकारिणा दुग्धेन सर्वासां दुग्धस्य प्रदात्रीणां गवां गोपालाः दोहनं कुर्वन्ति ॥ 16 ॥

शब्दार्थः

अतिथिम् – यज्ञस्य अतिथिः अग्निः । **बोधयत** – अवगतार्थं कुरुत । **दुवस्य** – परिचरणार्थः । **शोचिषे** – दीप्तिमते प्रज्वलिताय । **तीव्रम्** – सुन्दरम् । **जातवेदसे** – जाताज्ञानाय । **अङ्गिराः** – अग्निः । **वर्धयामसि** – वर्धनं कुर्मः । **यविष्ठ्यम्** – युक्तम् । **हविष्मतीः** – हविषा युक्ताः । **शुचा** – दीप्तो भव । **युक्ताः** – संयक्ताः । **जुषस्व** – सेवनं कुरु । **वरिम्णा** – उरुणा । **देवयजनि** – इज्यन्ते यस्यां सा तत्सम्बोधनम् । **अन्नाद्याय** – अन्नस्य भक्षणाय । **पृश्निः** – चित्र वर्णः । **पुरः** – समीपम् । **मातरम्** – पृथिवीमातरम् । **पितरम्** – स्वर्गलोकम् । **अन्तश्चरति** – शरीरस्य मध्ये चरति । **रोचना** – दीप्तियुक्ता । **अपानती** – सर्वेषु जीवेषु प्राणाद् अनन्तरम् । **महिषः** – अग्निः । **पतङ्गाय** – अग्निदेवाय । **वस्तोः** – स्वर्गस्य सूर्यः । **विराजति** – शोभते । **अह** – अयं निपात संरीकः विनि-गृहार्थीयः । **ज्योतिः** – तेजः । **अग्निर्वर्चः** – अनन्यभूतः । **सजूः** – अग्निः । **जुषाणः** – सेवनं कुर्वाणः । **इन्द्रवत्या** – देवराजस्य इन्द्रस्य संयुक्तया । **उपप्रयन्तः** – समीपे भूत्वा । **वोचम** – वयं पाठं ब्रूयामः । **श्रृण्वते** – श्रवणं कुर्वाणाय । **दिवः** – स्वर्गस्य । **ककुत्** – विशेष अग्निः नामधेयम् । **जिन्वतिः** – प्रीतिकर्मा । **रेतः** – जन्मनः कारणम् । **आहुवध्यै** – आह्वानं करोमि । **राधसः** – धनस्य । **रयीणाम्** – धनानाम् । **सातये** – प्राप्तये । **ऋत्विजः** – यज्ञकर्तारः ब्राह्मणाः । **योनिः** – उत्पतिस्थानम् । **आरुह** – उद्धरणाय । **अथ** – तदनन्तरम् ।

स्वाध्यायः

1. प्रदत्तेषु विकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।

(1) अग्निः काभिः परिचरितो वर्तते ?

(क) समिधाभिः (ख) घृतेन (ग) पयसा (घ) पुरोडाशेन

(2) ''जातवेदस्'' इति शब्दस्य अर्थो भवति ?

(क) इन्द्रः (ख) अग्निः (ग) विष्णुः (घ) ब्रह्मा

(3) अग्निः कैः प्रवृद्धो वर्तते ?

(क) घृतेन (ख) तिलेन (ग) घृतेन (घ) दुग्धेन

(4) समिधा कीदृशी वर्तते ?

(क) क्षमाशीला (ख) प्रार्थनशीला (ग) घृताक्ता (घ) तेजस्विनी

(5) पृथिव्यां व्यापकः को वर्तते ?

(क) अग्निः (ख) इन्द्रः (ग) ब्रह्मा (घ) शिवः

(6) अग्निः कीदृशो वर्तते ?

(क) गूढः (ख) प्रत्यक्षः (ग) परोक्षः (घ) भविष्यगामी

(7) शरीरे जीवनरूपः को वर्तते ?

(क) अग्निः (ख) आहवनीय (ग) जठराग्निः (घ) गार्हपत्याग्नि

(8) मुहूर्तरूपेषु स्थानेषु का शोभते ?

(क) पृथिवी (ख) लक्ष्मीः (ग) पार्वती (घ) वाणी

(9) सूर्य एव को वर्तते ?

(क) ब्रह्मवर्चः (ख) शक्तिवर्चः (ग) धनवर्चः (घ) जलवर्चः

(10) अग्निः किं सेवमानः आहुतं स्वीकरोति ?

(क) दुग्धम् (ख) हविः

(ग) अक्षतान् (घ) सर्व सौभाग्य द्रव्यम्

2. निम्नाङ्कितानां एकैकवाक्येन उत्तराणि लिखत ।

(1) ऋत्विजादयः प्रज्वलिते अग्नौ कैः होमं कुर्वन्तु ?

(2) अग्निदेवस्य कृते अत्यन्तं सुस्वादु किमस्ति ?

(3) अग्निः सदा कीदृशो वर्तते ?

(4) अन्नस्य सिद्धये कस्य स्थापनां करोमि ?

(5) पूर्वस्यां दिशायां केन पृथिवी प्राप्ता ?

(6) अग्निदेवः कस्मै प्रकाशितो भवति ?

(7) सर्वेषु यज्ञकर्मसु कः स्तुत्यो वर्तते ?

(8) ज्योतिरेव किमस्ति ?

(9) सूर्यः किं सेवमानः आहुतिं स्वीकरोति ?

(10) वयं कस्य कृते स्तोत्रस्य उच्चारणं कुर्मः ?

3. निम्नाङ्कितानां मन्त्राणां भावार्थं लिखत ।

(1) उपत्त्वाग्ग्नेहविष्म्मतीर्घृताचीर्य्यन्तुहर्ष्यत ॥
जुषस्व समिधोमम् ॥ शु. य. वे. अ. 3 मन्त्र. 4 ॥

(2) अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा सूर्य्योज्ज्योतिर्ज्ज्योतिः सूर्य्यः स्वाहा ॥
अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहा सूर्य्योव्वर्च्चो ज्योतिर्व्वर्च्चः स्वाहा ।
ज्योतिः सूर्य्यः सूर्य्योज्ज्योतिः स्वाहा ॥ शु. य. वे. अ. 3 मन्त्र. 9 ॥

(3) अयमिहप्प्रथमोधायिधातृभिर्होताष्षजिष्ठोऽ अद्ध्वरेष्ष्वीड्यः ॥
षमप्प्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रं व्विभ्वंव्विशेविशे ॥ शु. य. वे. अ. 3 मन्त्र. 15 ॥

4. निम्नलिखित मन्त्राणां पूर्तिः विधेया ।

(1) तन्त्वासमिद्धि .... छोचाषविष्ट्य ॥ 3 ॥

(2) अन्तरच्चरतिरो .... महिषोदिवम् ॥ 7 ॥

(3) अग्निम्मूर्द्धादिवः .... ँसिजिन्वति ॥ 12 ॥

5. निम्नाङ्कित शब्दरूपाणां परिचयं यच्छत ।

(1) अतिथिम् (2) सुसमिद्धाय (3) समिद्धिः (4) अग्ने (5) भूम्ना (6) पितरम् (7) महिषः (8) इन्द्रवत्या (9) द्युभिः (10) ज्योतिः

6. निम्नाङ्कितानां धातु रुपाणि परिचनोतु ।

(1) बोधयत (2) अक्रमीत् (3) श्रृण्वते (4) यन्तु (5) दधे (6) चरति (7) धीयते (8) जिन्वति (9) वेत्तु (10) हुवे

7. सन्धि विच्छेदं करोतु ।

(1) समिधाग्निम् (2) बृहच्छोचा (3) त्वाग्ने (4) द्यौरिव (5) असदन्मातरम् (6) प्राणादयानती (7) अग्निवर्चः (8) सजूर्देवेन (9) प्रतिवस्तारह (10) वोचेमाग्नये

8. सन्धियोजनं कुरुत ।

(1) बोधयत + अतिथिम् (2) समिद्धिः + अङ्गिरः (3) घृताचीः + षन्तु (4) पृथिवी + इव (5) पृश्निः + अक्रमीद (6) अन्तः + चरति (7) त्रिंशत् + धाम (8) ज्योतिः + वर्चः (9) सूर्षः + वेत्तु (10) योनिः + ऋत्त्विष ।

छात्रप्रवृत्तिः

चतुःश्रृङ्गात्मकस्य सप्तजिह्वात्मकस्य भगवतः अग्निदेवस्य ज्ञानं ददातु ।

विशिष्टज्ञानम्

ईशाव्वास्यमिद- सर्वंष्यत्किञ्चत्जगत्याञ्जगत् ॥
तेनत्यक्तेन भुञ्जीथामागृधः कस्यस्विद्धनम् ॥ 1 ॥

●

12 शुक्लयजुर्वेदे तृतीयोऽध्यायः (माध्यन्दिनीय) भाग-2

प्रस्तावना

''रविणाऽश्वरूपेण वाजेभ्यः केसरेभ्यो वाजेन वा संन्यस्तास्त्यक्ता शाखा वाजसनीसंज्ञा ।''

- श्रीधरस्वामिनः

भगवता-आदित्येन यज्ञवल्क्याय प्रदत्ता इयं माध्यन्दिनी शाखा । ''यजूंसि गद्यांसि'' चतुर्षु वेदेषु यजुर्वेदः गद्यात्मकः । प्रस्तुतपाठ्यांशे शुक्लयजुर्वेदस्य माध्यन्दिनीशाखायाः तृतीयाध्यायस्य मन्त्राः सन्ति । अध्यायस्य प्रमुखो विषयः अग्न्याधान-उपस्थान चतुर्मास्यादिविषयकमन्त्राः । तेषु प्रस्तुतप्रकरणे आहवनीय, गार्हपत्य उभयोः अग्निस्वरुपयोः प्रार्थना कृता अस्ति ।

तृतीय-अध्यायात् 17 तः 34 मन्त्राः उद्धृता सन्ति ।

अग्निहोत्रयागे अरणीमन्थनचित्रम्



मन्त्रः

हरिः ॐ तनूपाऽअग्नेसि तन्वम्मेपाह्यायुर्दा ऽ अग्नेस्यायुर्म्मेदेहिवर्च्चोदा ऽ अग्नेसिवर्च्चोमे देहि ॥

अग्नेषन्मेतन्वा ऽ ऊनन्तन्म ऽ आपृण ॥

शु. य. अ. 3 मं. 17 ॥

पदपाठः

तनुपा ऽ इतितनु पाः । अग्ने। असि । तन्वम् । मे । पाहि । आयुर्दा ऽ इत्यायु दा । अग्ने । असि । आयुः । मे । देहि । वर्च्चोदा ऽ इतिवर्च्चः । दाः । अग्ने । असि । वर्च्चः । मे । देहि ।

अग्ने । षत् । मे । तन्वाः । ऊनम् । तत् । मे । आ । पृण ॥

सरलार्थः

हे भगवन्नग्ने ! यस्त्वं स्वभावत एव तनूपा असि प्रकरणादग्निहोत्रिणां शरीराणां पालकः असि । अतः हे अग्ने ! मम शरीरस्य पालनं कुरू । हे अग्ने ! त्वम् आयुर्दाता असि तत् आयुर्मे देहि । अपमृत्युं निवारय । हे अग्ने ! मम शरीरस्य यदङ्गं चक्षुरादिरूपम् - तव अनुग्रहेणैव समुचितरसपाकादिनिष्पत्त्या शरीरस्य व्यङ्गतानिवृत्त्या पूर्णं सौष्ठवं जायते ।

मन्त्रः

इन्धानास्त्वाशतꣳ हिमाद्युमन्तꣳ समिधीमहि ।
व्वयस्वन्तोव्वयस्कृतꣳ सहस्वन्तꣳ सहस्कृतम् ।
अग्नेसपत्नदम्भनमदब्धासोऽ अदाभ्यम् ।
चित्रावसोस्वस्तितेपारमशीय ॥

शु. य. अ. 3 मं. 18 ॥

पदपाठः

इन्धानाः । त्वा । शतम् । हिमाः । द्युमन्तमितिद् द्युमन्तम् । सम् । इधीमहि ॥ व्वयस्वन्तः । व्वयस्कृतम् । व्वयः कृतमितिवयः कृतम् । सहस्वन्तः । सहस्कृतम् । सहः कृतमितिसहः कृतम् ॥ अग्ने । सपत्त्वनदम्भनमितिसपत्त्वनदम्भनम् । अदब्धासः । अदाभ्यम् ॥ चित्रावसो । चित्रवसोऽइतिचित्रव्वसो । स्वस्ति । ते । पारम् । अशीय ॥

सरलार्थः

हे अग्ने ! शतंवर्षाणि त्वां दिनप्रतिदिनं त्वत्परिचर्यया त्वां वर्धयामः । इन्धानास्त्वदनुग्रहेण दीप्यमानदैवब्रह्म वर्चस्विनः अन्नवन्तः बलवन्तः एवम् अनुपहिंसिताः त्वाम् दीप्तिमन्तम् कुर्मः । चित्रावसो हे रात्रे ! वयं स्वस्तिक्षेमं यथा स्यात्तथा ते तव रात्रेः पारं समाप्तिमशीय । सुप्तेषु जनेषु चौराद्युपद्रवः देवयजने राक्षसाद्युपद्रवो मा भूत् इति अग्निः प्रार्थ्यते ।

मन्त्रः

सन्त्वमग्नेसूर्य्यस्यव्वर्च्चसागथाः समृषीणाꣳस्तुतेन ।
सम्प्रियेणधाम्नासमहमायुषासंव्वर्च्चसासम्प्रजयासꣳ रायस्पोषेणग्मिषीय ॥

शु. य. अ. 3. मं. 19 ॥

पदपाठः

सम् । त्वम् । अग्ने । सूर्य्यस्य । व्वर्च्चसा । अगथाः । ऋषीणाम् । स्तुतेन ॥
प्रियेण । धाम्ना । अहम् । आयुषा । व्वर्चसा । प्रजयेतिप्र जया । रायः । पोषेण । ग्मिषीय ॥

सरलार्थः

हे अग्ने ! त्वम् आदित्यस्य तेजसा तथा ऋणीषां मन्त्राणां स्तोत्रेण स्तुतेन समगथाः रात्रौ संगतः असि । बहवो मन्त्रा अग्निं स्तुवन्ति । प्रियाभिराहुतिभिः समागतः अतः त्वत् प्रसादात् अहमपि प्रजया पुत्रादिकया, धनस्य पुष्टया संगच्छेयम् ॥

मन्त्रः

अन्धस्थान्धोवोभक्षीयमहस्थमहोवोभक्षीयोर्जस्थोर्ज्जंवोभक्षीयरायस्पोषस्थरायस्पोषंवोभक्षीय ॥

शु. य. अ. 3 मं. 20 ॥

पदपाठः

अन्धः । स्थ । अन्धः । व्वः । भक्क्षीय । महः । स्थ । महः । व्वः । भक्क्षीय । ऊर्ज्जः । स्थ । ऊर्ज्जम् । व्वः । भक्क्षीय । राय । पोषः स्थ । रायः । पोषम् । व्वः । भक्क्षीय ॥

सरलार्थः

हे गावः ! यूयम् क्षीराज्यादिरूपस्य अन्नरूपाः स्थ । तथा यूयं महस्थ पूज्यरूपाः स्थ । अतो युष्माकं पूज्यानां प्रसादात् अहमपि महो भक्षीय पूजयत्वं सेवेय । दशवीर्यरूपा यूयं स्थ । अतः वः महः वीर्यम् अहं सेवेयम् तथा यूयम् – उर्जस्थ बलरूपाः स्थ । युष्माकं प्रसादात् धनपुष्टिरूपाः भूत्वा धनपुष्टिं सेवेयम् ।

मन्त्रः

रेवतीरमध्वमस्मिन्नयोनावस्मिन्गोष्ठेस्मिँल्लोकेस्मिन्क्षये ॥
इहैवस्तमापगात ॥

शु. य. अ. 3 मं. 21 ॥

पदपाठः

रेवतीः । रमद्ध्वम् । अस्मिन् । षोनौ । गोष्ठे । गोस्थ ऽ इतिगो स्थे । लोके । क्षये ॥

इह । एव । स्त । मा । अप । गात ॥

सरलार्थः

हे रेवती: ! धनवत्योगाव: अस्मिन् दृश्यमाने अग्निहोत्रहविर्दोहनस्थाने क्रीडत । दोहनादूर्ध्वमस्मिन् गोष्ठे व्रज । रात्रौ यजमानगृहे एव रमध्वम् । अन्यत्र कुत्रापि मा व्रजत ।

मन्त्रः

सꣳहितासिविश्वरूप्यूर्ज्जामाविशगौपत्त्येन ।
उपत्त्वाग्ग्नेदिवेदिवेदोषावस्तर्द्धियाव्वयम् ।
नमोभरन्तऽएमसि ॥

शु. य. अ. 3 मं. 22 ॥

पदपाठः

स-हितेतिसम् हिता । असि । विश्वरूपीतिविश्व रूपी । ऊर्ज्जा । मा । आ । विश । गौपत्त्येन ॥ उप । त्वा । अग्ग्ने । दिवेदिवऽइतिदिवे दिवे । दोषावस्तरितिदोषा व्यस्तः । धिया । व्वयम् ॥ नमः । भरन्तः । आ । इमसि ॥

सरलार्थः

हे गौः ! त्वं क्षीराज्यहविर्दानेन संहितासि यज्ञहौमादिकर्मभिः संलग्नासि । श्वेत-श्यामादिबहुवर्णेर्युक्ता त्वं तव पयादिरसामः अस्मभ्यम् दत्त्वा मम स्वामित्वं स्वीकारयतु । हे गार्हपत्यसंज्ञक अग्ने ! प्रतिदिनं यज्ञार्थं दृढश्रद्धेन हृदयेन त्वां प्रत्यागच्छामः । मत्या नमस्कारं कुर्मः ।

मन्त्रः

राजन्तमद्ध्वराणाङ्गोपामृतस्यदीदिविम् ।
व्वर्द्धमानꣳ स्वेदमे ॥

शु. य. अ. 3 मं. 23 ॥

पदपाठः

राजन्तम् । अद्ध्वराणाम् । गोपाम् । ऋतस्य । दीदिविम् ॥

वर्द्धमानम् । स्वे । दमे ॥

सरलार्थः

वयम् ईदृशम् अग्निम् उपास्महे । कीदृशम् । दीप्यमानं यज्ञानां गोप्तारम् । सत्यवचनलक्षणस्य व्रतस्य दीपयितारम् । अग्नेः समीपे व्रतं गृहीत्वा सत्यं वदत्तीत्याशयः । अस्मदीये गृहे चातुर्मास्यसोमपश्वादयः अभिवृद्धिं गच्छन्तु ।

मन्त्रः

सनः पितेवसूनवेग्ग्नेसूपायनो भव ।
सचस्वानः स्वस्तये ॥

शु. य. अ. 3 मं. 28 ॥

पदपाठः

सः । नः । पितेवेतिपिता इव । सूनवे । अग्ग्ने । सूपायनऽइतिसु उपायनः । भव ॥

सचस्व । नः । स्वस्तये ॥

सरलार्थः

हे अग्ने गार्हपत्य ! स पूर्वोक्तगुणयुक्तस्त्वम् अस्माकं सुखेन उपेतुं शक्यः सूपायनः भव । यथा पुत्राय पिता भयं विना सुखेन प्राप्तुं शक्यः । अस्माकं स्वस्तये सचस्व अनेन कर्मणा समवेतो भव ।

मन्त्रः

अग्नेत्त्वन्नोऽअन्तमऽउतत्राताशिवोभवावरूत्थ्यः ।
व्वसुरग्निर्व्वसुश्श्रवाऽअच्छानक्षिद्युमत्तम ँरयिन्दाः ॥

शु. य. अ. 3 मं. 25 ॥

पदपाठः

अग्ने । त्वम् । नः । अन्तमः । उत । त्राता । शिवः । भव । व्वरूत्थ्यः ॥
व्वसुः अग्निः । व्वसुश्श्रवाऽइतिवसु श्रवाः । अच्छ । नक्षिथ । द्युमत्तममितिद्युमत् तमम् । रयिम् दाः ॥

सरलार्थः

हे अग्ने ! त्वम् अस्माकं निकटतमः देवः पालयिता शान्तः तथा च हितप्रदो भव । वरूथं गृहम् अस्माकं कृते हतकरः भव । अग्निः वसूनां धनेन श्रवः कीर्तिः यस्य-असौ, धनप्रदः अयमिति यस्य कीर्तिः । हे अग्ने ! अस्मत् स्थानं गच्छ । अतिदीप्तियुक्तं धनं देहि ।

मन्त्रः

तन्त्वाशोचिष्ठदीदिवः सुम्नायनूनमीमहे सखिभ्यः ।
सनोबोधिश्रुधीहवमुरुष्याणोऽ अघायतः समस्मात् ॥

शु. य. अ. 3 मं. 26 ॥

पदपाठः

तम् । त्वा । शोचिष्ट्ठ दीदिवऽइतिदीदि व्वः । सुम्नाय । नूनम् । ईमहे । सखिन्भ्यऽइतिसखि भ्यः ॥
सः । नः । बोधि । श्रुधि । हवम् । उरूष्य । नः । अघायतः । अघयतऽइत्यघ षतः । समस्मात् ॥

सरलार्थः

हे दीप्तिमत्तम ! हे सर्वस्य दीपयितः तं पूर्वोक्तगुणयुक्तं त्वां सखिभ्यः अर्थाय याचामहे । अस्मत् सखीनाम् उपकाराय त्वामीमहे । त्वम् अस्मान् सेवकान् बुध्यस्व अस्मदीयम् आह्वानं श्रृणु । सर्वस्मात् शत्रोर्नोऽ रक्ष ॥

मन्त्रः

इडऽएहषदितऽएहिकाम्म्याऽएत ।
मयिवः कामधरणम्भूयात् ॥

शु. य. अ. 3 मं. 27 ॥

पदपाठः

इडे । आ । इहि । अदिते । आ । इहि । काम्म्याः । आ । इत ॥ मयि । व्वः । कामधरणमितिकाम धरणम् । भूयात् ॥

सरलार्थः

हे अदिते, होमस्थानम् आगच्छ । अदितिः देवमाता । हे काम्याः यूयम् आगच्छत । युष्माकं कामानाम् अपेक्षितफलधारकत्वं यत्-अस्ति तत् मयि अनुष्ठातरि भूयात् । युष्मत्प्रसादात् अहम् अभीष्टफलस्य धारयिता भूयासम् ॥

मन्त्रः

सोमान ँस्वरणंकृणुहिब्ब्रह्मणस्पते ।
कक्षीवन्तंष्षऽऔशिजः ॥

शु. य. अ. 3 मन्त्र. 28 ॥

पदपाठः

सोमानम् । स्वरणम् । कृणुहि । ब्रह्मणः । पते ॥ कक्षीवन्तम् । यः । औशिजः ॥

सरलार्थः

हे ब्रह्मणस्पते वेदस्य ! पालक ! सोमानाम् अभिहोतारम् कक्षीवन्नामकम् ऋषिं दीर्घतमः पुत्रं यथासोमयागयुक्तं स्तुतियुक्तं च कृतवान् असि तथा मां कुरु । यः औशिजः, उशिग्नाम्नी कक्षीवतो माता तस्याः पुत्र औशिजः कक्षीवान् ।

मन्त्रः

योरेवान्योऽअमीवहाव्वसुवित्पुष्टिवर्द्धनः ।
सनः सिषक्तुयस्तुरः ॥

शु. य. अ. 3 मं. 29 ॥

पदपाठः

यः । रेवान् । यः । अमीवहेत्यमीव हा । व्वसुविदितिवसु वित् । पुष्टिवर्द्धनऽइतिपुष्टि व्वर्द्धनः ॥ सः । नः । सिषक्तु । सिसक्क्तिव तिसिक्क्तु यः ॥ तुरः ॥

सरलार्थः

हे वेदपते ! यो धनवान् रोगाणां दोषाणां च निरसिता, रत्नानां ज्ञाता वासयोग्यस्थानानां नगरग्रामादीनां लोकलोकान्तराणां च ज्ञाता शरीराणां वर्धयिता यश्च विलम्बेन यथाकालं कार्याणां सम्पादयिता स राजा मह्यं प्राप्तोऽस्तु ।

मन्त्रः

मानः शंसोऽअररुषोधूर्त्तिः प्रणङ्मर्त्त्यस्य ।
रक्षाणोब्ब्रह्मणस्पते ॥

शु. य. अ. 3 मं. 30 ॥

पदपाठः

मा । नः । शंसः । अररुषः । धूर्त्तिः । प्रणक् । मर्त्त्यस्य ॥ रक्ष । नः । ब्रह्मणः । पते ॥

सरलार्थः

हे मन्त्ररक्षकबृहस्पते ! तादृशस्य अदाता मनुष्यस्य धूर्तिः अस्मान् मा प्रकर्षेण व्याप्नोतु । हे ब्रह्मणस्पते ! शत्रुकृतमनिष्टचिन्तनं शत्रुकृता सा हिंसा च अस्मान् मा व्याप्नोतु । हे वेदस्य पालनाग्ने, अस्मान् रक्ष ।

मन्त्रः

महित्रीणामवोस्तुद्युक्षम्मित्रस्यार्य्यम्णः ।
दुराधर्षंव्वरुणस्य ॥

शु. य. अ. 3 मं. 31 ॥

पदपाठः

महि । त्रीणाम् । अवः । अस्तु । द्युक्षम् । मित्रस्य । अर्य्यम्णः । दुराधर्षमितिदुः आधर्षम् । व्वरुणस्य ॥

सरलार्थः

मित्र-अर्यमा-वरुणैः त्रिभिः कृतानि प्रजापालन कार्याणि शत्रुभिः अभेद्यानि स्युः । भौतिकपक्षे प्राणस्य, सूर्यस्य एवं बलस्य त्रयाणां पालनं भवेयुः । एवं तेन पालनेन विपत्तीनां निवारणं भवेत् अपरञ्च सुवर्णादिधनलाभः अपि भवेत् ॥

मन्त्रः

नहितेषाममाचननाध्वसुव्वारणेषु ।
ईशेरिपुरघशंसः ॥

शु. य. अ. 3 मं. 32 ॥

पदपाठः

नहि । तेषा॑म् । अमा । चन । न । अध्व॒स्विज्य॒ध्द्वे सु । व्वारणेषु॑ ॥ ईशे॑ । रिपु॒ः । अघश॑ꣳस॒ऽइज्य॒घ श॑ꣳ स॒ः ॥

सरलार्थः

गृहेषु मार्गेषु शत्रुचोरव्याघ्रादिनिवारकेषु कार्येषु पापकर्मोपदेशका दुष्टाः षडयन्त्रकारिणो बलवन्तः न भवेयुः इति ईश्वरः प्रार्थ्यते । मित्रादिदेवपालितानां गृहे अरण्ये वा शत्रुचोरव्याघ्रादिकृता बाधा न भवतु । सर्वदा पापस्य प्रशंसकः शत्रुः समर्थो न भवतु ।

मन्त्रः

तेहिपुत्रासोऽअदि॑तेः प्प्रजीवसेमर्त्या॑य ।
ज्योतिष्यच्छन्त्यजस्त्रम् ॥

शु. य. अ. 3 मं. 33 ॥

पदपाठः

ते । हि । पु॒त्रास॒ः अदि॑तेः । प्र । जीवसे॑ । मर्त्या॑य । ज्योति॑ः । षच्छ॑न्ति । अज॑स्त्रम् ॥

सरलार्थः

अखण्डितशक्तेः देवमातुः पुत्राः मित्रार्यमावरुणाः मनुष्याय यजमानाय प्रजीवसे चिरं जीवनाय निरन्तरम् अनुपक्षीणं ज्योतिः तेजः प्रयच्छन्ति । यथा चिरं जीवनं भवति तथा तदुपायज्ञानं प्रयच्छन्ति ।

मन्त्रः

कदाचनस्त्त॒रीर॑सिनेन्द्र॑सश्च॒सिदाशुषे॑ ।
उपोपेन्नुम॑घवन्भूयदइन्नुतेदान॑न्देवस्य॑पृच्च्यते ॥

शु. य. अ. 3 मं. 34 ॥

पदपाठः

कदा । चन । स्तरी॒ः । असि । न । इन्द्र । सश्च्वसि । दाशुषे॑ ॥ उपोपेज्युप॑ उप । इत् । नु । मघवन्निति॑-मघव्वन् । भूय॑ः । इत् । नु । ते । दान॑म् । देवस्य॑ । पृच्च्यते ॥

सरलार्थः

हे इन्द्र ! परमैश्वर्यशालिन् ! त्वं कदापि न क्रुध्यसि । हविर्दत्तवते यजमानाय धनपुत्रादिसमृद्धिं प्रापयसि । हे मघवन् ! धन-उपलक्षितविविध-ऐश्वर्यवन् ! यजमानेन पुनर्याच्यमानोऽपि त्वं न क्रुध्यसि । हविर्दानपरायणे सदा प्रीणयसे । त्वत्कर्तृकदानं यजमानेन सम्पृच्यते ।

शब्दार्थः

तनूपा - शरीरपालकः **संहितासि** - संलग्नासि **आयुर्दा** - आयुषो दातासि **दिवेदिवे** - प्रतिदिनम् **ऊनम्** - न्यूनम् **दोषावस्तः** - रात्रिवसनशीलः **वर्चः** - वैदिकानुष्ठानप्रयुक्तं तेजः **नमोभरन्तः** - नमस्कारं सम्पादयन्तः **आपृण** - सर्वतः पूरय **राजन्तम्** - दीप्यमानम् **द्युमन्तम्** - दीप्तिमन्तम् **अध्वराणां** - यज्ञानां **समिधीमहि** - संदीपयामः **वर्द्धमानं** - वर्द्धनशीलम् **वयस्वन्तः** - अन्नवन्तः **स्वे** - स्वकीये **सहस्वन्तः** - बलवन्तः **दमे** - यज्ञगृहे **सपत्नदम्भनम्** - सपत्नानां हिंसितारम् **सूपायनः** - सुखोपगमनः **अदाभ्यम्** - अनुपहिंस्यम् **सचस्व** - सेवस्व **चित्रावसुः** - रात्रिः **स्वस्तये** - अविनाशाय **स्वस्ति** - अविनाशिनाम् **अन्तमः** - निकटतमः **अशीय** - व्याप्नुयाम **त्राता** - पालयिता **वर्चसा** - तेजसा **रयिन्दाः** - धनं देहि **स्तुतेन** - स्तोत्रेण **शोचिष्ठ** - शोचिष्मत्तमः **रायष्पोषेण** - धनस्य पोषेण **दीदिवः** - संदीप्यस्य **भक्षीय** - सेवेय **सुम्नाय** - सुखाय **अन्धस्थ** - अन्नरूपाः स्थ **ईमहे** - याचामहे **रेवतीः** - धनवतीगावः **बोधि** - बुध्यस्व

मा-पगात - मा-अपगच्छत **अघः** - पापः **समस्मात्** - सर्वस्मात् **वर्धनम्** - वृद्धिं कुरुत **इड** - अदितिः **सिषज़्तु** - सेवताम् **एत** - आगच्छत **धूर्तिः** - हिंसा **कृणुहि** - कुरु **रक्षाणः** - अस्मान् रक्ष **औशिजः** - उशिजः पुत्रः **दुराधर्षम्** - अनाधर्षम् **अमीवा** - व्याधिः **वारणेषु** - पथिसु **पुष्टिः** - पोषणम् **जीवसे** - चिरंजीवनाय

स्वाध्यायः

1. निज़्नाङ्कितानां प्रश्नानां योग्य विकल्पं चिज़्त्वा उज़्रं लिखन्तु ।

(1) शुज़्लयजुर्वेदस्य कस्याः शाखायाः मन्त्राः अस्मिन् प्रकरणे सन्ति ?

(क) काण्वः (ख) माध्यन्दिनीः (ग) आवटिकः (घ) शाफेयः

(2) अग्निः केषां पालकः अस्ति ?

(क) मनुष्याणाम् (ख) अग्निहोत्रिणाम् (ग) पशूनाम् (घ) देवानाम्

(3) सन्त्वमग्ने .... व्वर्च्चसागथा- ।

(क) सूर्यस्य (ख) चन्द्रमसः (ग) मनसः (घ) पृथिव्याः

(4) गावः रात्रौ कुत्र रमध्वम् ?

(क) गोष्ठे (ख) यज्ञशालायाम् (ग) उद्याने (घ) यजमानगृहे

(5) अदितिः केषां माता अस्ति ?

(क) देवानाम् (ख) दानवानाम् (ग) ऋणीणाम् (घ) मनुष्याणाम्

(6) 'धूर्ज़िः' इत्यस्य कोऽर्थः ?

(क) अहिंसा (ख) हिंसा (ग) धर्मः (घ) सदाचारः

(7) कस्मै रक्षणाय प्रार्थना क्रियते ?

(क) ईश्वराय (ख) देवाय (ग) ब्रह्मणे (घ) गुरवे

(8) कस्य अपरं नाम मघवा अस्ति ?

(क) शिवस्य (ख) विष्णोः (ग) इन्द्रस्य (घ) ब्रह्मणः

(9) 'अधम्' इत्युज़्ते किम् ?

(क) पुण्यम् (ख) पापम् (ग) कल्याणम् (घ) श्रीः

(10) प्रस्तुत प्रकरणे कति मन्त्राः सन्ति ?

(क) 14 (ख) 16 (ग) 20 (घ) 18

2. निज़्नलिखित प्रश्नानां एकैकवाज़्येन उज़्रं दीयताम् ।

(1) अग्निः किं किं ददाति ?

(2) चित्रावसुः अर्थात् कः ?

(3) अग्निः कस्य वर्चसा अगथाः ?

(4) चतुर्षु वेदेषु यजुर्वेदः कीदृशः ?

(5) 'अध्वर' शज़्दस्य कः अर्थः ?

(6) वयं कीदृशम् - अग्निम् - उपास्महे ?

(7) अग्निः कस्मात् अस्माकं रक्षणं करोति ?

(8) औशिजः कस्य पुत्र आसीत् ?

(9) मित्रादीनां पालिते गृहे कस्य बाधा न भवति ?

(10) इन्द्रः यजमानाय किं ददाति ?

3. मन्त्राणां भावार्थं लिखत ।

(1) राजन्तमध्वराणां .... रचे दमे ॥

(2) सोमान - स्वरणं .... औशिज- ॥

(3) तेहि पुत्रासो .... त्यजस्रम् ॥

4. निम्नलिखितमन्त्राणां पूर्तिः विधेया ।

(1) स न- पितेव .... स्वस्तये ॥

(2) तन्त्वा शोचिष्ठ .... समस्मात् ॥

(3) षो रेवान्यो .... षस्तुरः ॥

5. सन्धिं कुरूत ।

(1) पाहि + आयुर्दा (2) सम् + अहम् + आयुषा (3) अन्ध + स्थ + अन्धः (4) इह + एव (5) प्रणक् + मर्त्यस्य (6) न + इन्द्रः (7) मित्रस्य + अर्यज्ञ्णः (8) योनौ + अस्मिन् (9) वसुः + अग्निः (10) रयिम् + दाः

6. सन्धिविच्छेदं कुरूत ।

(1) तन्वा (2) सन्त्वमग्ने (3) समृषीणाम् (4) भक्षीयोर्जस्थो (5) गोष्ठेस्मिन् (6) विश्वरूप्यूर्जा (7) एध्यदित (8) अवोस्तु (9) नेन्द्र (10) पितेव

7. निम्नलिखितानां पदपरिचयं ददातु ।

(1) वर्चसा (2) अग्ने (3) स्तुतेन (4) योनौ (5) तन्वा (6) त्वम् (7) वारणेषु (8) रेवान् (9) देवस्य (10) ज्योतिः

8. क्रियापदानां परिचयो देयः ।

(1) आपृण (2) भक्षीय (3) अपगात (4) सचस्व (5) भूयात् (6) भव (7) ईमहे (8) भूयात् (9) प्रजीवसे (10) पृच्छते

छात्रप्रवृत्तिः

यज्ञे अग्निप्रज्वालनविविधोपायाः प्रयोगात्मकरीत्या करणीयाः ।

विशिष्टज्ञानम्

चत्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासो ऽ अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ २ ॥ आविवेश ॥

(ऋग्वेदसंहिता - 5.58.3)

सरलार्थः

यस्य वृषभस्य यज्ञस्य चत्वारि श्रृङ्गाणि ब्रह्मा, उद्गाता, होता, अध्वर्युलक्षणानि । त्रयः पादाः ऋग्यजु-सामरूपाः । द्वे शीर्षे हविर्धानप्रवर्ग्याज्ये । अस्य वृषभस्य सप्तहस्तासः सप्तहोतारो हस्ताः हस्ता इति व्याप्रियन्ते । सप्तछन्दांसि वा हस्ताः । यश्च त्रिधाबद्धः प्रातःसवनमाध्यन्दिनसवन-तृतीयसवनैर्बद्धः । वृषभ इवामर्षादन्यानि शास्त्राणि - अधः पदीकृत्य ब्रविति । य उज्तगुणः सः अयं महान्देवः मनुष्यान् - आविशति प्रतिपादयति ।

●

13 शुक्लयजुर्वेदे तृतीयोऽध्यायः (माध्यन्दिनीय) भाग-3

प्रस्तावना

मुखं यः सर्वदेवानां हव्यभुक्कव्यभुक् तथा ।
पितॄणाञ्च नमस्तस्मै विष्णवे पावकात्मने ॥ (आह्निकसूत्रावलिः)

अस्माकं सनातनधर्मे विविधदेवाः विविधप्रकारकं महत्वं धारयन्ति । समेषां देवानां मुखरूपः अग्निदेवः भवति । स च अग्निः हविष्यान्नं देवान् प्रति कव्यान्नं पितृन् प्रति च नयति । अत एव असौ हव्यवाहननाम्ना मन्त्रेषु स्तूयते । विविधेषु वेदेषु अग्नेः नितान्तं महत्वं प्रतिपादितमस्ति । तथा च लोकविख्यातमिदं यत् अग्निजले तत्त्वे तादृशे स्तः ये नान्यतः शुद्धिमपेक्षते । ताभ्यां हि समेषां तत्त्वानां शुद्धिकरणं भवति ।

अस्मिन् प्रकरणे यजुर्वेदस्य तृतीयाध्यायस्य अग्न्याधानमन्त्राणां वर्णनमायाति । अस्य प्रकरणस्य मुख्यो विषयः दक्षिणाग्नेः उपस्थानम्, अग्न्याधानानन्तरम् अग्निहोतृणां गृहसम्बन्धिन्यः प्रार्थनाः, प्रघासीमन्त्रः, सप्तनीकयजमानस्यावभृथस्नानं, यजमानपत्न्या चरुग्रहणम्, पितृयज्ञकार्ये च आहवनीयाग्नेः उपस्थानम् इत्यादि । 35 (35) तः 52 (52) कण्डिकाः अस्मिन् प्रकरणे समायान्ति ।

अग्न्याधानपात्राणि



हरि॑ः ॐ तत्स॑वि॒तुर्व्वरे॑ण्य॒म्भर्गो॑दे॒वस्य॑धीमहि ।
धियो॒योनः॑ प्र॒चोदया॑त् ॥

शु. य. अ. 3 मं. 35 ॥

पदपाठः

तत् । स॒वि॒तुः । व्वरे॑ण्यम् । भर्गः॑ । दे॒वस्य॑ । धी॒म॒हि ॥ धियः॑ । यः । नः॒ । प्र॒चो॒द॒यादिति॑प्र॒चो॒दया॑त् ॥

सरलार्थः

तस्य देवस्य द्योतनात्मकस्य सवितुः वा विधातुः वरेण्यं वरणीयं सर्वैः प्रार्थनीयं भर्गः सर्वपापानां सर्वसंसारस्य च भर्जनसमर्थं तेजः सत्य, ज्ञान, आनन्दादिवेदान्तप्रतिपाद्यं वयं ध्यायामः । सवितुर्देवस्य तत् वरेण्यं भर्गो ध्यायामः यश्च सविता अस्माकं बुद्धिं प्रेरयति तं च ध्यायामः ।

मन्त्रः

परिते॑दू॒डभो॒रथो॒स्मा॒ँ २॥ऽ अश्नो॑तुव्वि॒श्वतः॑ ।
ये॒नरक्ष॑सिदा॒शुषः॑ ॥

शु. य. अ. 3 मं. 36 ॥

पदपाठः

परि॑ । ते॒ । दू॒डभः॑ । दु॒र्द॒भ॒ऽइति॑दु दभः॑ । रथः॑ । अ॒स्मान् । अ॒श्नो॒तु । वि॒श्वतः॑ ॥ येन॑ । रक्ष॑सि । दा॒शुषः॑ ॥

सरलार्थः

हे अग्ने ! तव रथः अस्मान् यजमानान् विश्वतः सर्वासु दिक्षु पर्यश्नोतु परितः व्याप्नोतु, अस्मद्रक्षणाय सर्वतः तिष्ठतु । येन रथेन त्वं दाशुषो यजमानान् रक्षसि पालयसि । दूडभः दुर्दभः ।

मन्त्रः

भूर्भुवः॒ स्वः॒ सुप्र॒जाः प्र॒जाभिः॑ स्या ँ सु॒वीरो॒ व्वी॒रैः सु॒पोषः॒ पोषैः॑ ।
नर्य॑प्र॒जाम्मे॑पाहि॒श ँस्य॑प॒शून्मे॑पाह्यथर्य्य॑पि॒तुम्मे॑पाहि ॥

शु. य. अ. 3 मं. 37 ॥

पदपाठः

स्व॒रिति॒स्वः । सु॒प्र॒जाऽइति॑सु प्र॒जाः । प्र॒जाभि॒रिति॑प्र॒जाभिः॑ । स्या॒म् । सु॒वीर॒ऽइति॑सु व्वीरः॑ । व्वी॒रैः॑ । सु॒पोष॒ऽइति॑सु॒ पोषः॑ । पोषैः॑ ।

नर्य॑ । प्र॒जामिति॑प्र॒ जाम् । मे॒ । पा॒हि॒ । श ँस्य॑ । प॒शून् । अथ॑र्य्य । पि॒तुम् ॥

सरलार्थः

हे पालकाग्ने ! भूर्भुवः स्वः त्वं व्याहृत्यादित्रयात्मकः तदर्थ भूतलोकप्रयात्मकः । अतस्त्वत्प्रसादादहं प्रजाभिः बन्धुभृत्यादिरूपाभिः कृत्वा सुप्रजाः स्यामनुकुलत्वेन शोभानाः प्रजायस्य तादृशो भवेयम् । तथा वीरैः सुपुत्रैः सुवीरः स्यां शास्त्रीयमार्गवर्तिशोभनयुक्तो भवेयम् । तथा पोषैः हिरण्यादिपोषणैः सुपोषः स्यां बहुमूल्यार्हहिरण्यादियुक्तो भवेयम् ।

मन्त्रः

आग॑न्नमव्वि॒श्वरवे॑दसम॒स्मभ्यं॑व्वसुवि॒त्त॑मम् ।
अग्ने॑सम्म्रा॒डभिद्यु॒म्नम॒भिसह॒ऽआय॑च्छस्व ॥

शु. य. अ. 3 मं. 38 ॥

पदपाठः

आ । अ॒ग॒न्म॒ । व्वि॒श्वरवे॑द॒समिति॑ वि॒श्व व्वेदसम् । अ॒स्म॒भ्य॑म् । व्व॒सु॒वि॒त्त॑म॒मिति॑वसुवित् त॑मम् ॥

अग्ने॑ । स॒म्म्रा॒डिति॒॑सम् राट् । अ॒भि । द्यु॒म्नम् । अ॒भि । सहः॑ । आ । य॒च्छ॒स्व ॥

सरलार्थः

हे आहवनीयाग्ने ! वयं त्वामुद्दिश्य ग्रामान्तरात्प्रत्यागताः । इदृशं त्वाम् विश्ववेदसंधनस्य वेदितारं प्रार्थयामहे अस्मासु यशोबलं च स्थापय ।

मन्त्रः

अयमग्निर्गृहपतिर्गार्हपत्यः प्रजायावसुवित्तमः ।
अग्नेगृहपतेभिद्युम्नमभिसहऽ आयच्छस्व ॥

शु. य. अ. 3 मं. 39 ॥

पदपाठः

अयम् । अग्निः । गृहपतिरितिगृह पतिः । गार्हपत्यऽइतिगार्ह पत्यः । प्रजायाऽइतिप्र जायाः । वसुवित्तमऽइतिवसुवित् तमः ॥

अग्ने । गृहपतऽइतिगृह पते । पुरीष्य । रयिमानितिरयि मान् । पुष्टिवर्द्धनऽइतिपुष्टि वर्द्धनः ॥ अग्ने । पुरीष्य ॥

सरलार्थः

सोऽयमग्निः गार्हपत्यः अस्माकं गृहपतिः । यः प्रजाभ्यः धनप्रदायकः । अभिद्युम्नम् अभिसह सहश्च विद्यादिधनं तदीयदार्ढ्यं च आयच्छस्व वर्धय । यद्वा निखिलब्रह्माण्डाधिपतिरेव गृहपतिः । स त्वमस्माकं सम्बन्धित्वादस्माकं प्रजया अनुग्रहार्थं वसुवित्तमः वसूनां लभयितृतमः । अस्मभ्यं द्युम्नं ज्ञानादिलक्षणं द्योतमानं धनं योगज्ञानादिशक्तिरूपं बलं च प्रयच्छ ।

मन्त्रः

अयमग्निः पुरीष्योरयिमान्पुष्टिवर्द्धनः ।
अग्नेपुरीष्याभिद्युम्नमभिसहऽ आयच्छस्व ॥

शु. य. अ. 3 मं. 40

पदपाठः

अस्य मन्त्रस्य पदपाठः एकोनचत्वारिंशततमे मन्त्रे (39) दृष्टव्यः ।

सरलार्थः

हे दक्षिणाग्ने ! योऽयमग्निः पुरीष्यः पशव्यः । रयिमान् धनवान् पुष्टिवर्द्धनः तं याचे । हे अग्ने, पुरीष्यं पशुहित, द्युम्नं सहस्वाभ्यायच्छस्व देहि ।

मन्त्रः

गृहामाबिभीतमावेपध्द्वमूर्जम्बिभ्रतऽ एमसि ।
ऊर्जम्बिभ्रद्वः सुमनाः सुमेधागृहानैमिमनसा मोदमानः ॥

शु. य. अ. 3 मं. 41 ॥

पदपाठः

गृहाः । मा । बिभीत । मा । वेपध्द्वम् । ऊर्ज्जम् । बिभ्रतः । आ । इमसि ॥

ऊर्ज्जम् । बिभ्रत् । वः । सुमनाऽइतिसु मनाः । सुमेधाऽइतिसु मेधाः । गृहान् । आ । एमिऽमनसा । मोदमानः ॥

सरलार्थः

''गृहपदेन गृहस्थाः पुरुषा उच्यन्ते'' हे गृहाः यूयं मा बिभीत । पालको यजमानो गत इति भयं मा कुरूत । मा च वेपध्वम् । कोऽपि शत्रुरागत्य विनाशयिष्यति इति बुद्ध्या कम्पं मा कार्षीः । यतो वयमूर्जं बिभ्रतो धारयमाणानक्षीणान्नावेव युष्मान् एमसि । यूयमूर्जं बिभ्रतः तथाहमपि ऊर्जं बिभ्रन् धारयन् सुमनाः, सुमेधाः, मोदमानः युष्मान् गृहाणैमि आगच्छति ।

मन्त्रः

षेषामध्येतिप्रवसन्नयेषुसौमनसोबहुः ।
गृहानुपह्वयामहेतेनोजानन्तुजानतः ॥

शु. य. अ. 3 मं. 42 ॥

पदपाठः

षेषाम् । अध्दयेतीत्यधि एति । प्रवसन्नितिप्र व्वसन् षेषु । सौमनसः । बहुः ॥
गृहान् । उप । हवयामहे । ते । नः जानन्तु । जानतः ॥

सरलार्थः

प्रवसन् देशान्तरं गच्छन् गृहपतिर्यजमानः यान् गृहान् स्मरति, गृहविषयं क्षेत्रं चिन्तयति, तथा येषु गृहेषु यजमानस्य बहुप्रकारकं सौमनसः प्रसन्नतां अतिशया च भवति । तान् गृहाभिमानिनो वास्तुदेवानुपहवयामहै आहवायामः । ते गृहदेवा आहूताः सन्तः जानत उपकाराभिज्ञान् अस्मान् जानन्तु ।

मन्त्रः

उपहूताऽइहगावऽउपहूताऽअजावयः ।
अथोऽअन्नस्यकीलालऽउपहूतोगृहेषुनः ।
क्षेमायवः शान्त्यैप्रपद्येशिवꣳ शग्मꣳ शंय्योः शंय्योः ॥

शु.य.अ. 3 मं. 43॥

पदपाठः

उपहूताऽइत्त्युप हूताः । इह । गावः । उपहूताऽइत्त्युप हूताः । अजावयः ॥
अथोऽइत्त्यथो । अन्नस्य । कीलालः । उपहूतऽइत्त्युप हूतः । गृहेषु । नः ॥
क्क्षेमाय । व्वः । शान्त्यै । प्र । पद्ये ।
शिवम् शग्ग्मम् । शंय्योरितिशम् षोः ।
शंय्योरितिशम् षोः ॥

सरलार्थः

अस्माकं गृहेषु शरीरेषु उपहूता गाव इन्द्रियाणि वेदवाचश्च उपहूताः । अजा प्रकृतिः अवयो महादाद्याश्च सान्निध्यमुपगताः । अन्नस्य भोग्यजातस्य कीलालः रस उपहूतः । अहं च क्षेत्रज्ञो वो युष्मान् तादृग्रसादिसम्पन्नान् गृहान् प्रपद्ये प्राप्नोमि । किमर्थ क्षेमाय विद्यमानस्य वसुनो रक्षणं क्षेमस्तदर्थम् । शान्त्यै मम सर्वेष्टमानाय ।

मन्त्रः

प्रघासिनोहवामहेमरुतश्श्चरिशादसः ।
करम्भेणसजोषसः ॥

शु.य.अ. 3-44॥

पदपाठः

प्रघासिनऽइतिप्र घासिनः । हवामहे । मरुतः च । रिशादसः ॥
करम्भेण । सजोषस ऽइतिस जोषसः ॥

सरलार्थः

चतुर्मास स्यमन्त्राः प्रारम्भ्यन्ते । वैश्वदेव - वरुणप्रघाससाकमेघ शुनाशीरीयाख्यानि तानि चत्वारि पर्वाणि ।

पत्न्याजारे कथिते सति एनां पत्नीं नयन् प्रतिप्रस्थातः प्रघासिन इति मन्त्रं वाचयति । वयं मरुतो हवामहे । प्रघासिन् एतन्नामकान् प्रघास्युपलक्षितान् मरुतः आह्वायामः । रिशां वैरिकृतां हिंसां दस्यन्ति उपक्षयन्तीति रिशादसः । करंभेण सजोषसः करम्भपात्रः समानप्रीतयः ।

मन्त्रः

षद्ग्रामेषदरण्णयेषत्त्सभायाष्षदिन्द्रिये ।
षदेनश्च्चकृमाव्व्यमिदन्तदवयघामहेस्वाहा ॥

शु. य. अ. 3. मं- 45

पदपाठः

षत् । ग्रामे । अरण्ण्ये । सभायाम् । इन्द्रिये । एनः । चकृम । व्व्यम् । इदम् । तत् । अव । षजामहे । स्वाहा ॥

सरलार्थः

पत्नीवाचनो मन्त्रः । पत्नी दक्षिणाग्नौ करम्भपात्राणि जुहोति । ग्रामे वसन्तो वयं यदेनः पापं ग्रामोपद्रवरूपं चकृम कृतवन्तः । तथारण्ये वसन्तो यदेनो मृगोपद्रवरूपं चकृम । तथा सभायां स्थिता पदेनो महाजनितिरस्कारादिकं चकृम । तथेन्द्रियो जिह्वोपस्थरूपे प्रीतिमन्तो वयं पदेन कलञ्च भक्षणपरस्त्रीगमनादिकं चकृम तदिदं सर्वं पापमवजामहे विनाशयामः एतद् हविः देवतायै पापविनाशिन्यै दत्तम् (स्वाहा) इत्यर्थः ।

मन्त्रः

मोषूणऽइन्द्रात्रपृत्त्सुदेवेरास्तहिष्म्मातेशुष्मिन्नवया॰ ।
महश्च्चिद्यस्यमीढुषौषव्व्याहविष्म्मतोमरुतोव्वन्दतेगी॰ ॥

शु. य. अ. 3. मं- 46

पदपाठः

मोऽइतिमो । सु । नः । इन्द्र । अत्र । पृत्स्वितिपृत् सु । देवैः । अस्ति । हि । स्म । ते । शुष्मिन् । अवयाऽइत्यव षा ॥

महः । चित् । षस्य । मीढुषः । षव्व्या । हविष्मतः । मरुतः । व्वन्दते । गीः ॥

सरलार्थः

मोषूण इति यजमानो जपति । हे इन्द्र ! अत्र पृत्सु एषु संग्रामेषु वर्तमानदेवैस्त्वया सह सख्यं प्राप्तै मरुन्नामकैर्देवैः सहितस्त्वं नोऽस्मान्मे विनाशयेति शेषः । हे शुष्मिन् बलविन्द्र ! तव अवयः अवयुतो यागः पृथग्भागोऽस्ति हि स्म विद्यत एव खलु । अवपूर्वस्ययजतेरेतद्रूपम् । मीढुषो वृष्टिप्रदत्वेन सेक्तुः । हविष्मतो हविर्योग्यस्य तव यव्या यवमयैः करम्भपात्रैर्निष्पन्ना होमक्रिया महश्चितपूजा खलु । गीरस्मदीया स्तुतिरुपा वाक् मरुतो भवतः सखीन् वन्दते नमस्करोति ।

मन्त्रः

अक्क्रन्नकर्म्मकर्म्मकृतः सहव्वाचामयोभुवा ।
देवेब्भ्यः कर्म्मकृत्त्वास्तम्प्रेतसचाभुवः ॥

शु. य. अ. 3. मं- 47 ॥

पदपाठः

अक्क्रन् । कर्म्म । कर्म्मकृतऽइतिकर्म्म कृतः । सह । जाचा । मयोभुवेतिमयः भुवा ॥ देवब्भ्यः । कर्म्म । कृत्वा । अस्तम् । प्र । इत । सचाभुवऽइतिसचाभुवः ॥

सरलार्थः

पत्नीं वाचयति । हे सचाभुवः ! सहभवनशीलाः यजमानेन पत्न्या वास्मिन्कर्मणि सहावस्थिता हे ऋत्विजः ! देवेभ्यो देवार्थं कर्म कृत्वा वरुणप्रघासनामकं कर्मानुष्ठानायास्तं प्रेतगृहान् गच्छत । गृहनाम अस्तमिति ।

मन्त्रः

अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुण॰ ।
अवदेवैर्देवकृतमेनौयासिषमवमत्त्यैर्म्मर्त्यकृतम्पुरुराव्णणौदेवरिषस्पाहि ॥

शु. य. अ. 3 मं - 48 ॥

पदपाठः

अवभृथेत्यव भृथ । निचुम्पुणेतिनि चुम्पुण । निचेरुरितिनि चेरुः । असि । निचुम्पुणऽइतिनि चुम्पुणः ॥

अव । देवैः । देवकृतमितिदेव कृतम् । एनः । अयासिषम् । अव । मर्त्यैः । मर्त्यकृतमितिमर्त्य कृतम् । पुरुराव्णऽति पुरु राव्णः । देव । रिषः । पाहि ।

सरलार्थः

अनेन मन्त्रेण कर्मणोऽन्ते दम्पतीभ्यां जले स्नानं कर्तव्यम् । हे अवभृथयज्ञ ! हे निचुम्पुण ! नीचैरुच्चैश्च भरणपोषणकारिन् ! हे मन्दगते ! हे अवभृथदेवते नीचैः स्वरेण सभ्यतापूर्वकवदनशील ज्ञानिपुरुष इत्यादि । हे अवभृथदेवते वरुण ! नीचकृष्णनोभूत्वा गृहे गृहे यज्ञेऽवतिषुसे । मन्दगमनस्य किं प्रयोजनमितिचेदुच्यते देवैविषयावद्योतनस्वभावैरिन्द्रयैर्देवकृतं देवेषु हविः स्वामिषु कृतमेनः पापं तदवद्यासिषमस्मिन् जलेऽहमवनीतवानस्मि । इदमस्माभिः परित्यक्तमेनो यथा त्वां न प्राप्नोति । तथा मन्दंगच्छेति भावः । हे अवभृथयज्ञ ! रिषोवधात् अस्मान् पालय ।

मन्त्रः

पूर्णादर्व्विपरापतसुपूर्णापुनरापत ।
व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जं शतक्क्रतो ॥

शु. य. अ. 3 मं. 49 ॥

पदपाठः

पूर्णा । दर्वि । परा । पत । सुपूर्णेतिसु पूर्णा । पुनः । आ । पत ॥

वस्नेवेतिवस्नाऽ इव । वि । क्रीणावहै । इषम् । उर्ज्जम् । शतक्क्रतोऽइतिशत क्रतो ॥

सरलार्थः

द्वे ऐन्द्यावनुष्टुभौ ! साकमेधगतं कर्म किंञ्चिदुच्यते दर्व्या स्थालीत ओदन ग्रहणं करोति प्रथमया । द्वितीयया तं जुहोति । हे दर्वि ! अन्नप्रदानसाधनभूते काष्ठादिनिर्मिते त्वं पूर्णास्थाल्याः सकाशादन्नं गृहीत्वापूर्णाभूत्वापरपूर्णत्वादेवोत्कृष्टा सतीपत इन्द्रं प्रतिगच्छ । सुपूर्णा कर्मफनेन सुष्ठुपूर्णासती पुनरापतभूयः अस्मान् प्रति-आगच्छ । हे शतक्रतो ! बहुकर्मन् ! इन्द्रः ! त्वं चाहं चोभौ वस्नेव (वस्नेव-वस्न शब्देन मूल्यं तृतीयायाः पूर्व सवर्णः) इषमभीष्टं हविः स्वरूपमन्नमूर्जं हविर्दान फलरूपं रसविशेषं रसविशेषं च विक्रीणावहै । अहं तुभ्यं हविः ददामि त्वं मह्यं फलं देहि ।

मन्त्रः

देहिमेददामितेनिमेधेहिनितेदधे ।
निहारञ्चहरासिमेनिहारन्निहराणितेस्वाहा ॥

शु. य. अ. 3 मं. 50 ॥

पदपाठः

देहि । मे । ददामि । ते । नि । मे । धेहि । नि । ते । दधे ॥

निहारमितिनि । हारम् । च । हरासि । मे । निहारमितिनि हारम् । नि । हराणि । ते । स्वाहा ॥

सरलार्थः

इन्द्रेण उच्यते । हे यजमान ! त्वं मे मह्यमिन्द्राय देहि हविः प्रथमं प्रयच्छ । ते तुभ्यं यजमानाय ददामि । अपेक्षितं पश्चात्प्रयच्छामि । मह्यमिन्द्राय निधेहि प्रथमं त्वं हविर्नितरां संपादय । तुभ्यं यजमानाय निदधे अपेक्षितं फलं नितरां संपादयामि । एवमिन्द्रवाक्यं श्रुत्वोत्तरार्धेन यजमान आह । नितरां ह्रियत इति निहारोमूल्येन क्रेतव्यं पदार्थं ब्रूते । निहारं मूल्येन क्रेतव्यवस्तुरुपं फलं मे यजमानाय प्रयच्छ । निहारं मूल्यभूतं हविः तुभ्यमिन्द्राय निहराणि नितरां समर्पयामि ।

मन्त्रः

अक्षन्नमीमदन्तह्यवप्रियाऽ अधूषत ।
अस्तोषतस्वभानवोविप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥

शु. य. अ. 3 मं. 51 ॥

पदपाठः

अक्कर्षन् । अमीमदन्त । हि । अव । प्रियाः । अधूषत ॥

अस्तोषत । स्भानवऽइतिस्व भानव विप्राः । नविष्ठया । मती । योज । नु । इन्द्र । ते । हरीऽइतिहरी ॥

सरलार्थः

आहवनीयमुपतिष्ठते । पितृयज्ञाख्ये कर्मणि ये पितरः सन्ति ते अस्माभिर्दत्तं हविः स्वरूपमन्नं भक्षितवन्तः । कथमेतदवगम्यते । अमीमदन्त-हर्षं प्राप्ताः । अस्मदीयां भक्तिमवगम्य प्रियाः प्रीतियुक्ताः सन्तः अधूषत । अहो स्वाद्वन्नं बहुदत्तमहो भक्तिरित्याद्यभिधानं स्तुतिः । अतो हे इन्द ! नु क्षिप्रं ते त्व हरी एतन्नामकौ हरितवर्णाश्वौ योज गमनाय रथे योजय । तवाभीष्टायाः पितृतृप्तेः संपन्नत्वात्ः पितृभिः सह त्वया आगन्तव्यम् ।

मन्त्रः

सुसन्दृशन्त्वाव्वयम्मघवन्नवन्दिषीमहि ।
प्रनूनम्पुर्णबन्धुरस्तुतोषासिव्वशां २ ॥ ऽअनुषोजान्विन्द्रतेहरी ॥

शु. य. अ. 3 मं. 52 ॥

पदपाठः

सुसन्दृशमितिसु सन्दृशम् । त्वा । व्वयम् । मघवन्नितिमघव्वन् । व्वन्दिषीमहि ॥

प्र । नूनम् । पूर्णबन्धुरऽइतिपूर्णबन्धुर । स्तुत । षासि । व्वशान् । अनु ॥

सरलार्थः

सुसन्दृशं शोभनदर्शनम् वयं हे मघवन् ! धनवन् ! इन्द्र ! त्वां प्रति स्तुतिकर्तारो भूयास्मेत्याशास्यते । सुसंदृशं सुष्ठु सम्यक् पश्यति सुसन्दृक् तं शोभनदर्शनम् । अनुग्रहदृष्ट्या सर्वस्य द्रष्टारम् । इत्थमस्माभिः स्तुतः त्वं वशान् कामयमानान् यजमानाननुलक्षीकृत्य नूनं प्रयासि संपूर्ण रथनीडोपेतो भूत्वा गच्छसि । हे मघवन् इन्द्र, स त्वं ते हरिः योजय ।

शब्दार्थः

भर्गः - तेजः **क्षेमाय** - अविनाशाय **धीः** - बुद्धिः **प्रघासिनः** - हविर्विशेषः **दूडभः** - दुर्दभः (प्रकर्षेण घस्यते भक्ष्यत इति प्रघासः) **पाहि** - रक्ष **रिशादसः** - हिंसकान् दस्यन्ति **अश्नोतु** - व्याप्नोतु **करम्भः** - यवमयो हविर्विशेषः **अथर्यः** - अतनवान् **अरण्ये** - वने **अस्मभ्यम्** - अस्मत्कृते **एनः** - पापवचनः **द्युम्नम्** - द्योतते यशोवा अन्नं **चकृम** - कृतवन्तः **वसुवित्तमम्** - अतिशयेन धनेन वेदितारम् **मीढुषः** - वृष्टिप्रदत्वेन सेवतुः **आयच्छस्व** - स्थापयव **गीः** - स्तौति **गार्हपत्यः** - गृहस्य पतिः **अक्रन्** - अकार्षुः **पुरीष्यः** - पाशव्यः (पशु) **निचुम्पुण** - नितरां चोपति मन्दं गच्छति । **रयिमान्** - धनवान् **अवभृथ** - अवाचीनं पात्राण्यस्मि न भ्रियन्त इत्यवभृथः । **पुष्टिवर्धनः** - पोषस्य वर्धयिता **दर्वि** - ओदनग्रहण काष्ठनिर्मित पात्रम् । **सुमेधा** - शोभनप्रज्ञः **इषम्** - अन्नम् **मोदमानः** - आनन्दितः **ऊर्ज्जम्** - उपसेचनम् **प्रवसन्** - देशान्तरं गच्छन् **निहारं** - मूल्येन क्रेतव्यवस्तु रूपं **हवामहे** - आह्वायामः **निहराणि** - नितरां समर्पयामि **कीलालः** - रसवचनः **अक्षन्नमीमदन्त** - भुक्तवन्तः पितरः **अधूषत** - धुनन्ति गात्राणि **वन्दिषीमहि** - अभिवादयामः **अस्तोषत** - स्तुतिं कृतवन्तः **वशान् अनु** - कामाननुप्रयासि **मती** - बुद्धिः **बन्धुरः** - रथनीडवाची **सुसंदृशं** - शोभनदर्शनम् **मघवा** - इन्द्रः

स्वाध्यायः

1. निम्नाङ्कितानां प्रश्नानां योग्य विकल्पं चित्वा उत्तरं लिखन्तु ।

(1) कीदृशाय विष्णवे नमः ?

(क) जलात्मने (ख) आकाशात्मने (ग) वाय्वात्मने (घ) पावकात्मने

(2) सर्व देवानां मुखं कः ?

(क) अग्निः (ख) जलम् (ग) वायुः (घ) आकाशम्

(3) भर्गः अर्थात् किम् ?

(क) शौर्यम् (ख) शौचम् (ग) तेजः (घ) एकमपि न

(4) प्रत्यक्षदेवेषु कस्य समावेशो भवति ?

(क) ब्रह्मणः (ख) जलस्य (ग) विष्णोः (घ) रुद्रस्य

(5) प्रचोदयादर्यात् किम् ?

(क) सम्प्रेरयात् (ख) सम्मार्जयात् (ग) सन्धारयात् (घ) सम्पारयात्

(6) प्रजाभ्यः धनप्रदायकः कः ?

(क) अग्निः (ख) सोमः (ग) कुबेरः (घ) विष्णुः

(7) प्रघासिनो हवामहे .... इति कस्य मन्त्रः ?

(क) वायुमन्त्रः (ख) जलमन्त्रः (ग) तेजोमन्त्रः (घ) प्रघासीमन्त्रः

(8) परोक्षदेवेषु कस्य समावेशो भवति ?

(क) जलस्य (ख) अग्नेः (ग) आदित्यस्य (घ) आकाशस्य

(9) पितृन् प्रति अग्निः किन्नयति ?

(क) कव्यान्नम् (ख) हविष्यान्नम् (ग) दुग्धान्नम् (घ) चित्रान्नम्

(10) देहि मे ददामि ते .... इति मन्त्रः कः ब्रूते ?

(क) वरुणः (ख) वायुः (ग) इन्द्रः (घ) सूर्यः

2. निम्नलिखित प्रश्नानां एकैकवाक्येन उत्तरं दीयताम् ।

(1) कस्य तेजः वयं ध्यायामः ?

(2) अग्निः अस्माकं रक्षणाय कुत्र तिष्ठतु ?

(3) अहं वीरैः सुपुत्रैः कीदृशो भवेयम् ?

(4) अग्निः अस्माषु किं स्थापयति ?

(5) अग्निः अस्मान् किं किं प्रयच्छति ?

(6) कानि चतुर्मासपर्वाणि ?

(7) पत्नी कस्मिनग्नौ करम्भपात्राणि जुहोति ?

(8) मोषूण इति मन्त्रः कः जपति ?

(9) 'अवभृथ' इति मन्त्रेण का क्रिया क्रियते ?

(10) पितृणां कृते अन्नप्रदानस्य मन्त्रः कः ?

3. मन्त्राणां भावार्थं लिखन्तु ।

(1) तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥

धियोषोनः प्रयोदयात् ॥

(2) अयमग्नि- पुरीष्योरयिमान्पुष्टिवर्द्धन- ॥

अग्ग्नेपुरीष्याभिद्युम्नमभिसहऽ आयच्छस्व ॥

(3) प्रघासिनो हवामहे मरुतश्चरिशादस- करम्भेण सजोषस- ॥

4. निम्नलिखित मन्त्राणां पूर्तिः विधेया ।

(1) आगन्नमव्विश्श्व .... आयच्छस्व ॥

(2) गृहामाबिभीत .... मोदमान- ॥

(3) मोषूण ऽ इन्द्रत्र .... बन्दतेगी- ॥

5. सन्धिं कुरुत ।

(1) रथः + अस्मान् (2) पाहि + अथर्ष्ष (3) अग्निः + गृहपतिः (4) आ + इमसि (5) मनसः + बहुः (6) इति + अथो (7) मरुतः + च (8) यत् + ग्रामे (9) देवैः + अस्ति (10) अनु + इन्द्रः

6. सन्धिविच्छेदं कुरुत ।

(1) सम्प्राडभि (2) पुरीष्याभि (3) यदारण्ये (4) दक्षिणाग्ने (5) येषामध्येति (6) इत्युप (7) यदरण्ये (8) महश्चिद्यस्य (9) कृत्त्वास्त्वम् (10) निहारञ्च

7. निम्नलिखितानां पदपरिचयं ददातु ।

(1) सवितुः (2) येन (3) प्रजाभिः (4) अस्मभ्यम् (5) मनसा (6) येषु (7) शान्त्यै (8) करम्भेण (9) सभायाम् (10) मघवन्

8. क्रियापदानां परिचयो देयः ।

(1) यासि (2) क्रीणावहै (3) वन्दते (4) चकृम (5) यजामहे (6) यच्छस्व (7) अश्नोतु (8) अस्ति (9) प्रचोदयतु (10) कुरुत

छात्रप्रवृत्तिः

अवभृथस्नानसामग्री ज्ञेया

विशिष्टज्ञानम्

यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥

●

14 शुक्लयजुर्वेदे तृतीयोऽध्यायः (माध्यन्दिनीय) भाग-4

प्रस्तावना

रुद्रतेजः समुद्भूतं द्विमूर्धानं द्विनासिकम् ।
षण्नेत्रं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकम् ॥
याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम् ।
स्रुवं स्रुचं च शक्तिं च अक्षमालां च दक्षिणे ॥
तोमरं व्यजनं चैव घृतपात्रं तु वामके ।
बिभ्रतं सप्तभिहस्तैद्विमुखं सप्तबिह्वकम् ॥
दक्षिणे च चतुर्जिह्वं त्रिजिह्वमुत्तरे मुखम् ।
द्वादशकोटिमूर्त्याख्यं द्विपञ्चाशत्कलायुतम् ॥
स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम् ।
रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् ॥
रौद्रं तु वहिननामानं वह्निमावाहयाम्यहम् ॥ (रुद्रकल्पे)

अग्निस्वरूपं वर्णयन्त ऋषयः कथयन्ति
भगवातः शङ्करस्य तेजसः समुद्भूतं (समुत्पन्नं)

द्विमस्तकं, द्विनासिकं, षण्नेत्रं, चतुः श्रोत्रं, त्रिपादं, सप्तहस्तकमग्निं ध्यायामि । दक्षिणभागे चतुर्हस्तकं, वामभागे त्रिहस्तकं, स्रुवं, स्रुचं, शक्तिम्, अक्षमालां, दक्षिणहस्तेषु धृतमस्ति, तोमरं, व्यजनं, घृतपात्रम् वामहस्तेषु धृतमस्ति । यस्य चरणत्रयं वर्तते । दक्षिणे करे स्वाहादेवी वामे च स्वधादेवी वर्तते । यस्य वाहनं मेषः अस्ति । येन रक्तवस्त्राणि धृतानि तथा रक्तपुष्पाणांमाल्यादीनि धारितानि तादृशः अग्निः सदा मे अभिमुखः भवतु ।

अग्निनारायणः प्रत्यक्षदेवता । विविध यज्ञाः अग्निं विना कथमपि भवितुं नार्हन्ति । अस्मिन् प्रकरणे शुक्लयजुर्वेद – माध्यन्दिनीशाखायाः तृतीयाध्यायस्य ५३ (53) तः ६३ (63) मन्त्राः पदपाठेन सह प्रयुक्ताः सन्ति । तेषां प्रमुखोविषयः पितृयज्ञे गार्हपत्याग्नेः उपस्थानं, साकमेघपर्वणः त्र्यम्बकहविमन्त्राः, रुद्रप्रार्थना, क्षुरप्रार्थना एवं यजमानस्य वपन क्रियायाः मन्त्राः सन्ति ।

अग्निस्वरूपम्



मन्त्रः

मनोन्वाहव्वामहेनाराशधं सेनस्तोमेन ।
पितृणाञ्चमन्मभिः ॥

शु.य.अ. 3 मं. 53 ॥

पदपाठः

मनः । नु । आ । हव्वामहे । नाराशधं सेन । स्तोमेन ॥ पितृणाम् । च । मन्मभिरितिमन्म भिः ।

सरलार्थः

गार्हपत्यमुपतिष्ठते । नु क्षिप्रं मन आह्वामहे पितृयज्ञानुष्ठानेन चितं पितृलोकं गतमिवासीत् अत आहूयते । यद्वा मनः मनोऽभिमानिदैवतमाह्वामहे । स्तोमेन स्तोत्रेण नाराशंसेन शंसः प्रशंसनं नराणां मनुष्याणां योग्यः शंसो नराशंसः तत्संबंधी नाराशंस्तेन । यत्र च मनुष्याः प्रशस्यन्ते तन्मानुषम् । किं च पितृणां च मन्मभिः पितरो यैः स्तोत्रैर्मन्यन्ते ते मन्मानस्तैः तादृशैः स्तोत्रैः आह्वायामः ।

मन्त्रः

आनऽएतुमनः पुनः क्क्रत्त्वेदक्षायजीवसे ।
ज्योक्क्चसूर्य्यन्दृशे ॥

शु.य.अ.रू.मं.-58 ॥

पदपाठः

आ । नः । एतु । मनः पुनरितिपुनः । कत्त्वे । दक्क्षाय । जीवसे ॥
ज्योक् । च । सूर्य्यम् । दृशे ॥

सरलार्थः

अस्माकं मनः पूर्वोक्तं चित्तं पुनर्भूयः आगच्छतु । क्रतवे सङ्कल्पाय यज्ञं सङ्कल्पयितुं दक्षाय दृढीकरणाय । चिरंजीवितुं सूर्यमवलोकयितुम् एतेषां सङ्कल्पादीनां सिद्धये मनः पुनरागच्छतु ।

मन्त्रः

पुनर्न्नः पितरोमनोददातुदेव्व्योजनः ।
जीवंव्व्रातधं सचेमहि ॥

शु. य. अ. रू मं. 55

पदपाठः

पुनः । नः । पितरः । मनः ददातु । दैव्व्यः । जनः ॥
जीवम् । व्व्रातम् । सचेमहि ॥

सरलार्थः

हे पितरः ! भवदनुज्ञया दैव्यो जनो नः मनः पूर्वोक्तं चित्तं पुनर्भूयः प्रयच्छतु । तथा सत्यनुष्ठानं कृत्वा भवत्प्रसादाज्जीवं जीवनवन्तं पुत्रपश्वादिकं गणं वयं सेवेमहि ।

मन्त्रः

व्वयधं सोमव्व्रतेतवमनस्तनूषुबिब्भ्रत ।
प्रजावन्तः सचेमहि ॥

शु. य. अ. रू. मं. - पू- ॥

पदपाठः

व्वयम् । सोम । व्व्रते । तव । मनः । तनूषु । बिब्भ्रतः ॥
प्रजावन्त ऽ इतिप्प्रजाव्वन्त । सचेमहि ॥

सरलार्थः

अत्र पितृयज्ञे सोमनामको देवोऽस्ति । हे सोम ! वयं यजमानाः तव व्रते कर्मणि वर्तमानाः तनूषु भवत् शरीरेषु मनो बिभ्रतः, अस्मदीयं चित्तं धारयन्तः त्वत्कारुण्यात् प्रधावन्तः पुत्रपौत्रादिसंपन्नाः सन्तः सेवेमहि ।

मन्त्रः

एषतेरुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषते
रुद्रभाग ऽ आखुस्तेपशुः ॥

शु. य. अ. रु. मं. – 57 ॥

पदपाठः

एषः । ते । रुद्र । भागः । सह । स्वस्रा । अम्बिकया । तम् । जुषस्व । स्वाहा । आखुः । ते । पशुः ॥

सरलार्थः

रोदयति विरोधिनां शतमिति रूद्रः । हे रुद्र ! तव स्वस्रा भगिन्या अम्बिकया नाम्न्या सह एषो ऽ स्माभिर्दीयमानः पुरोडाशः भागः भजनीयः स्वीकर्तुं योग्यः । तं तथाविधं पुरोडाशं त्वं सेवस्य । हे रुद्र एष–अस्माभिः प्रदत्तः पुरोडाशः ते तवाखुः पशुः मूषकः पशुत्वेन समर्पितः । आखुदानेन तुष्टो रुद्रस्तयाम्बिकया यजमानपशून् न मारयति ।

मन्त्रः

अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ।
यथानोवस्यसस्करद्यथानः श्रेयसस्करद्यथानो व्यवसाययात् ॥

शु. य. अ. रू. मं. 58

पदपाठः

अव । रुद्रम् । अहीमहि । अव । देवम् । त्र्यम्बकमितित्रि अम्बकम् ॥
यथा । नः । वस्यसः । करत् । श्रेयसः । व्यवसाययादितिवि अवसाययात् ॥

सरलार्थः

रुद्र.इति मनसा तमवगत्यादीमहि त्वदनुग्रहादन्नं भक्षयेम । तथा त्र्यम्बकं त्रीण्यम्बकानि नेत्राणि यस्य तादृशं देवमवत्रिनेत्रोऽयं देव इति मनसावगत्यादी महित्यनु वर्तते । देवताभ्यः पृथक्कृत्व रुद्रमहीमहि आदयामो भोजयामः । यथा येन प्रकारेण अस्मान् वस्यसः करात् विस्तृतकरान् वसनशीलानसो कुर्यात् । श्रेयसः करत् ज्ञातिषु प्रशस्यकरान् कुर्यात् । यथाचास्मान् व्यवसाययात् सर्वेषु कार्येषु निश्चययुक्तान् कुर्यात् ।

मन्त्रः

भेषजमसिभेषजङ्गवेश्वायपुरुषायभेषजम् ।
सुखम्मेषायमेष्यै ॥

शु. य. अ. रू. कं – 59

पदपाठः

भेषजम् । असि । भेषजम् । गवे । अश्वाय । पुरुषाय । भेषजम् ॥
सुखमितिसु खम् । मेषाय । मेष्यै ॥

सरलार्थः

भेषजमसि हे रुद्र त्वम् औषधवत्सर्वोपद्रवनिवारकः असि । अतः अस्मदीयेभ्यो गवे – अश्वाय – पुरुषाय च सर्वव्याधि निवारकमौषधं देहि । अनेन मन्त्रेण गृहपशूनां क्षेमप्राप्तिः भवति ।

मन्त्रः

त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥
त्र्यम्बकं यजामहे सुगन्धिम्पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥

शु. य. अ. रू. कं - 60

पदपाठः

त्र्यम्बकमितित्रि अम्बकम् । यजामहे । सुगन्धिमितिसुगन्धिम् । पुष्टिवर्द्धनमितिपुष्टि उर्वार्द्धनम् । उर्वारुकमिवेत्युर्वारुकम् इव । बन्धनात् । मृत्योः । मुक्षीय । मा । अमृतात् ॥

पतिवेदनमितिपति व्वेदनम् । इतः ! मुक्षीय । मा । अमुतः ॥

सरलार्थः

त्रीणि अम्बकानि सूर्यशशाङ्कवह्निरूपाणि नेत्राणि यस्य सः त्र्यम्बकः । सुगन्धिदिव्यगन्धोपेतं मर्त्यधर्महीनं पुष्टिवर्धनं धनधान्यादि पुष्टेर्वर्धयितारं नेत्रत्रयोपेतं रुद्रं पूजयामः । रुद्रप्रसादात् मृत्योर्मुक्षीय-अपमृत्योः संसारमृत्योः च मुक्तो भूयासम् । स्वर्गरूपान्मुक्तिरूपात्त्वामृतान्मामुक्षीय मुक्तो मा भूयासम् ।फलमत्यन्तपक्वं सत् बन्धनात् प्रमुच्यते तद्वत् यजमानसंबन्धिन्यः कुमार्योऽपि पतिं वेदयति तं भर्तुर्लम्भयितारं मातृपितृभातृवर्गान्मुक्षीय मुक्ता भूयासम् ।

मन्त्रः

एतत्ते रुद्रावसन्तेन परो मूजवतोतीहि ।
अवततधन्वा पिनाकावसः कृत्तिवासाऽअहिंसन्नः शिवोतीहि ॥

शु. य. अ. रू. कं - 51 ॥

पदपाठः

एतत् । ते । रुद्र । अवसम् । तेन । परः । मूजवतऽइतिमूज व्वत । अति । इहि ॥

अवततधन्वेत्यवतत धन्वा । पिनाकावस इतिपिनाक अवसः । कृत्तिवासाऽइतिकृत्तिव्वासाः । अहिंसन् । नः । शिवः । अति । इहि ॥

सरलार्थः

रौद्र्यास्तारपङ्क्तिः । मूजवान्नाम कश्चित्पर्वतः रुद्रस्य निवासस्थानम् । हे रुद्र ! एतत्ते तव अवसं हविः शेषाख्यं भोज्यं तेन सहितस्त्वं मूजवतः पर्वतात्परः परभागवर्ती सन्नतीहि अतिक्रम्य गच्छ । अवरोपितधनुष्कः अस्मद्विरोधिनां त्वया निवारितत्वादित उर्ध्वं धनुषि ज्या समारोपणस्य प्रयोजनाभावादवरोपणमेवेदानीं युक्तम् । यथा धनुर्दृष्ट्वा प्राणिनो न बिभ्यति तथा त्वदीयं धनुः वस्त्रादिना प्रच्छद्या हे रुद्र ! त्वं कृत्तिवासाः चर्माम्बरो नोऽस्मान् हिंसन् हिंसामकुर्वन् शिवोऽसम्दीयपूजया संतुष्टः कोपरहितो भूत्वा अतीहि पर्वतमतिक्रम्य गच्छ ॥

मन्त्रः

त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥

शु. य. अ. रू. कं. - 62

पदपाठः

त्र्यायुषमितित्रि आयुषम् । जमदग्नेरितिजमत् अग्नेः । कश्यपस्य । त्र्यायुषमितित्रिआयुषम् ॥ यत् । देवेषु । त्र्यायुषमितित्रि आयुषम् । तत् । नः । अस्तु । त्र्यायुषमितित्रि आयुषम् ॥

सरलार्थः

यजमानो मुण्ड्यमानो जपति । जमदग्नेः मुनेर्यत्त्र्यायुषं त्रयाणां बाल्ययौवनस्थाविराणामायुषां समाहारस्त्र्यायुषं तथा

देवेषु इन्द्रादिषु यत्र्यायुजमस्ति तत्सर्वं त्र्यायुषं अस्माकं यजमानानामस्तु । जमदग्न्यादीनां बाल्यादिषु यादृशं चरितं तादृशं नः भूयात् ।

मन्त्रः

शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहि ६ सीः ।
निवर्त्तयाम्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसुवीर्ष्यौय ॥

शु. य. अ. रू. कं. 63 ॥

पदपाठः

शिवः । नाम । असि । स्वधितिरितस्व धितिः । ते । पिता । नमः । ते । अस्तु । मा । मा । हि ६ सीः ॥ नि । व्वर्त्तयामि । आयुषे । अन्नादद्यायेत्यन्न अद्द्याय । प्रजननायेतिप्रजननाय । रायः । पोषाय । सुप्रजास्त्वायेतिसुप्रजाः त्वाय । सुवीर्ष्यायेतिसु व्वीर्ष्याय ॥

सरलार्थः

लोहक्षुरमादत्ते । हे क्षुर ! त्वं नाम शिवः शान्तोऽसि । स्वधितिः वज्रं ते तवपिता । तुभ्यं नमोस्तुते । मां मा हिंसीः । हे यजमान त्वां निवर्तयामि मुण्डयामि ।

आयुषेजीवनाय अन्नाद्यायान्नभक्षणाय प्रजननाय सन्तानाय धनस्य पुष्ट्यै शोभनापत्यतायै सुवीर्याय शोभनसामर्थ्याय । शोभनवीर्याय च ।

शब्दार्थ

नाराशंसेन – येन नराः प्रशस्यन्ते **मन्मभिः** – मननीयैः स्तोत्रैः मन आह्वयाम । **एतु** – आगच्छतु **क्रत्वे** – यज्ञे **दक्षाय** – संकल्पसमृद्धिः, उत्साहाय **जीवसे** – चिरं जीवितुम् **दैव्योजनः** – देवसंबन्धीजनः **ददातु** – प्रयच्छतु **व्रातम्** – पुत्रपश्वादिगणम् **सचेमहि** – सेवेमिह **बिभ्रतः** – धारयन्तः **प्रजावन्तः** – पुत्रपौत्रादिसम्पन्नाः **स्वस्रा** – भगिन्या **आखुः** – मूषकः **अहीमहि** – त्वदनुग्रहादन्नं भक्षयेम **अवगम्य** – ज्ञात्वा **श्रेयसः** – निश्चययुक्तान् कुर्यात् **भेषजम्** – औषधम् **त्र्यम्बकं** – नेत्रत्रयोपेतं **यजामहे** – पूजयामः **पुष्टिवर्धनम्** – पोषस्य वर्ध चितारम् **मुक्षीय** – मुक्तो भूयासम् **पतिवेदनम्** – भर्तृलम्भयितारम् **अतीहिः** – गच्छ **अवसम्** – हविः शेषाख्यं **अवततधन्वा** – अवतारितधनुः **पिनाकः** – रुद्राङ्कुशः **कृत्तिवासाः** – चर्मवसनः **अहिंसन्न** – अविनाशयन्तः **त्र्यायुषम्** – बाल्ययौवनस्य – विराणि **देवेषु** – इन्द्रादिषु **शिवः** – शान्तः **निवर्तयामि** – मुण्डयामि **आयुषे** – जीवनाय **प्रजननाय** सन्तानाय **रायस्पोषाय** – धनस्यपुष्टयै ।

स्वाध्याय

1. निम्नाङ्कितानां प्रश्नानां योग्य विकल्पं चित्वा उत्तरं लिखन्तु ।

(1) अग्निः कस्य मस्तकात् समुद्भूतः ?

(क) ब्रह्मणः (ख) विष्णोः (ग) रुद्रस्य (घ) गणेशस्य ।

(2) अग्नेः पार्श्वे कति नासिका ?

(क) २ (ख) ३ (ग) ४ (घ) ५

(3) पितृयज्ञे किन्नामको देवोऽस्ति ?

(क) आदित्यः (ख) इन्द्रः (ग) वरुणः (घ) सोमः

(4) सङ्कल्पादीनां सिद्धये कस्यागमनमावश्यकम् ?

(क) इन्द्रियाणाम् (ख) हस्तानाम् (ग) मनसः (घ) श्रोत्राणाम्

(5) अग्नि: वामे किन्नास्ति ?

(क) तोमरम् (ख) व्यजनम् (ग) घृत्तपात्रम् (घ) अक्षमाला

(6) त्र्यम्बकं शब्दस्य कोऽर्थ: ?

(क) त्रीणिनेत्राणि (ख) त्रीणि श्रोत्राणि (ग) त्रय:पादा: (घ) तिस्र:रसना:

(7) औषधवत् सर्वोपद्रवनिवारक: क: अस्ति ?

(क) सूर्य: (ख) रुद्र: (ग) सोम: (घ) इन्द्र:

(8) अग्ने: वाहनं किमस्ति ?

(क) मेष: (ख) महिषी (ग) हंस: (घ) गरुड: ।

(9) एतत्ते रुद्रा .... परो मूजवतो तीहि ॥

(क) ग्रीष्मेण (ख) वसन्तेन (ग) शैशिरेण (घ) शारदेन

(10) 'स्वस्रा' शब्दस्य कोऽर्थ: ?

(क) जामाता (ख) भागिनेय: (ग) भगिनी (घ) मातुल:

2. निम्नाङ्कित प्रश्नानाम् एकवाक्येन उत्तराणि लिखन्तु ।

(1) पितृयज्ञानुष्ठानेन चित्तं कुत्र गच्छति ?

(2) मन: किमर्थं पुनरागच्छतु ?

(3) पितृ यज्ञे क: देव: अस्ति ?

(4) 'भेषजमस्ति भेषजङ्गवे' ... अनेन मन्त्रेण गृहपशुभ्य: कस्य प्राप्तिर्भवति ?

(5) ''पुनर्न: पितरो...'' इति कस्य मन्त्र: अस्ति ?

(6) को नाम रुद्र: ?

(7) श्रेय: अर्थात् किम ?

(8) त्रीण्यम्बकानि केषां रूपाणि सन्ति ?

(9) वज्रशब्दस्य पर्यायवाची शब्द: क: ?

(10) अस्मिन् प्रकरणे कति मन्त्रा: सन्ति ?

3. मन्त्राणां भावार्थं लिखन्तु ।

(1) आनऽएतुमन६ पुन: क्रतवेदक्षायजीवसे ज्योक्चसूर्यन्दृशे ॥

(2) बय ६ सोमव्व्रतेतवमनस्तनूषुबिभ्रत६ प्रजावन्त६ सचेमहि ॥

(3) भेषजमसिभेषजङ्गवेश्श्वायपुरुषायभेषजम् सुखम्मेषायमेष्यै ॥

4. निम्नलिखित मन्त्राणां पूर्ति: विधेया ।

(1) पुनर्न६ पितरो .... सचेमहि ॥

(2) एषतेरुद्रभाग९ .... पशु९ ॥

(3) शिवोनामासि .... सुवीर्षाय ॥

5. निम्नाङ्कितशब्दरूपाणां परिचयं यच्छत ।

(1) पितृणाम् (2) मन्मभिः (3) दक्षाय (4) वयम् (5) अम्बिकया (6) रुद्रम् (7) गवे (8) अश्वाय (9) अमृतात् (10) मेषाय

6. निम्नलिखितानि धातुरूपाणि परिचिनुत ।

(1) सचेमहि (2) ददातु (3) जुषस्व (4) अस्तु (5) वर्तयामि (6) असि (7) जपति (8) भूयासम् (9) कुर्यात् (10) भोजयामः

7. सन्धिविच्छेदं कुरुत ।

(1) मनोन्वा (2) सूर्षन्द्दशे (3) पितरोमनोददातु (4) मनस्तनूषु (5) सहस्वस्राम्बिकया (6) स्वाहैषते (7) भेषजङ्गवे (8) षद्देवेषु (9) त्र्यायुषम् (10) निवर्तयाम्यायुषे

8. सन्धिं कुरुत ।

(1) पूर्व + उक्तम् (2) भवत् + अनुज्ञया (3) पुत्रपशु + आदिकम् (4) तया + अम्बिकया (5) पृथक् + कृत्य (6) जम् + गवे (7) मृत्योः + मुक्षीय (8) एतत् + ते (9) पिनाक + अवसः (10) एतत् + नामकस्य ।

छात्रप्रवृत्तिः

अग्निवासचक्रम् अवबोधनीयम्

विशिष्टज्ञानम् :

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम् ॥

15 रुद्राभिषेकीय-ऋग्वेदमन्त्राः - भागः-1

प्रस्तावना

श्रीसोमनाथमित्याख्यं द्वादशज्योतिर्लिङ्गेषु प्रथमं ज्योतिर्लिङ्गं गुर्जरप्रदेशे प्रभासक्षेत्रे वेरावलनामकस्थले विराजते । अनेन श्लोकेन तज्ज्ञायते.....

सौराष्ट्रदेशे विशदेऽतिरम्ये
ज्योतिर्मयं चन्द्रकलावतंसम् ।
भक्तिप्रदानाय कृपावतीर्णं
तं सोमनाथं शरणं प्रपद्ये ॥
(द्वादशज्यतिलिङ्गस्तोत्रम्)

अस्य ज्योतिर्लिङ्गस्याविर्भावविषये एका शिवपुराणे कथा प्राप्यते । सा यथा

पुरा क्रियादक्षो दक्षः प्रजापतिः स्वीयाः सप्तविंशतिकन्यकाः चन्द्रमसे ददौ नाम तेन सह तासां कन्यकानां विवाहसंस्कारमकरोत् । पुनश्चन्द्रः तासु कन्यकासु रोहिण्यामधिकमस्निह्यत् ।

इत्थमनौचित्यमालोक्य प्रजापतिः चन्द्रमसं शशाप यत् क्षयरोगग्रस्तो भव । अभिशापात् चन्द्रमसः सुधांशवः दिनानुदिनं नाशप्रायाः अभवन् । तेन हि दुःखितोऽसौ चन्द्रमाः ब्रह्मणः प्रेरणया भगवन्तमाशुतोषमाराधयामास । प्रसन्नः भगवान् शिवः तस्मै अमरत्ववरमदात् । तथा च क्षयस्य सम्पूर्णनिवारणं तु न शक्यं परं प्रतिमासं पञ्चदशदिनावधि उत्तरोत्तरपूर्णत्वम् उत्तरोत्तरक्षयत्वं च तस्य चन्द्रमसः अकरोत् । ततः चन्द्रमसा अन्यैः देवैश्च प्रार्थितो भगवान् शङ्करः तत् स्थानमेव ज्योतिर्लिङ्गस्वरूपेण स्वीचकार । त्रिषु लोकेषु च सोमनाथनाम्ना प्रसिद्धिमवाप । अस्मिन्नेव स्थले भगवान् श्रीकृष्णः नैकाः लीलाः क्रतवान् । साम्प्रतं तज्ज्योतिर्लिङ्गं परितो हरितो मुखानि उल्लासयन् राराज्यते ।

यथा चन्द्रमाः भगवन्तं शिवमाराध्य क्षयरोगात् मुक्तिमवाप तथैव साम्प्रतकाले अपि जनाः सोमनाथं समर्च्य रोगात् मोक्तुं शक्नुवन्ति । तथा च चन्द्रमाः मनसः कारकः अतः मानसिकी शान्तिरपि सोमनाथार्चनेन भवति । तथा च लक्ष्मीसहजः अयं चन्द्रमाः अतः लक्ष्म्याः प्राप्तिरपि निश्चप्रचं सोमनाथार्चनेन शक्या । अतः अस्माभिः नितान्तं सेवनीयो भगवान् सोमनाथः इतिभावः ।

मन्त्रः

हरिः ॐ कद्रुद्राय प्रचेतसे मीळहुष्टमाय तव्यसे ।
वोचेम शंतमं हृदे ॥ 1 ॥ ऋग्वे-मण्डल-1 अध्याय-8

सूवत-43 (ऋग्वेद-मण्डल-1 अध्याय-4 सूक्त-43) मन्त्रः 1 ॥

पदपाठः

कत् । रुद्राय । प्रऽचेतसे । मीळहुःऽतमाय । तव्यसे । वोचेम । शम ऽ तमम् । हृदे ॥

सरलार्थः

मंत्रेऽस्मिन् रुद्रः कीदृशः इति वर्णितमस्ति । सोऽयं रुद्रः मेधायुक्तः, अभीष्टवर्षकारकः, बलशाली वर्तते । अयं रुद्रः अस्मभ्यं सुखप्रदाता भवेत्, एतदर्थं वयं तस्य स्तुतिपाठं कुर्मः ।

मन्त्रः

यथानो अदितिः करत्पश्वे नृभ्यो यथा गवे ।
यथा तोकाय रुद्रियम् ॥ 2 ॥ ऋ. मं. 1 अ. 4. सू. 43. मं. 2 ॥

पदपाठः

यथा । नः । अदितिः । करत् । पश्वे । नृऽभ्यः । यथा । गवे । यथा । तोकाय । रुद्रियम् ॥

सरलार्थः

या भूमिः अस्माकं गो-मानव-प्रजादीनां कृते अन्नादिकं यच्छति । सा भूमि रुद्रसम्बन्धि औषध्यादिकम् उत्पादयतु ।

मन्त्रः

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति ।
यथा विश्वे सजोषसः ॥ 3 ॥ ऋ. मं. 1 अ. 4 सू. 43. मं. 3 ॥

पदपाठः

यथा । नः । मित्रः । वरुणः । यथा । रुद्रः । चिकेतति । यथा । विश्वे । सऽजोषसः ॥

सरलार्थः

यया औषध्या मित्रावरुणौ एवं रुद्र-देवता-समान-प्रीति-युक्ताः सन्ति तया सर्वे देवाः अस्माकम् उपरि संतुष्टाः भवेयुः ।

मन्त्रः

गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् ।
तच्छंयोः सुम्नमीहये ॥ 4 ॥ ऋ. मं. 1 अ. 4 सू. 43 मं. 4 ॥

पदपाठः

गाथऽपतिम् । मेघपतिम् । रुद्रम् । जलाषऽभेषजम् । तत् । शम्ऽयोः । सुम्नम् । ईमहे ॥

सरलार्थः

अस्माकं स्तुतेः वृद्धिकर्ता, यज्ञस्य स्वामी, सुखस्व रूपसमस्तौषधियुक्तः रुद्रः अस्ति । तेन सह अस्माभिः स्वास्थ्यसुखस्य कृते याच्यते ।

मन्त्रः

यः शुक्रईव सूर्यो हिरण्यमिव रोचते ।
श्रेष्ठो देवानां वसुः ॥ 5 ॥ ऋ. मं. 1 अ. 4 सू. 43 मं. 5 ॥

पदपाठः

यः शुक्रः ऽ इव । सूर्यः । हिरण्यम् ऽ इव । रोचते । श्रेष्ठः । देवानाम् । वसुः ॥

सरलार्थः

अयं रुद्रः सूर्यसमानतेजस्वी जाज्वल्यमानः, हिरण्यसमान-कान्तियुक्तः, देवाधिदेवः, सर्वदेवेषु श्रेष्ठतमः, समस्तैश्वर्याधिपतिः अस्ति ॥

मन्त्रः

शं नः करत्यर्वतेसुगं मेषाय मेष्ये ।
नृभ्यो नारिभ्यो गवे ॥ 6 ॥ ऋ. मं. 1 अ. 8. सू. 43. मं. 6 ॥

पदपाठः

शम् । नः । करति । अर्वते । सुऽगम् । मेषाय । मेष्ये । नृऽभ्यः । नारिऽभ्यः । गवे ॥

सरलार्थः

अस्माकं सविधे ये पशवः सन्ति, तेषां कृते, अश्वमेष-अज-गवादीनां कृते, सः रुद्रः कल्याणकारी भवेत् ।

मन्त्रः

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् ।
महि श्रवस्तुविनृम्णम् ॥ 7 ॥ ऋ. मं. 1 अ. 8 सू. 43 मं. 9 ॥

पदपाठः

अस्मे इति । सोम । श्रियम् । अधि । नि । धेहि । शतस्य । नृणाम् । महि । श्रवः । तुविऽनृम्णम् ॥

सरलार्थः

हे सोम ! मानवेषु व्याप्तं शतगुणैश्वर्यं त्वं तेभ्यः प्रयच्छ । अस्माकं बलेन सहितं महत् यशः त्वं प्रयच्छ ॥

मन्त्रः

मा नः सोमपरिबाधो मारातयो जुहुरन्त ।
आ न इन्दो वाजे भज ॥ 8 ॥ ऋ. मं. 1 अ. 8 सू. 43. मं. 8

पदपाठः

मा । नः । सोमऽपरिबाधः । मा । अरातयः । जुहुरन्त । आ । नः । इन्दो इति । वाजे । भज ॥

सरलार्थः

सोमयागे ये बाधकाः दस्यवः सन्ति, ते अस्माकं कृते दुःखं न यच्छन्तु । शत्रवः अस्मान् न पीडयन्तु । त्वम् अस्मभ्यं बलं प्रयच्छ ॥

मन्त्रः

यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य ।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥ 9 ॥ ऋ. मं. 1. अ. 8. सू. 43. मं. 9 ॥

पदपाठः

याः । ते । प्रऽजाः । अमृतस्य । परस्मिन् । धामन् । ऋतस्य । मूर्धा । नाभा । सोम । वेनः । आऽभूषन्तीः । सोम । वेदः ॥

सरलार्थः

हे सोम ! त्वम् उत्तमस्थानयुक्तः असि । त्वं संसारस्य मूर्धसदृशः असि । त्वं स्वप्रजायाः उपरि स्नेहं कुरु । प्रजया त्वं विभूषितो भव, प्रजया त्वं ज्ञातो भव ।

मन्त्रः

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ 10 ॥

ऋ. मं. 1. अ. 16. सू. 114. मं. 1 ॥

पदपाठः

इमाः । रुद्राय । तवसे । कपर्दिने । क्षयत्ऽवीराय । प्र । भरामहे । मतीः । यथा । शम् । असत् । द्विऽपदे । चतुःऽपदे । विश्वम् । पुष्टम् । ग्रामे । अस्मिन् । अनातुरम् ।

सरलार्थः

अस्मिन् ग्रामे ये पशवः निवासं कुर्वन्ति । ये मानवाः निवासं कुर्वन्ति ते सर्वे द्विपादयुक्ताः वा चतुषादयुक्ताः सुखिनः भवन्तु । अस्मिन् ग्रामे निवसन्तः सर्वे मानवाः प्राणिनः निरामयाः एवं पुष्टाः भवन्तु । तादृशी स्तुतिः जटिलरुद्रं प्रति वीराणां स्वामिनं प्रति अस्माभिः क्रियते ।

मन्त्रः

मृळानो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ 11 ॥

ऋ. मं. 1. अ. 16. सू. 114. मं. 2 ॥

पदपाठः

मृळ । नः । रुद्र । उत । नः । मयः । कृधि क्षयत्ऽवीराय । नमसा । विधेम । ते ॥ यत् ।
शम् । च । योः । च । मनुः । आऽयेजे । पिता । तत् । अश्याम । तव । रुद्र । प्रऽनीतिषु ॥

सरलार्थः

हे रुद्र ! दयां कुरू, सुखं ददातु । त्वं वीराणां स्वामि असि । वयं त्वां नमस्कुर्मः । मनुना यज्ञेन या शांतिः प्राप्ता तादृशीं शान्तिं भवतः कृपया वयं प्राप्नुयाम ।

मन्त्रः

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः । (मीढ्वः)
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः ॥ 12 ॥

ऋ. मं. 1. अ. 16. मू. 114 मं. 3 ॥

पदपाठः

अश्याम । ते । सुऽमतिम् । देवऽयज्यया । क्षयत्ऽवीरस्य । तव । रुद्र । मीढ्वः ।
सुम्नऽयन् । इत् । विशः । अस्माकम् । आ । चर । अरिष्टऽवीराः । जुहवाम । ते । हविः ॥

सरलार्थः

हे रुद्र ! वयं भवताम् उपासनया देवार्चनेन तव दयादृष्टिं प्राप्नुमः । त्वमस्माकं सन्ततिभ्यः सुखं प्रयच्छ । हर्षितवीरयुक्ताः वयं भवते हविर्यच्छामः ।

मन्त्रः

त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥ 13 ॥

ऋ. मं. 1. अ. 16 सू. 114 मं. ॥

पदपाठः

त्वेषम् । वयम् । रुद्रम् । यज्ञऽसाधम् । वङ्कुम् । कविम् । अवसे । नि । हवयामहे । आरे । अस्मत् । दैव्यम् । हेळः । अस्यतु । सुऽमतिम् । इत् । वयम् । अस्य । आ । वृणीमहे ॥

सरलार्थः

हे रुद्र ! त्वं दीप्तियुक्तः, यज्ञसिद्धिकर्ता, तिर्यग्गतियुक्तः असि । रक्षानिमित्तं वयम् मेधाभिः रुद्रस्य आवाहनं कुर्मः । स देवानां क्रोधस्य निवारणं करोतु । वयं तस्य रुद्रस्य अनुग्रहं वाञ्छामः ।

मन्त्रः

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥ 14 ॥

ऋ. मं. 1. अ. 16. सू. 114. मं. 5 ॥

पदपाठः

दिवः वराहम् । अरुषम् । कपर्दिनम् । त्वेषम् । रुपम् । नमसा । नि । हवयामहे । हस्ते । बिभ्रत् । भेषजा । वार्याणि । शर्म । वर्म। छर्दिः । अस्मभ्यम् । यंसत् ।

सरलार्थः

वयम् आकाशस्य घोररूपयुक्तं, रक्तवर्णयुक्तं, जटाधारिणम् एवं महान्तम् तेजस्विरुद्रं प्रणमामः । नमस्कारपूर्वकम् आवाहनं कुर्मः । सः वरणीयौषधिं हस्ते धृत्वा अस्मभ्यं सुखं यच्छतु । स्वरक्षासाधनेन अस्मान् भयरहितान् करोतु ।

मन्त्रः

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥ 15 ॥

ऋ. मं. 1. अ. 16. सू. 114. मं. 6 ॥

पदपाठः

इदम् । पित्रे । मरुताम् । उच्यते । वचः । स्वादोः । स्वादीयः । रुद्राय । वर्धनम् । रास्व । च । नः । अमृत । मर्तऽभोजनम् । त्मने । तोकाय । तनयाय । मृळ ॥

सरलार्थः

मरुद्गणानां जनकः रुद्रनिमित्तम् इदं मधुरस्तोत्रं वयम् उच्चारयामः । हे अविनाशि रुद्र ! त्वम् अस्मभ्यं सेवनीय-पदार्थानां प्रदानं कुरु । एवम् अस्माकं सन्ततिषु दयां कुरु ।

शब्दार्थाः

प्रचेतसे - मेधाविने **पुष्टं** - बलयुक्तं **अदितिः** - पृथ्वी **ग्रामे** - नगरे **नृभ्यः** - मानवेभ्यः **कपर्द्दिने** - जटाधारिणे **गवे** - धेनवे **चतुष्पदे** - पशवे **रुद्रः** - शिवः **मनुराये** - मनुराज्ञे **सजोषसः** - संतुष्टः **क्षयद्वीराय** - वीरनाशकाय **भेषजम्** - औषधम् **सुमतिं** - सुबद्धिं **जलाषभेषजम्** - आरोग्यम् **देवयज्यया** - उपासनाय **मेधपतिं** - यज्ञपतिं **अस्माकं** - नः **हिरण्यमिव** - सुवर्णमिव **त्वषं** - दीप्तिम् **सूर्यः** - भास्करः **पित्रे** - जनके **श्रेष्ठः** - उत्तमः **स्वादीय** - मधुरम् **देवानां** - सुराणां **तनयाय** - पुत्राय **शम्** - कल्याणम् **तोकाय** - बालकाय **नः** - अस्माकम् **नृभ्यः** - मानवेभ्यः **सोमः** - चन्द्रः **बाधः** - बाधकः **आरातयः** - दस्यवः **अमृतस्य** - पीयुषस्य **निष्कं** - आभूषणविशेषम् **विश्वरूपम्** - व्याप्तं **ओजीयः** - बलवत्

स्वाध्यायः

1. निम्नाङ्कितानां प्रश्नानां योग्य-विकल्पं चित्वा उत्तरं लिखन्तु ।

(1) गुर्जर प्रदेशे कस्मिन् क्षेत्रे श्रीसोमनाथः विराजते ?

(क) कच्छक्षेत्रे (ख) प्रभासक्षेत्रे (ग) द्वारिकाक्षेत्रे (घ) स्तम्भक्षेत्रे

(2) पृथ्वी कस्य सम्बन्धि औषध्यादिकम् उत्पादयति ?

(क) सूर्यः (ख) अग्निः (ग) रुद्रः (घ) इन्द्रः

(3) रुद्रः केन सदृशः तेजस्वी अस्ति ?

(क) गणेशेन (ख) वरुणेन (ग) इन्द्रेण (घ) सूर्येण

(4) 'सुमति' शब्दस्य कोऽर्थः ?

(क) सुबुद्धिः (ख) सद्लक्ष्मीः (ग) सद्भक्तिः (घ) सद्गतिः

(5) उत्तमस्थानयुक्तः कः देवः अस्ति ?

(क) इन्द्रः (ख) वरुणः (ग) सोमः (घ) आदित्यः

(6) सोमः अस्यभ्यं किं प्रयच्छति ?

(क) भक्तिम् (ख) समृद्धिं (ग) लक्ष्मीम् (घ) बलम्

(7) यास्ते प्रजा .... परस्मिन् धामन्नृतस्य ।

(क) ओजस्य (ख) मृतस्य (ग) अमृतस्य (घ) धनस्य

(8) किं नाम भेषजम् ?

(क) औषधम् (ख) हिरण्यम् (ग) जलम् (घ) रजतम्

(9) इमा रुद्राय तवसे .... क्षयद्वीराय प्रभरामहे मतीः ।

(क) प्रघासिने (ख) कपर्दिने (ग) वर्मिणे (घ) धन्विने

(10) तिर्यग् गतियुक्तः कः देवः अस्ति ?

(क) मित्रः (ख) वरुणः (ग) सोमः (घ) रुद्रः

2. निम्नलिखित प्रश्नानाम् एकवाक्येन उत्तराणि ददत ।

(1) 'कद्रुद्राय प्रचेतसे' इति मन्त्रे रुद्रः कीदृशः इति लिखत ।

(2) पृथ्वी किं प्रयच्छति ?

(3) प्रीतियुक्ताः देवाः कीदृशाः भवेयु ?

(4) अश्वादीपशूनामुपरि रुद्रः किं करोतु ?

(5) मधुरस्तोत्रोच्चारणेन कस्य प्राप्तिर्भवेत् ?

(6) अविनाशीरुद्रः कस्य जनकः अस्ति ?

(7) सोमस्याग्रे किं प्रार्थितमस्ति ?

(8) शान्तिसुखयोः प्राप्तिः कथं भविष्यति ?

(9) सन्तत्यां दयाप्राप्तिः कथं भविष्यति ?

(10) जटिलरुद्रं प्रति का स्तुतिः कृताऽस्ति ?

3. मन्त्राणां भावार्थं लिखन्तु ।

(1) कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे ।
वोचेम शंतमं हृदे ॥

(2) यः शुक्रो इव सूर्यो हिरण्यमिव रोचते ।
श्रेष्ठो देवानां वसु. ॥

(3) यास्ते प्रजा अमृतस्य परस्मिन् धामन्नृतस्य ।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥

4. निम्नलिखितमन्त्राणां पूर्तिः विधेया ।

(1) गाथपतिं .... सुम्नमीमहे ॥

(2) इमा रुद्राय .... अस्मिन्ननातुरम् ॥

(3) त्वेषं वयं रुद्रं .... वृणीमहे ॥

5. सन्धिं कुरुत ।

(1) रुद्रः + चिकेतति (2) श्रियम् + अधि (3) त्व + इषम् (4) नमः + कुर्मः (6) युक्तः + असि (5) अन्न + आदिकम् (7) तत् + श्याम (8) हविः + यच्छामः (9) वरणीय + ओषधिम् (10) स्तोत्र + उच्चारणेन

6. सन्धिविच्छेदं कुरुत ।

(1) गुणैश्वर्यं (2) सन्तत्यादीनां (3) देवार्चनेन (4) हिरण्यमिव (5) वयमस्या (6) क्षयद्वीराय (7) श्रियमधि (8) मयस्कृधि (9) योश्च (10) चरारिष्ट

7. निम्नलिखितानां शब्दानां पदपरिचयं ददातु ।

(1) नृभ्यः (2) गवे (3) कपर्दिने (4) मतीः (5) प्रणीतिषु (6) अस्माकम् (7) अस्य (8) नमसा (9) पित्रे (10) तोकाय

8. क्रियापदानां परिचयो देयः ।

(1) यच्छेत् (2) भवेत् (3) यच्छ (4) भज (5) प्रभरामहे (6) क्रियते (7) प्राप्नुयाम (8) जुहवाम (9) उच्चारयामः (10) कुरु

छात्रप्रवृत्तिः

मन्त्रगानाभ्यासः कार्यः

विशिष्टज्ञानम्

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।'

16 रुद्राभिषेकीय-ऋग्वेदमन्त्राः - भागः-2

प्रस्तावना

श्रीमल्लिकार्जुननाम द्वादशज्योतिर्लिङ्गेषु द्वितीयं ज्योतिर्लिङ्गं दक्षिणभारते आन्ध्रप्रदेशराज्ये पातालगङ्गा कृष्णानद्याः तीरे पवित्रे दक्षिणकैलासाभिधे श्रीशैले पर्वते वर्तते ।

श्रीशैलश्रृङ्गे विबुधातिसङ्गे
तुलाद्रितुङ्गेऽपि मुदा वसन्तम् ।
तमर्जुनं मल्लिकपूर्वमेकं
नमामि संसारसमुद्रसेतुम् ॥

श्रीशैलस्य दर्शनमात्रेण दुःखानि लयं यान्ति तथा भवसागरात् मुक्तिः प्राप्यते इति निश्चप्रचं सुप्रसिद्धम् । अस्य श्रीमल्लिकार्जुनमन्दिरस्य निर्माणकार्यं नितरां रमणीयमभिभासते । शिवरात्र्युत्सवे अत्र हि नैकैः जनैः महोत्सवः सम्पाद्यते । अस्य मन्दिरस्यान्तिके एव देव्याः एकं मन्दिरं वर्तते तत्र हि देवी पार्वती ''भ्रमराम्बा'' इति अभिधया जनैः समर्च्यते ।

भगवतः मल्लिकार्जुनमहादेवस्य अभिषेकेन मानसिकी शान्तिः एवं निरामयदीर्घायुष्यं प्राप्यते ।

प्रकरणेऽस्मिन् ऋग्वेदीयरुद्राभिषेकमन्त्राणां वर्णनं कृतमस्ति । ऋग्वेदरस्य प्रथममण्डलस्य 16 अध्याये सूक्त 114 इत्यस्य प्रथमपञ्चमन्त्राः एवं मण्डलद्वितीयस्य चतुर्थाध्यायस्य 33 सूक्तस्य दशमन्त्राः उद्धृताः सन्ति । भगवतः शिवस्य गुणानां, चरित्राणां वर्णनमत्र कृतमस्ति ।

मन्त्रः

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥1॥

ऋ.मं. 1. अ. 96. सू. 114. मं-7॥

पदपाठः

मा । नः । महान्तम् । उत । मा । नः । अर्भकम् । मा । नः । उक्षन्तम् । उत । मा । नः । उक्षितम् । मा । नः । वधीः । पितरम् । मा । उत । मातरम् । मा । नः । प्रियाः । तन्वः । रुद्र । रिरिषः ॥

सरलार्थः

हे रुद्र ! अस्माकं परिवारे स्थितानां बालकानां वृद्धिं कुरु । पुत्राणां युवकानां मारणं मा कुरु । अस्माकं शरीरस्य रक्षां कुरु । तापक्लेशपीडादिकं शरीरे मा भवतु ।

मन्त्रः

मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥2॥

ऋ.मं. 1. अ. 16. सू. 144. मं. 8॥

पदपाठः

मा । नः । तोके । तनये । मा । नः । आयौ । मा । नः । गोषु । मा । नः। अश्वेषु । रिरिषः।
वीरान् । मा । नः । रुद्र । भामितः । वधीः । हविष्मन्तः । सदम् । इत् । त्वा । हवामहे ।

सरलार्थः

हे इन्द्र ! अस्माकं पुत्राणां भृत्यानां गवाम् अश्वादिपशूनाम् मारणं न कुरु । त्वम् अस्माकं वीराणामुपरि क्रोधं मा कुरु । वीराणां नाशमपि मा कुरु । अस्माभिः सदैव तुभ्यं हविर्दीयते, तव आह्वानं च क्रियते ।

मन्त्रः

उप ते स्तोमान्पशुपाइवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥3॥

ऋ. मं. 1. अ. 16. सू. 144. मं.-9 ॥

पदपाठः

उप । ते । स्तोमान् । पशुपाःऽईव । आ । अकरम् । रास्व । पितः । मरुताम् । सुम्नम् । अस्मे । इति ॥ भद्रा । हि । ते । सुऽमतिः । मृळयत्ऽतमा । अथ । वयम् । अवः । इत् । ते । वृणीमहे ॥

सरलार्थः

हे मरुद्गणनां पितः ! रुद्र ! ये पशुपालकाः सन्ति । ते स्व-स्वामिनं प्रति पशूनाम् उपायनं यच्छन्ति । तथैव अस्माभिः भवतां कृते स्तोत्रम् उपायनरूपेण दीयते । त्वम् अस्मभ्यं सुखं प्रयच्छ । तव वृद्धिः कल्याणकर्त्री अस्ति । अस्माभिः तव समक्षं रक्षायाः याचना क्रियते ।

मन्त्रः

आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥ 4॥

ऋ. मं. 1 अ. 16. सू. 114 मं. 10॥

पदपाठः

आरे । ते । गोऽघ्नम् । उत । पुरुषऽघ्नम् । क्षयत्ऽवीर । सुम्नम् । अस्मे इति । ते । अस्तु । मृळ । च । नः । अधि । च । ब्रूहि । देव । अध । च । नः । शर्म । यच्छ । द्विऽबर्हाः ॥

सरलार्थः

हे वीराणां स्वामिन् ! रुद्र ! तव अस्त्रं पशुमानवादीनां मारकं दूरे गच्छतु । अस्माकमुपरि तव कृपा भवेत् । त्वम् अस्माकमुपरि दयां कुरु । अस्माकं पक्षे स्थित्वा त्वम् आश्रय-प्रदानं कुरु ।

मन्त्रः

अवोचाम नमो अस्मा अवस्यवः श्रृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥5॥

ऋ. मं. 1 अ. 16. सू. 114. मं. 11॥

पदपाठः

अवोचाम । नमः । अस्मै । अवस्यवः । श्रृणोतु । नः । हवम् । रुद्रः । मरुत्वान् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥

सरलार्थः

रक्षाकरणार्थम् अस्माभिः सर्वदा यद् उच्चारितं रुद्राय, तादृशं वचनम् अस्माभिः सदा उच्चार्यते । ते रुद्राः मरुद्गणसहिताः अस्माकम् आह्वानं श्रृण्वन्तु । मित्रावरुणादिति-समुद्रपृथिव्याकाशादयः अस्माकं प्रार्थनाम् अनुमोदितां कुर्वन्तु ।

मन्त्रः

आतेपितर्मरुतां सुम्नमेतुमानः सूर्यस्यसंदृशोयुयोथाः ।
अभिनो वीरो अर्वतिक्षमेतप्रजायेमहिरुद्रप्रजाभिः ॥6॥

ऋ. मं. 2. अ. 4. सू. 33 मं. 1॥

पदपाठः

आ । ते । पितः । मरुताम् । सुम्नम् । एतु । मा । नः । सूर्यस्य । सम्ऽदृशः । युयोथाः । अभि । नः । वीरः । अर्वति । क्षमेत । प्र । जायेमहि । रुद्र । प्रऽजाभिः ॥

सरलार्थः

हे मरुद्गणानां जनक ! रुद्र ! भवतः सुखप्रदानं वयं प्राप्तुं प्रभूयास्म । वयं सूर्यदर्शनेन वञ्चिताः कदापि न भवेम । अस्माकं वीरपुत्राः सदा शत्रूणामुपरि विजयप्राप्तिं कुर्वन्तु । वयम् अनेकपुत्रपौत्रादियुक्ताः भवेम ।

त्वादत्तेभीरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिः ।

व्यस्मद्द्वेषोवितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः ॥ 7 ॥

ऋ. मं. 2. अ. 8 सू. 33. मं. 2 ॥

पदपाठः

त्वाऽदत्तेभिः । रुद्र । शमऽतमेभिः । शतम् । हिमाः । अशीय । भेषजेभिः । वि । अस्मत् । द्वेषः । विऽतरम् । वि । अंहः । वि । अमीवाः । चातयस्व । विषूचीः ॥

सरलार्थः

हे रुद्र ! भवता प्रदत्ता या औषधिः सा अत्यन्तं सुखकारिणी वर्तते । तस्याः सेवनेन वयं शतवर्षं पूर्णायुषः भविष्यामः । त्वमस्माकं शत्रूणां पापानां शरीरे व्याप्तनां समस्तरोगाणां नाशं कुरु ।

मन्त्रः

श्रेष्ठोजातस्यरुद्रश्रियासितवस्तमस्तवसांवज्रबाहो ।

पर्षिणः पारमंहसः स्वस्तिविश्वाअभीतीरपसोयुयोधि ॥ 8 ॥

ऋ. मं. 2. अ. 8 सू. 33. मं. 3 ॥

पदपाठः

श्रेष्ठः । जातस्य । रुद्र । श्रिया । असि । तवःऽतमः । तवसाम् । वज्रबाहो इति वज्रऽबाहो । पर्षि । नः । पारम् । अंहसः । स्वस्ति । विश्वाः । अभिऽईतीः । रपसः युयोधि ॥

सरलार्थः

हे रुद्र ! त्वम् ऐश्वर्यशालिषु श्रेष्ठः असि । तव भुजा यां व्रज्रम् अस्ति । त्वमत्यन्तं वृद्धिप्राप्तं कुरु । पापात् अस्मान् पारं कुरु । पापात् त्वं सदा अस्मान् दूरम् अपसारय ।

मन्त्रः

मात्वारुद्रचुक्रुधामानमोभिर्मादुष्टुतीवृषभमासहूती ।

उन्नो वीरां अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां श्रृणोमि ॥ 9 ॥

ऋ.. मं. 2. अ. 8. सू. 33. मं. 8 ॥

पदपाठः

मा । त्वा । रुद्र । चुक्रुधाम । नमःऽभिः । मा । दुः । स्तुती । वृषभ । मा । सऽहूती । उत् । नः । वीरान् । अर्पय । भेषजेभिः । भिषक्ऽतमम् । त्वा । भिषजाम् । श्रृणोमि ॥

सरलार्थः

त्वमभीष्टस्य वर्षां करोषि । वयं नियमविरुद्धं नमस्कारं भ्रमयुक्तां स्तुतिं न कुर्यान । तव शांतस्वरूपस्य ध्यानस्वरूपस्य आवाहनं कृत्वा त्वां कुपितं वयं न कुर्याम । त्वं श्रेष्ठः भिषक् असि । औषध्या अस्माकं पुत्रं बलवन्तं त्वं कुरु ।

मन्त्रः

हवीमभिर्हवते यो हविर्भिरव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ॥ 10 ॥

ऋ. मं. 2. अ. 8. सू. 33. मं. पू ॥

पदपाठः

हवीमऽभिः । हवते । यः । हविःऽभिः । अव । स्तोमेभिः । रुद्रम् । दिषीय । ऋदूदरः । सुऽहवः । मा । नः । अस्यै । बभ्रुः । सुऽशिप्रः । रीरधत् । मनायै ॥

सरलार्थः

अहं हविर्युक्ता आहवानेन निमन्त्रितरुद्रस्य स्तुत्या क्रोधनिवारणं करिष्यामि । कोमलोदरयुक्तः पीतवर्णः सुन्दरनासिकायुक्तः शोभायमानः रुद्रः अस्माकं हिंसां न करोतु ।

मन्त्रः

उन्मा ममन्द वृषभो मरुत्वान् त्वक्षीयसा वयसा नाधमानम् ।
घृणीवच्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥ 11 ॥

ऋ. मं. 2. अ. 8. सू. 33. मं. 6 ॥

पदपाठः

उत् । मा । ममन्द । वृषभः । मरुत्वान् । त्वक्षीयसा । वयसा । नाधमानम् । घृणिऽइव । छायाम् । अरपाः । अशीय । आ । विवासेयम् । रुद्रस्य । सुम्नम् ॥

सरलार्थः

मरुददेवानां जनकः रुद्रः अभीष्टवर्षां करोति । उत्तमान्नदानप्राप्त्यर्थं तस्य प्रार्थनाम् अहं करोमि । तथैव अहमपि पापरहितो भूत्वा रुद्रेण प्रदत्तं सुखग्रहणं करोमि । अहं रुद्रं सेवयामि ।

मन्त्रः

क्वा१स्यते रुद्रमृलयाकुर्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्या भी नु मा वृषभ चक्षमीथाः ॥ 12 ॥

ऋ. मं. 2. अ. 8. सू. 33. मं. 7 ॥

पदपाठः

क्व । स्यः । ते । रुद्र । मुळयाकुः । हस्तः । यः । अस्ति । भेषजः । जलाषः । अपऽभर्ता । रपसः । दैव्यस्य । अभि । नु । मा । वृषभ । चक्षमीथाः ।

सरलार्थः

हे रुद्र ! तव सुखदानकर्ता बाहुः कुत्र वर्तते ? त्वं स्व-हस्ताभ्याम् औषधिदानं कृत्वा सर्वेभ्यः सुखं प्रयच्छ । त्वम् अभीष्टवर्षणे सर्मर्थोऽसि । मम पापस्य नाशं कृत्वा क्षमादानं प्रयच्छ ।

मन्त्रः

प्रबभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम ॥ 13 ॥

ऋ. मं. 2. अ. 8. सू. 33. मं. 8 ॥

पदपाठः

प्र । बभ्रवे । वृषभाय । श्वितीचे । महः । महीम् । सुऽस्तुतिम् । ईरयामि । नमस्य । कल्मलीकिनम् । नमःऽभिः । गृणीमसि । त्वेषम् रुद्रस्य । नाम ॥

सरलार्थः

अभीष्टवर्षाकरणे दक्षं, पीतवर्णयुक्तं, श्वेतप्रतिभायुक्तं रुद्रं प्रति वयं महत्त्वपूर्णां स्तुतिं कथयामः । हे स्तोतः ! तेजस्विरुद्रं नमस्कुरु पूजां कुरु । वयं रुद्रस्य स्तुतिं गुणगानं च कुर्मः ।

मन्त्रः

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरे र्न वा उ योषद् रुद्रादसुर्यम् ॥94॥

ऋ. मं. 2. अ. 4. सू. 33. मं. 9॥

पदपाठः

स्थिरेभिः । अङ्गैः । पुरुऽरूपः । उग्रः । बभ्रुः । शुक्रेभिः । पिपिशे । हिरण्यैः ॥ ईशानात् । अस्य । भुवनस्य । भूरेः । न । वै । ॐ इति । योषत् । रुद्रात् । असुर्यम् ।

सरलार्थः

बहुरूपयुक्तः दृढशरीरयुक्तः विकरालः पीतवर्णायुक्तः रुद्रः उज्ज्वलतेजसा प्रकाशितोऽस्ति । सः समस्तभुवनस्य स्वामी समस्तप्राणिनां भरणपोषणकर्तास्ति । सः नित्यबलयुक्तः अस्ति ।

मन्त्रः

अर्हन् बिभर्षि सायकानि ध्न्वार्हन्निष्कं यजतं विश्व रूपम् ।
अर्हन्निदं जयसे । विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति ॥15॥

ऋ. मं. 2. अ. 4. सू. 33. मं. 10॥

पदपाठः

अर्हन् । बिभर्षि । सायकानि । धन्व । अर्हन् । निष्कम् । यजतम् । विश्वऽरूपम् । अर्हन् इदम्। दयसे । विश्वम् । अभ्वम् । न । वै । ओजीयः । रुद्र । त्वत् । अस्ति ॥

सरलार्थः

हे धनुर्धारिन् पूजनीय रुद्र ! त्वम् अनेकरूप धर्तासि । त्वं पूज्यनिष्कधर्तासि । त्वं सदा अर्चनीयः असि । समस्तसंसारे व्याप्तः त्वं भक्तानां रक्षां करोषि । भवादृशः नान्यः कोऽपि अस्ति ।

शब्दार्थाः

महान्तम् – वृद्धम् **अर्भकं** – बालकं **अश्वेषु** – हयेषु **गोषु** – धेनुषु **तनये** – पुत्रे **आयौ** – आयुष्ये **वीरान्** – वीरपुरुषान् **स्तोमान्** – स्तोप्तान् **भद्रा** – कल्याणी **सुमतिः** – सुबुद्धिः वृणीमहे – वाञ्छामः गोघ्नं – गोहन्तारम् पुरुषघ्नं – पुरुषवधकर्त्तारम् **नः** – अस्माकम् **शर्म** – सुखं **क्षयद्वीर** – वीरनाशः **अव** – रक्षां कुरु **मित्रावरुणौ** – तन्नामकौ देवौ **सिन्धुः** – समुद्रः **पृथिवी** – भूमिः **द्यौः** – आकाशः **सूर्यस्य** – सवितुः **संदृशो** – समानौ **वीरः** – वीरपुत्रः **प्रजाभिः** – संततिभिः **दत्तेभिः** – प्रदत्ताभिः **भेषजेभिः** – औषधिभिः **व्यमीवाः** – शत्रवः **आतयस्वा** – व्याप्ताः **श्रेष्ठः** – उत्तमः

वज्रबाहो – वज्रहस्ता **स्वस्ति** – कल्याणम् **अर्पय** – प्रयच्छ **हविर्भि:** – आहुतिभि: **ऋदूदर:** – कोमलेदर: **छायाम्** – आतपरहित्ताम् **भेषज:** – वैद्य: **अपभर्ता** – अभीष्टदाता **सुष्टुतिम्** – संस्तुतिम् **नमोभि:** – प्रणामै: **हिरण्यै:** – सुवर्णे: **स्थिरेभिसायकानि** – धनूंषि **निष्कं** – आभूषणविशेषम् **विश्वरूपम्** – व्याप्तं **ओजीय:** – बलवन्त:

स्वाध्याय:

1. निम्नाङ्किकतानां प्रश्नानां योग्य-विकल्पं चित्वा उत्तरं लिखन्तु ।

(1) मरुदगणानां जनक: क: अस्ति ?

(क) वरुण: (ख) रुद्र: (ग) सूर्य: (घ) अग्नि:

(2) शत्रूणाम् उपरि विजयं के प्राप्नुवन्ति ?

(क) शान्तपुत्रा: (ख) स्थिरपुत्रा: (ग) वीरपुत्रा: (घ) धीरपुत्रा:

(3) पुरुद्रेण प्रदत्ता औषधी कीदृशी वर्तते ?

(क) सुखकारिणी (ख) कष्टदायिका (ग) भोगदायिका (घ) पुत्रदायिका

(4) मा नो वधी: .... मोत मातरं मान: प्रियास्तन्वो रुद्ररीरिष: ।

(क) देवम् (ख) मनुष्यम् (ग) असुरम् (घ) पितरम्

(5) कस्य दर्शनेन दु:खानि लयं यान्ति ?

(क) श्रीशैलस्य (ख) गणेशस्य (ग) वायो: (घ) ब्रह्मण:

(6) सुष्टुति: शब्दस्य क: अर्थ: ?

(क) संपुष्टि: (ख) संस्तुति: (ग) संवृद्धि: (घ) संस्थिति:

(7) ‘भ्रमराम्बा’ इति नाम्ना कस्या: पूजनं भवति ?

(क) पार्वत्या: (ख) सीताया: (ग) लक्ष्म्या: (घ) सरस्वत्या:

(8) प्रबभ्रवे .... श्वितीचे महो महीं सुष्टुतिर्माश्यामि ।

(क) गजाय (ख) शुकाय (ग) वृषभाय (घ) मयूराय

(9) कीदृश: रुद्र: अस्माकं हिसां न करोति ?

(क) श्वेतवर्ण: (ख) पीतवर्ण: (ग) कृष्णवर्ण: (घ) रक्तवर्ण:

(10) मल्लिकार्जुनज्योतिलिङ्गं कस्या: नद्या: तीरे विराजते ?

(क) गङ्गा (ख) नर्मदा (ग) कृष्णा (घ) कावेरी

2. निम्नलिखित प्रश्नानाम् एकवाक्येन उत्तराणि ददत ।

(1) अस्माभि: रुद्राय किं दीयते ? किं च क्रियते ?

(2) वृद्धानां बालकानां रुद्र: किं करोतु ?

(3) ‘दक्षिणकैलाश:’ इतिनाम्ना क: पर्वत: विराजते ?

(4) रुद्रभुजायां किं वसति ?

(5) समस्तसंसारे व्याप्त: रुद्र: किं करोति ?

(6) पाठोऽयम् ऋग्वेदस्य कयो: मण्डलयो: भागरूप: वर्तते ?

(7) रुद्राय किम् उपायनं दीयते ?

(8) रुद्रस्य अस्त्रं कुत्र गच्छति ?

(9) रुद्रस्य आश्रयग्रहणं कथं करणीयम् ?

(10) रुद्रस्य स्वरूपं कीदृशमस्ति ?

3. मन्त्राणां भावार्थं लिखन्तु ।

(1) मानस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्वा हवामहे ।

(2) मात्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीरां अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां श्रुणोमि ॥

(3) स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरे र्न वा 3 योषद् रुद्राद सूर्यम् ॥

4. निम्नलिखितमन्त्राणां पूर्तिः विधेया ।

(1) मा नो महान्त .... रीरिषः ।

(2) आते पितर्मरुतां .... प्रजाभिः ।

(3) उन्मा ममन्द .... सुम्नम् ।

5. सन्धिं कुरुत ।

(1) उक्षन्तम् + उत (2) पितः + मरुतां (3) महन्ताम् + अदितिः (4) ईशानात् + अस्य (5) कोमल + उदरयुक्तः (6) प्राप्ति + अर्थं (7) वर्षा + अकरणे (8) नमोभिः + मा (9) अहम् + अपि (10) धर्ता + असि

6. सन्धिविच्छेदं कुरुत ।

(1) अर्चनीयोऽसि (2) उत्तमान्नदान (3) अस्य माकमुपरि (4) पृथिव्याकाशादयः (5) वरुणादिति (6) नाशमपि (7) शत्रूणामुपरि (8) नान्यः (9) कोऽपि (10) कर्तास्ति

7. निम्नलिखितानां शब्दानां पदपरिचयं ददातु ।

(1) पुत्राणां (2) अस्माभिः (3) कल्याणकर्त्री (4) भूजायाम् (5) छायायाः (6) पापस्य (7) रुद्रेण (8) औषध्या (9) तेजसा (10) हस्ताभ्याम्

8. क्रियापदानां परिचयो देयः ।

(1) दीयते (2) कुर्वन्तु (3) करिष्यामि (4) वृणीमहे (5) अस्तु (6) भूयास्म (7) अपसारय (8) श्रृणोतु (9) पुपोथाः (10) चक्षमीथाः

छात्रप्रवृत्तिः

विविधवेदशाखानां रुद्राभिषेकमन्त्राः कण्ठस्थाः करणीयाः

विशिष्यज्ञानम्

वेदशास्त्रार्थतत्त्वज्ञो यत्रकुत्रश्रमेवसेत् ।
इहैवलोके तिष्ठन् स ब्रह्मभूयायकल्पते ॥

17 रुद्राभिषेकीय-सामवेदमन्त्राः - भागः-1

प्रस्तावनाः

पाठेऽस्मिन् सामवेदस्थाः रुद्राभिषेकीयमंत्राः प्रदत्ताः सन्ति । येन छात्राः साममंत्राणां प्रयोगेन भगवतः साम्बसदाशिवस्य अभिषेकं कृत्वा मनोकामनापूर्तिं कुर्युः । द्रव्यभिन्नत्वे सति फलभेदोऽपि भिन्नो जायते । यस्य अंशविशेषाः निम्नलिखिताः सन्ति ।

द्रव्यनाम		फलप्राप्तिः
जलम्	→	वृष्टिः, प्राप्तिः, ज्वरप्रकोपशान्तिः, पुत्रप्राप्तिः
कुशोदकम्	→	व्याधिशान्तिः
दधि	→	पशुकामनासिद्धिः
इक्षुरसः	→	लक्ष्मी प्राप्तिः
मधु + आज्यम्	→	लक्ष्मी प्राप्तिः
घृतम्	→	वंशविस्तारः, व्याधिविनाशः
दुग्धम्	→	प्रमेहरोगशान्तिः, जीवनप्राप्तिः
शर्करा + दुग्धम्	→	श्रेष्ठा बुद्धिः लभ्यते, पुत्रप्राप्तिः
सर्षपतैलम्	→	शत्रुनाशः
मधु	→	यक्षराजपदप्राप्तिः
तीर्थजलम्	→	मोक्षप्राप्तिः

साममन्त्रः

2 3 22 2 2 3 2 2 3 2 2
ॐ यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।

3 22 3 2
देवावीरघश- सहा ॥

(सामवेद - पावमान काण्डम् - अध्याय-5, खण्ड-2, ऋचा-4)

सामगानम्

4 5 2 32 2 2 2 2 2 2
ॐ यस्तेमदाः । वराइणियाः । ताइनापावा 3 स्वा 3 । अन्धसा । दाइवाइरा 34 । हाउ । घशा 5 ९ सहा ।
4 2 2 4 2 2 2 2 2 2 2 2 2
हो 5 इ । उ । ॥ 2 ॥ यस्ताइमा 2 3 दोवरेणियाः । ताइनापव । स्वआन्धा 2 सा 2 । दाइवा 2 वाइरा 2 3 ।
22 4 5 5 2 22 5 2र र र2र 2
घशो 2 3 4 वा । सा 5 हो 6 हाइ ॥ 2 ॥ यस्तेमदोवरेणिया 6 ए। तेनापवस्वान्धसा । देवावीरा 2 3 । हाइ ।
2 2 2 2
घासाउवा । साहाउवा 3 । ऊ ^ 3 2 3 4 पा ॥ 3 ॥

सरलार्थः

अयं मन्त्रः पावमानपर्वणः उद्धृतः वर्तते । अस्य मन्त्रस्य दृष्टा ऋषिः अभहीयुः अस्ति । मन्त्रेऽस्मिन् सोमदेवम् उदिश्य प्रार्थना कृताऽस्ति यत् -

हे सोम ! देवतानां कामनापूरकः, राक्षसानां दुर्जनानां च नाशकः, परमश्रेष्ठरुपः एवं हर्ष तथा आनन्दवर्धकः यः रसः विद्यते तेन परमसम्माननीयरसेन सह त्वं कलशे क्षरितो भव इति ।

अर्थात् सोमलतां चूर्णयित्वा तस्मात् रसनिष्कासनस्य प्रक्रिया भवति । तस्मिन् सोमरसे गोदुग्धेन सह मधुनः मिश्रणं कृत्वा उचितसमयोपरि देवनिमित्ताय अग्नौ उत्सर्गः भवति । यज्ञेन राक्षसाः पराजिताः भवन्ति । अतः सोमरसः देवकामनापूरकः, राक्षसविनाशकः, हर्षदायकश्च विद्यते ।

साममन्त्रः

ॐ अग्न आयु ँ्षि पवस आसुवोर्जभिषञ्चनः ।
आरे बाधस्व दुच्छुनाम् ॥ (सा. वे. - आ. का. - अ-6, खंड-5, ऋ.-2)

सामगानम्

ॐ भ्राजा । 2 । भ्राजा 3 2 उ । वा 2 । अग्नआयू ँ पिववसे । आसूवोर्जमिषञ्चनः । आरेबाधस्वदुच्छुनाम् । भ्राजा । 2 । भ्राजा 3 2 3 । वा 2 । ए । भ्राज । 3 ॥

सरलार्थः

आरण्यक् पर्वणः मंत्रोऽयं विद्यते । मन्त्रोऽस्मिन् अग्नेः स्तुतिः कृता वर्तते यत् -

हे पवमानरूप अग्ने ! त्वम् अस्माकम् अन्नम् आयुष्यं च बर्द्धय । अस्माकं कृते ऊर्जं नाम अन्नम् उत्पन्नं बलं तथा अन्नं च सुखपूर्वकं प्रेरय । ये राक्षसाः एवं दुष्टजनाः सन्ति तेषां कृते उत्पीडकः भूत्वा तान् दुष्टान् अस्मान् दूरी कुरु । अस्माकं कृते जीवनरक्षको भव इति ।

अत्र ''पवमानरूपः अग्निः'' इति कथनस्य अयम् एव आशयः यत् - अग्नेः सत्ता पवमानेषु अपि विद्यते ।

''अग्निरेव सर्वाः देवताः'' इति यास्कस्य वचनानुसारम् अत्र अग्निदेवस्य पवमानरूपत्वं सिद्धयति ।

साममन्त्रः

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अवा ँ रेता ँ सि जिन्वति ॥ (सा. वे., आग्जेय पर्व, अ.-2, खं.-3, ऋ.-7)

आ । भ्राज । 3 । अग्निर्मूर्धादी 3 वाः का 2 कू 2 त् । पतिः पृथिवी 3 या आ 2 या 2 म् । अपा-रेना-सी3जाइन्वा 2 ती 2 । आ । भ्राज । 2 । आ । भ्राजा 3 उ वा । ए । आ भ्राज ॥ 3 ॥

सरलार्थः

अयं मन्त्रः आग्नेय पर्वणः विद्यते । अस्य मन्त्रस्य दृष्टा विरूपऋषिः वर्तते । मन्त्रेऽस्मिन् अग्नेः महत्त्वं मूर्धन्यत्वञ्च प्रतिपादितम् अस्ति । यत् -

सर्वेषां देवानां श्रेष्ठः द्युलोकस्य उच्छ्रितः तथा च पृथिव्याः पालकः अयम् अग्निः जलस्य वीर्यरूपो भूत्वा स्थावरजङ्गमात्मकानि भूतानि वर्द्धयति अर्थात् द्युलोकस्य मूर्धिभूनः अयम् अग्निः वर्तते । यथा शरीरस्योपरि शिरः वर्तते तथैव अयम् अग्निः स्वतेजसा आदित्ये प्रविष्टत्वात् आदित्यरुपेण द्युलोकस्य उपरि वर्तते ।

यथा 'आदित्य वैश्वानरः'
इति निरुक्तोक्तिः ।

पुनश्च अयमग्निः पृथिव्याः पालकः । यतो हि द्युलोकात् वृष्टिरूपेण पतति आपः अनरूपेण परिणयति इति ।

साममन्त्रः

ॐ नियुत्वान् वायवागह्यय - शुक्रो अयामिते ।
गन्तासि सुन्वतो गृहम् ॥ (सा. वे., आरण्यक पर्व, अ.-6, खं.-2, ऋ.-6)

सामगानम्

ॐ हाउ । 3 । शुक्रम् । 3 । शुक्र-शुक्रम् । 3 । शुक्र-शुक्रम् । 3 । नियुत्वान्वाया 3 वागा 2 ही 2 । अय - शुक्रोआ 3 यामा 2 इता 2 3 । गन्तासिसुन्वा 3 तोगृ 2 हा 2 3 म् । हाउ । 3 । शुक्रम् । 3 । शुक्र - शुक्रम् । 3 । शुक्र - शुक्रम् । 2 । शुक्रम् । शु 2 । क्रा 2 3 4 । औहोवा । ए । शुक्रम् । 3 ॥

सरलार्थः

मन्त्रोऽयम् आरण्यकपर्वणः वर्तते । अस्मिन् वायुदेवतायाः प्रार्थना एवञ्च आवाहनं कृतम् अस्ति ।

हे वीर्यगतियुक्त वायो ! त्वं वाहनयुक्तो भूत्वा आगच्छ । अथ दीप्यमानः सोमरसः भवतां कृते नियमपूर्वकं गृहीतः असि । यतः भवान् सोमरसस्य निर्माणकर्ता यजमानस्य गृहं प्रति गच्छन् असि इति ।

साममन्त्रः

ॐ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥

(सा.वे., पूर्वार्चिक, ऐन्द्र पर्व, अ.-2, खं.-4, ऋ.-3)

सामगानम्

ॐ हाउ । 3 । चन्द्रम् । 3 । चन्द्रश्चन्द्रम् । 3 । चन्द्रश्चान्द्रम् । 3 । अत्राहगोरा 3 मान्वा 2 ता 2 । नामत्वष्टुरा 3 पाइचा 2 या 2 म् । इत्थाचन्द्रमा 3सोगृ 2 हा 2 3 3 । हाउ । 3 । चन्द्रम् । 3 । चन्द्रश्चन्द्रम् । 3 । चन्द्रश्चान्द्रम् । 2 । चन्द्रम् । चा 2 । द्रा 2 3 4 । औहोवा । ए । चन्द्रम् । 3 ॥

सरलार्थः

मन्त्रोऽयम् ऐन्द्रपर्वणः उद्धृतः अस्ति । अस्य मन्त्रस्य दृष्टा गौतमऋषिः वर्तते । मंत्रेऽस्मिन् द्वादशादित्यमण्डले स्थितस्य इन्द्रस्य महत्त्वं प्रार्थनाश्च विद्यते ।

अस्मिन्नेव गन्तुः चन्द्रमसः मण्डले दीप्तस्य त्वष्टा नामक आदित्यस्थसंबंधि रात्रौ अन्तर्हितं यत् स्वकीयं तेजः नाम आदित्यस्य रश्मयः । अनेन प्रकारेण अजानन् जलमये स्वच्छे चन्द्रबिम्बे सूर्यकिरणाः प्रतिफलन्ति । अर्थात् तत्र प्रतिफलिताः किरणाः सूर्ये यादृशीं संज्ञां लभन्ते तादृशीं चन्द्रेऽपि वर्तमाना लभन्त इत्याशयः । सूर्यतेजः चन्द्रमण्डलं प्रविश्य अहिनवत् निशायाम् अपि तमसः निवारणं कृत्वा सर्वं प्रकाशयति । इत्थं तेजोयुक्तः सूर्यरूपः इन्द्र एव विद्यते । यतः द्वादशेषु आदित्येषु इन्द्रस्य गणना अपि भवति । अतः अहोरात्रस्य प्रकाशकः इन्द्र एव इत्यर्थः ।

साममन्त्रः

ॐ इन्द्रं नरो नेमधिता हवन्ते यत्पार्या पुनजते धियस्ताः ।
शूरो नृषाता श्रवसश्चकाम आ गौमति व्रजे भजा त्वं नः ॥

(सा.वे., पूर्वार्चिक, ऐन्द्र पर्व, अ.-3, खं.-9, ऋ.-6)

सामगानम्

ॐ हुम् । 3 । हो 3 । हङ् । 3 । ओहा । 3 । औहोइ । 3 । इंद्रन्नरो । ने 3 मधि । नाहवन्ताइ । 3 । वयोबृहत् । 3 । भिभ्राष्ट्येविधर्मगे । 3 । यत्वारियाः । पूनज । ताइधियस्ताः । 3 । सत्यमोजः । 3 । रजः सुवः । 3 । शूरोनृषा । ता 3 श्रव । सश्चकामाइ । 3 । भद्र- सुधा । 2 । भद्र - सुधे । षमूर्जम् । इषमूर्जम् । 2 । आगोमताइ । व्रजेभ । जातुवन्नाः । 3 । बृहद्यशः । 3 । दिविद्धे 3 हस् । 2 । दिविदधे 3 । हा उवा । वागीडासुवोबृहद्धा 2 3 4 5 : ॥ ओम हाउ । 3 । आइही । 3 । आइहीया । 3 । आसाउ । 3 । आयाम् । 3 । नामाः । 3 । किद । 2 । इन्द्रन्नरोनेमधिताहवा 2 न्ताइ । यत्पार्यायुनजतेधिया 2 स्ताः । शूरोनृषाताश्रवसश्चका 2 माइ । आगोमतिव्रजेभजातुवा 2 न्नाः । मना 23 होइ । प्राणा 2 3 होइ । चक्षु 2 3 होइ । श्रोत्रा 2 3 - होइ । घोषा 2 3 होइ । व्रता 2 3 - होइ । भूता 2 3 - होइ । पाना 2 3 - होइ । चिता 2 3 - होइ । धईता 2 3 - होइ । सुवा 2 3 होइ । ज्योता 2 3 इर्हो 2 । वा 2 3 4 । औहोवा । ओम 2 3 4 5 ॥

सरलार्थः

सामवेदस्य ऐन्द्रपर्वणः अयं मन्त्रः विद्यते । वसिष्ठ ऋषिः अस्य मंत्रस्य दृष्टा वर्तते । मन्त्रेऽस्मिन् इन्द्रदेवं प्रति प्रार्थना कृता वर्तते यत् -

यदा संग्रामे रक्षणहेतवे प्रसिद्धाः कर्माणि प्रयुज्यन्ते तदा यज्ञेषु संग्रामेषु च लोकाः इन्द्रदेवम् आह्वयन्ति तथा च प्रार्थनां कुर्वन्ति । हे इन्द्रदेव ! अस्माकं कृते अन्नं, बलं, यशः, कीर्तिः एवं च गवादिपशून् प्रयच्छन्तु वा भागिनः कुरु इति ।

साममन्त्र:

ॐ अग्निर्मूर्धा दिव: क्रकुत्पति: पृथिव्या अयम् । अपा૭रेता૭सि जिन्वति ॥

(सा. वे., आग्नेय पर्व, अ.-2, खं.-3, ऋ.-7)

सामगान:

ॐ होउ । 2 । हाउ । भ्राजाओवा । 3 । अग्निर्मूर्द्धादी 3 वा:का 2 कू 2 त् । पति: पृथिवी 3 याआ 2 या2म् । अवा- रेता सी3 जाइन्वा 2 ती 2 3 । हाउ । 2 । हाउ । भ्राजाओवा । 2 । भ्राजा 3 ओ 5 वा 6 5 6 । ए । विश्वस्यजगतोज्योती 2 3 4 5 : ॥

सरलार्थ:

मन्त्रोऽयम् आग्नेयपर्वण: वर्तते । विरूप ऋषि: अस्य मंत्रस्य दृष्टा वर्तते । अस्मिन् मंत्रे अग्ने: प्रधानरूपत्वं प्रतिपादितम् अस्ति यत् -

सर्वेषां देवानां श्रेष्ठ: द्युलोकस्य उच्छ्रित: तथा च पृथिव्या: पालक: अयम् अग्नि: जलस्य वीर्यरूपो भूत्वा स्थावर-जङ्गमात्मकानि भूतानि वर्द्धयन्ति । अर्थात् द्युलोकस्य मूर्ध्नि स्थित: अयम् अग्नि: वर्तते । यथा शरीरस्योपरि शिर: वर्तते तथैव अयम् अग्नि: स्वतेजसा आदित्ये प्रविष्टत्वात् आदित्यरूपेण द्युलोकस्य उपरि वर्तते ।

पुनश्च पृथिव्या: पालक: अयम् अग्नि: नाम द्युलोकात् वृष्टिरूपेण पतति आप: अन्नरूपेण परिणयति यथा -

''आदित्याद् जायते वृष्टि: वृष्टेरन्नं तत: प्रजा: ॥'' इति मनुस्मृतौ ।

साममन्त्र:

ॐ अया रुचा हरिण्या पुनानो विश्वा द्वेषा૭૭सितरति सयुग्वभि: सूरो न सयुग्वभि: ।
धारा पृष्ठस्यरोचते पुनानो अरुषो हरि: । विश्वा यद्रूपा परियास्पृश्वभि:सप्तास्येभिर्ऋक्वभि: ॥

(सा. वे., ऐन्द्र पर्व, अ.-4, खं.-22, ऋ.-7)

सामगानम्

ॐ भ्राजा । 2 । भ्राजा 3 2 उ । वा 2 । अयारुचाहरिण्यापुनान: । विश्वाद्वेषा-सितरतिसयुग्वभि: । सूरोनस-युग्वभि: । धारापृष्ठस्यरोचते । पुनानोअरुषोहरि: । विश्वायद्रुपापरियास्पृक्वभि: । सप्तास्येभिर्ऋक्वभि: । भ्राजा । 2 । भ्राजा 3 2 उ । वा 2 । ए । विश्वस्मैजगतेज्योति: । ज्यो 2 । ता 2 3 4 औहोवा । इदइडा 2 3 4 5 ॥

सरलार्थ:

ऐन्द्रपर्वण: मंत्रोऽयं विद्यते । मन्त्रेऽस्मिन् सोमरसस्य सामर्थ्यं वर्णितम् अस्ति । अस्य मंत्रस्य ऋषि: अनानत: पारुच्छेपि: वर्तते ।

यथा सूर्यदेव: सहयुक्तै: रश्मिभि: अन्धकारं दूरं करोति, यथापूयमान: सोम: हरितवर्णया अनया रोचमानया धारया सर्वाणि रक्षांसि विनाशयति, अत: अभिषुतस्य सोमस्य धारा: तेजोयुक्ता: भवन्ति । पूयमान: हरितवर्ण: सोम: रुचिकर: भवति । य: सोम: सप्तसंख्यकै: मुख्यै: रसस्य आहरणकर्त्रीभि: ऋक्वभि: स्तुतिमद्भि: तेजोभि: विश्वानि सर्वाणि रूपाणि व्याप्नोति ।

अर्थात् सोम: एव संपूर्णं विश्वम् आवृणोति इत्यर्थ: ।

साममन्त्र:

ॐ ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्द्धयन्नहये हन्तवा ३ ॥

(सा. वे., ऐन्द्र पर्व, अ.-4, खं.-20, ऋ.-3)

सामगानम्:

(1) ओम हाउस्वरता । ब्रह्माणा 2: । इन्द्रम् । आ । महया 2 न्तो 2 3 4 । कै: । अवा 2 र्द्धयान् । अहयेहे । तवा 3 4 5 इ । ओम 6 5 6 । श्लोकयता 2 3 4 5 : ।

(2) ॐ हाउ । अभि । स्वरता । ब्रह्माणआइन्द्र । 2 । महया 2 न्तो 2 3 4 । कैः । अवर्द्धया 2 न् । अहयेहन्तवा 2 3 4 5 ओम 6 5 6 । श्ञ्नो 2 3 4 काः ॥

सरलार्थः

मंत्रोऽयम् हेन्द्रपर्वणात् उद्धृतः वर्तते । अस्य मंत्रस्य दृष्टा त्रसदस्यु ऋषिः अस्ति । मन्त्रेऽस्मिन् देवराजम् इन्द्रं प्रसन्नयितुं प्रार्थना विद्यते यत् -

वृत्रासुरस्य वधनिमित्तम् अर्चनीयैः स्तोत्रैः मन्त्रैः हविर्लक्षणैः अन्नैः वा पूजयन्तः ब्राह्मणाः इन्द्रं वर्धयन्ति इत्यर्थः ।

साममन्त्रः

ॐ अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ।

(सा. वे., ऐन्द्र पर्व, अ.-4, खं.-10, ऋ.-4)

सामगानम्:

ॐ हाउस्वरता । स्वरतस्वरा 2 3 ता । आनवस्तेरथम् । श्वायाता 2 क्षू 2 3 : । हाउस्वरता । स्वरतस्वरा 2 3 ता । त्वष्टावज्रंपुरुहु । ताद्युमान्ता 2 3 4 - । हाउस्वरता । स्वरतस्व । रा 2 । ता 2 3 4 । औहोवा । स्वरा 3 ता 2 3 4 5 ॥

सरलार्थः

मन्त्रोऽयम् ऐन्द्रपर्वणः विद्यते । पूर्व मन्त्रस्य अनुसन्धानात्मको अयं मंत्रः वर्तते यत् -

हे इन्द्र ! ऋभवः त्वत् संबंधिने अश्वाय रथं कृतवन्तः । हे पुरुहूत ! त्वष्टा त्वदीयं वज्रं द्युमन्तम् अकरोत् इत्यर्थः ।

साममन्त्रः

ॐ शं पदं मघ - रचीषिमो न काममब्रतो हिनोति न स्पृशद्रयिम् ॥

(सा. वे., ऐन्द्र पर्व, अ.-4, खं.-20, ऋ.-5)

सामगानम्:

ॐ औहोइ । सम्पदाम् । मघ-रया 3 2 2 3 4 इ । षिणाइ । नकाममव्रतोहिनोतिनस्पृशत् । रयिमो 2 3 4 5 6 । 3 । ॥

सरलार्थः

ऐन्द्रपर्वणः मन्त्रोऽयं विद्यते । मन्त्रोऽस्मिन् यज्ञस्य महत्त्वं फलदायकत्वञ्च प्रतिपादितम् अस्ति यत् -

हविर्लक्षणं प्रेषयन्तो जनाः सुखं स्थानं धनं च प्राप्तुं शक्रनुवन्ति । इन्द्राय यागादिकर्मरहितः पुरुषः सुखादिकं न हिनोति । स्वयमपि अभीष्टं रमणीयं धनं न स्पृशति ।

अर्थात् यागादिकर्मयुक्ताः पुरुषा एव सुखं, धनं, स्थानादिकं च लभन्ते न तु यज्ञकर्मरहिताः जनाः इत्यर्थः ।

शब्दार्थः

ऊर्जम् - अन्नात् उत्पन्नं बलम् **मूर्धा** - देवानां श्रेष्ठः **दिवः** - द्युलोकस्य **वीर्यगतिमान्** - बल एवं वहनयुक्तः **असि** - वर्तते, अस्ति वा **गन्तुः** - गमनयुक्तः, गतिशीलः **अहिनवत्** - दिवसवत् **प्रयुज्यन्ते** - प्रयोगं कुर्वन्ते **पार्प्याः** - युद्धे मरणनिमित्तभूताः **युनजते** - प्रयुज्यन्ते **नृषाता** - नृणाम् **भज** - भागिनः कुरु **ककुत्** - उच्छ्रितः **जिन्वति** - प्रीणयति, जनयति वा **हरिण्या** - हरितवर्णया **तरति** - विनाशयति **ऋक्वभिः** - स्तुतिमद्भिः तेजोभिः वा **अरुषः** - दीव्यमानः **अर्चनीयैः** - प्रशंसनीयैः **वर्द्धयक्ति** - प्रीतं कुर्वन्ति **ऋभवः** - मनुष्याः **पुरुहूत** - बहुभिः आहूतः **द्युमन्तम्** - दीप्तिमन्तम् **हिनोति** - प्राप्नोति **अभीष्टम्** - ईप्सितम्, वाञ्छितम्

स्वाध्यायः

1. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तराणि लिखन्तु ।

(1) मेधाशक्तेः प्राप्त्यर्थं केन द्रव्येण महादेवस्य अभिषेकः क्रियते ?

(अ) मधु (ब) शर्करा (क) शर्करामिश्रित दुग्धम् (ड) दुग्धम्

(2) 'अग्न आयू-षि.....' मन्त्रोऽयं कस्य पर्वणः विद्यते ?

(अ) ऐन्द्र (ब) आरण्यक (क) पावमान (ड) आग्नेय

(3) आदित्यरूपेण द्युलोकस्य उपरि कः स्थितः ?

(अ) अग्निः (ब) वायुः (क) जलम् (ड) पृथ्वी

(4) वायोः सामर्थ्यबोधार्थं का उपमा प्रयुक्ता ?

(अ) निर्बलः (ब) वीर्यगतिमान् (क) स्थिरः (ड) क्रियारहितः

(5) 'अत्राह गोरमन्वत....' अस्य मंत्रस्य दृष्टा ऋषिः कः ?

(अ) वसिष्ठः (ब) विश्वामित्रः (क) गौतमः (ड) अमहीयुः

(6) यज्ञेषु संग्रामेषु च लोकाः कम् आह्वयन्ति ?

(अ) वरुणम् (ब) इन्द्रम् (क) सूर्यम् (ड) सोमम्

(7) 'अग्निर्मूर्द्धादिवः .....' मंत्रेऽस्मिन् कस्य प्रधानरुपत्वम् अस्ति ?

(अ) सूर्यस्य (ब) सौमस्य (क) वरुणस्य (ड) अग्नेः

(8) सोमस्य धाराः कीदृश्यः भवन्ति ?

(अ) तेजोयुक्ताः (ब) तमोयुक्ताः (क) निरर्थकाः (ड) मलिनाः

(9) कस्य वधनिमित्तं ब्राह्मणाः अर्चनीचैः स्तोत्रैः इन्द्रं वर्द्धयन्ति ?

(अ) त्रिपुरासुरस्य (ब) बाणासुरस्य (क) वृत्रासुरस्य (ड) रावणस्य

(10) 'ऋभवः' शब्दस्य कोऽर्थः ?

(अ) मनुष्यः (ब) जन्तवः (क) पक्षिणः (ड) खेचराः

2. अधोलिखितानाम् एकवाक्येन उत्तराणि यच्छत ।

(1) पथाभिषेकेन जनाः किं प्राप्नुवन्ति ?

(2) द्युलोकस्य मूर्ध्निभूतः कः ?

(3) 'यस्ते मदो....' इति मन्त्रस्य कः दृष्टा ?

(4) यज्ञेन के पराजिताः भवन्ति ?

(5) सोमः कति संख्यकैः रसैः विश्वस्मिन् व्याप्नोति ?

(6) 'अनवस्ते रथम्....' मन्त्रोऽयं कस्मिन् पर्वणि आयाति ?

(7) सोमरसः कीदृशः वर्तते ?

(8) कस्य गणना द्वादशादित्येषु भवति ?

(9) सूर्यतेजः निशायां किं करोति ?

(10) 'ब्रह्माण इन्द्रं....' मन्त्रेऽस्मिन् कस्य प्रार्थना कृताऽस्ति ?

3. निम्नाङ्कितानां मंत्राणां भावार्थं लिखन्तु ।

(1) नियुत्वान् वायवा गह्यय - शुक्रो अयमिते ।
गन्तासि सुन्वतो गृहम् ॥

(2) अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥

(3) इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरे नृषाता श्रवसश्च काम आ गोमति व्रजे भजा त्वं नः ॥

4. निम्नाङ्कितानां मंत्राणां पूर्तिः विधेया ।

(1) अचारुचा .... ऋक्वभिः ॥

(2) अग्निर्मूर्द्धादिवः .... जिन्वति ॥

(3) शं पदं .... स्पृशद्रयिम् ॥

5. निम्नलिखितानां शब्दरूपाणां परिचयं यच्छत ।

(1) पयांसि (2) बुद्धेः (3) पर्वणात् (4) राक्षसानाम् (5) अग्नौ (6) रसेन (7) द्युलोकस्य (8) देवतायाः (9) फलिताः (10) तेजसा

6. निम्नलिखितानि धातुरूपाणां परिचयं यच्छन्तु ।

(1) आप्नोति (2) विधन्ते (3) वर्द्धयम् (4) प्रेयताम् (5) सिद्धयसि (6) प्रकाशयाम (7) प्रविशथ (8) आगच्छ (9) आह्वयतः (10) यच्छन्तु

7. सन्धिविच्छेदं कुरुत ।

(1) यद्रूपा (2) अर्कैरवर्द्धयन् (3) काममव्रतः (4) आसुवोर्जमिषम् (5) वरेण्यस्तेना (6) अग्निर्मूर्द्धा (7) गन्तासि (8) अत्राह (9) धियस्ताः (10) रथमश्वाय

8. सन्धिं कुरुत ।

(1) पवस्व + अन्धसा (2) त्वष्टुः + अपीच्यम् (3) सप्त + आस्येभिः (4) परियासि + ऋक्वभिः (5) स्पृशत् + रयिम् (6) तक्षुः + त्वष्टा (7) अवर्द्धयन् + अहये (8) श्रवसः + चकाम (9) गोः + अमन्वत (10) ऊर्जम् + इषम्

छात्र-प्रवृत्तिः

सामवेदस्य स्वरपद्धत्याः ज्ञानं करणीयम् ।

विशिष्टज्ञानम्

पितृदेवमनुष्याणां, वेदचक्षुः सनातनम् ।
अशक्यं चाप्रमेयं च, वेदशास्त्रमिति स्थितिः ॥

सरलार्थः

संसारेऽस्मिन् पितृणां, देवानां तथा च मनुष्याणां कृते वेद एव चक्षुरूपः अस्ति । अर्थात् श्रुतयः एव मार्गदर्शकभूताः वर्तन्ते । कदाचित् कतिपय कर्माणि अशक्यान्यपि चेत्, अप्रमेयमपि चेत् तथाऽपि वेदशास्त्रवचनात् अस्मिन् जगति सर्वं स्थितिं धारयति इत्येव सनातनः धर्मः वर्तते ।

18 रुद्राभिषेकीय-सामवेदमन्त्राः - भागः-2

प्रस्तावना

सामवेदस्य गान-समये सामवेदस्य स्वराणां लयस्य पूर्त्यर्थं ये ''हा उ ऊ'' आदि त्रयोदश-प्रकारकाः शब्दाः गृह्यन्ते ते शब्दाः ''**स्तोभ**'' इति संज्ञया ज्ञायते । ते स्तोभ-संज्ञकानां यथोचित ज्ञानेनैव छात्राः साममन्त्राणां गानं कर्तुं शक्ताः भवन्ति । अतः तेषां सामान्यः परिचयः ग्रहणीयः ।

(1) ''हाउ'' - मनुष्यलोकवाचकः ।
(2) ''हाइ'' - वायुलोकवाचकः ।
(3) ''अथ'' - चन्द्रलोकवाचकः ।
(4) ''इह'' - आत्मावाचकः ।
(5) ''इ'' - अग्निरुपवाचकः ।
(6) ''ऊ'' - सूर्यरुपवाचकः ।
(7) ''ह'' - आाहनबोधकः ।
(8) ''औहोयि'' - विश्वेदेवा इति बोधकः ।
(9) ''हि'' - प्रजापतिबोधकः ।
(10) ''स्वर'' - प्राणरूपबोधकः ।
(11) ''या'' - अन्नरूपबोधकः ।
(12) ''वाक'' - विराटरूपबोधकः ।
(13) ''हुं'' - सर्वव्यापी ब्रह्मवाचकः ।

पाठेऽस्मिन् साममन्त्राणां गानमपि प्रदत्तं वर्तते यस्मिन् उपर्युक्तानां त्रयोदश (13) स्तोभसंज्ञकानां प्रयोगः छात्राणां कृते अवधानभूतः भवति ।

साममन्त्रः

ॐ अहमस्ति प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि ॥

(सा. वे., आरण्यक पर्व, अ.-6, खं.-2, ऋ.-9)

सामगानम्

ॐ हाउ । 3 । सेतू-स्तर । 3 । दुस्त । रान् । 3 । दानेनादानम् । 3 । हाउ । 3 । अहमस्मिप्रथमजाऋता 2 3 स्या 3 4 5 ॥ हाउ । 3 । सेतू-स्तर । 3 । दुस्त । रान् । 3 । अक्रोधेनक्रोध । 2 । अक्रोधेनक्रोधं । हाउ । 3 । पूर्वन्देवेभ्योअमृतस्यना 2 3 मा 3 4 5 ॥ हाउ । 3 । सेतू-स्तर । 3 । दुस्त । रान् । 3 । श्रद्धयाश्रद्धाम् । 3 । हाउ । 3 । योमाददाति सइदेवमा 2 3 वा 3 4 5 त् ॥ हाउ । 3 । सेतू-स्तर । 3 । दुस्त । रात् । 3 । सत्येनानृतम् । 3 । हाउ । 3 । अहमन्नमन्नमदन्तमा 2 3 द्मी 3 4 5 ॥ हाउ 3 वा । एवागतिः । 3 । एतदमृतं । 3 । स्वर्गच्छ । 3 । ज्योतिर्गच्छ । 3 । सेतू-स्तीर्त्वाचतुरा 2 3 4 5 : ॥

सरलार्थः

आरण्यकपर्वणः मन्त्रोऽयं विद्यते । अस्य मन्त्रस्य देवता अन्नदेवता वर्तते । आत्मा एव अस्य मंत्रस्य ऋषिः अस्ति । अस्मिन् मन्त्रे अन्नस्य महत्त्वं वर्णितम् अस्ति यत् -

अग्निवरुणादिदेवेभ्यः पुरा अहम् अन्नं देवता विनाशरहितस्य सत्यस्य प्रथमजा अस्मि । प्रथमत एव उत्पन्ना भवामि । यः पुमान् अन्नरूपां माम् अतिथ्यादिदेवेभ्यो ददाति स एव परिदृश्यमानं सर्वेषां प्राणिनां रक्षां करोति । यस्तु लोभयुक्तः सन् प्राणिभ्यः अन्नम् अदत्त्वा स्वयम् एव भक्षयति तं लोभिनम् अहम् अन्नदेवता भक्षयामि । अर्थात् यः प्राप्तस्य अन्नस्य दानम् अकृत्वा स्वयमेव भक्षणं करोति अन्नदेवता तस्य विनाशं करोति इत्यर्थः ।

अत एव ऋग्वेदेऽपि कथितम् अस्ति यत् - ''**केवलाघो भवति केवलादी ।**''

अर्थात् यः केवलम् आत्मनैव भक्षति देवातिथिमनुष्येभ्यो न ददाति सः केवलम् अघम् एव प्राप्नोति इति ।

साममन्त्रः

ॐ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्त्रते नाकमच्छ ॥

(सा. वे., आग्नेय पर्व, अ.-2, खं.-8, ऋ.-2)

सामगानम्

ॐ अबोधिया । ग्नाइः समिधाजना 2 नाम् । प्रताइधे 3 नूम् । इवायती मुषासम् । यह्वाई 3 वा । प्रवा 2 यामुज्जिहानाः । प्रभाना 2 3 वाः । सस्रतेनाकमच्छ । इडा 2 3 भा 3 4 3 । ओ 2 3 4 5 इ । डा ॥

सरलार्थः

आग्नेयपर्वणः प्रथमाध्यायात् उद्धृतः मन्त्रोऽयम् अस्ति । त्रिष्टुप् छन्दः एवं बुधः तथा गविष्ठिरः द्वौ ऋषी अस्य मन्त्रस्य दृष्टृरूपेण वर्तते । मन्त्रेऽस्मिन् अग्नेः स्वरूपं महत्त्वञ्च प्रतिपादितम् अस्ति यत् –

अयम् अग्निः अध्वर्यादिभिः होत्रादिभिश्च समिद्धिः प्रज्वलितः भवति, प्रातःकालं प्रति धेनुं यथा उत्थापयन्ति । अत्र पूर्णप्रज्वलितस्य अग्नेः महान्तः पक्षिणः प्रसरन्ति । अर्थात् विवाहसंस्कारानन्तरं त्रैवर्णिकानां गार्हस्थानाम् अग्निहोत्रं नित्यकर्म भवति । तत्र सायम् अग्निहोत्रसमयः यदा सूर्यरश्यमयः भूभागं परित्यज्य वृक्षाग्रे एव प्रकाशमाना दृश्यन्ते तदा सायं होमः, प्रातः काले पूर्वस्यां दिशि यदा रश्मयः आविर्भूताः भवन्ति तदा प्रातर्होमः अनुष्ठेयः । तत्र नित्यद्रव्यं पयः, दधि, यवागूश्च भवन्ति । तदर्थं प्रातः काले गोदोहनं कार्यं भवति इति बोध्यम् ।

साममन्त्रः

ओम महित्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः ।
दुराधर्षं वरुणस्य ॥ (सा.वे., आग्नेय पर्व, अ.–2, खं.–8, ऋ.–8)

सामगानम्

(1) ॐ महाइत्रा 2 3 4 इणाम् । अवा 2 रस्तू । द्युक्षंमा 2 3 4 इत्रा । स्या 2 र्यम्णाः । दुराघा 2 3 4 र्षाम् । वरौहो 2 3 4 । वा । णा 5 स्यो 6 हाइ ॥

(2) ॐ महित्रीणामवरस्तू 6 ए । धुक्षंमित्रस्यार्यम्णाः । दुराघा । 2 3 र्षाम् । वरौहो 2 । हुम्मा 2 । ण । स्यो 2 । या 2 3 4 । औहोवा । हा ओवा । ओवा 2 3 4 5 ॥

सरलार्थः

मन्त्रोऽयम् आग्नेयपर्वणः विद्यते । वारुणिः सत्यंधृतिर्ऋषिः अस्य दृष्टा वर्तते ।

मित्र–वरुण–अर्यमा इति त्रयाणां देवानां द्युक्षं यः अन्यैः बाधितुम् अशक्यं महत् अस्माकम् अवः अस्तु इति ।

साममन्त्रः

ओम त्वावतः पुरुवसो वयमिन्द्र प्रणेतः ।
स्मसि स्थातर्हरीणाम् ॥ (सा.वे., आग्नेय पर्व, अ.–2, खं.–8, ऋ.–9)

सामगानम्

ॐ त्वावतो 3 । हौ 3 हो 3 2 इ । पुरुवसो 3 । हौ 3 हो 3 2 इ । वयमिन्द्रा 3 । हौ 3 हो 3 2 इ । प्रणेता 3ः । हौ 3 हो 3 2 इ । स्मसिस्थाता 3ः । हौ 3 हो 3 2 इ । हरीणा 3 म् । हौ 3 हो 3 2 2 3 4 5 इ । डा ॥

सरलार्थः

मन्त्रोऽयम् आग्नेयपर्वणः द्वितीयाध्यायस्य विद्यते अस्य दृष्टा वत्स ऋषिः वर्तते । अस्मिन् देवराजः इन्द्रं प्रति प्रार्थना कृताऽस्ति यत् –

हे पुरुवसो ! त्वं कर्मणां पारं प्रकर्षेणोपेतः त्वावतः त्वत् सदृशस्य इन्द्रसमानस्य अन्यस्य अभावात् इत्यर्थः तव स्वभूताः वयं स्मः । त्वम् एतत् हरीसंज्ञकानाम् अश्वानाम् अधिष्ठाता भव इत्यर्थः ।

साममन्त्रः

ओम इन्द्रं नरो नेमधिता हवन्ते यत्पार्थ्या युनजते धियस्ताः ।
शूरो नृषाता श्रवसश्चकाम आ गोमति व्रजे भजा त्वं नः ॥
(सा. वे., ऐन्द्र पर्व, अ.–3, खं.–9, ऋ.–6)

सामगानम्

ॐ इन्द्रन्ना 2 3 4 रो । नेमाधा 2 3 4 इता । हवन्ता 2 3 इ । यत्पारा 2 3 4 याः । यूनाजा 2 3 4 नाइ । धियास्ता 2 3: । शूरोना 2 3 4 र्षा । ताश्रावा 2 3 4 साः । चकामा 2 3 इ । आगो मा 2 3 4 ती । व्रजाइभा 2 3 4 जा । त्वन्ना 3 उ वा 3 । ए 3 । आयू 2 3 4 5: ॥

सरलार्थः

मंत्रोऽयं सामवेदस्य ऐन्द्र-पर्वणः वर्तते । अस्य दृष्टा ऋषिः वसिष्ठः वर्तते । इन्द्रदेवस्य स्तुतिपरकः अयं मंत्रः वर्तते यत् -

यदा संग्रामे रक्षणहेतवे प्रसिद्धाः कर्माणि प्रयुज्यन्ते । तदा यज्ञेषु संग्रामेषु च लोकाः इन्द्रदेवम् आह्वयन्ति तथा च प्रार्थनां कुर्वन्ति यत् - हे इन्द्रदेव ! अस्माकं कृते अन्नं, बलं, यशः, कीर्तिः एवञ्च गवादिपशून् प्रयच्छन्तु वा भागिनः कुरु इत्यर्थः ।

साममन्त्रः

ओम त्यमूषु वाजिनं देवजूत - सहोवानं तरुतार- रथानाम् ।
अरिष्टनेमिं पृतनाजमाशु - स्वस्तचेताक्ष्र्यमिहाहुवेम ॥

(सा.वे., ऐन्द्र पर्व, अ.-3, खं.-22, ऋ.-2)

सामगानम्

(1) ॐ त्वमूषू । वाजि । ना 2 3 4 5 म् । देवजूता 2 3 4 म् । सहोवानन्ता । रुता 3 । र - रथानाम् । अरिष्टना 2 3 4 इमीम् । पृतना 3 4 3 जमाशुम् । स्वस्त । याइ । ताक्ष्र्यमिहा 3 4 3 । हू 3 वा 5 इमा 6 5 6 ॥

(2) ॐ ईयइया 3 हाइ । त्यमूषुवाजिना 3 न्दे 3 वजूतम् । इ 4 यदूया । हा 2 3 4 इ । सहोवानन्ता । रुता 3 । र-रथानाम् । ईयइया 3 हाइ । अरिष्टा 3 । नाइ । मी 3 म्पृत । नाजमाशूम् । इ 4 यइया । हा 2 3 4 5 इ । स्वस्त । याइ । ताक्ष्र्यमीह । 3 4 3 । हू 3 वा 5 इमा 6 5 6 ॥

सरलार्थः

अयं मन्त्रः ऐन्द्रपर्वणः उद्धृतः अस्ति । अस्यं दृष्टा ऋषिः ताक्ष्र्यपुत्रोऽरिष्टनेमिः वर्तते । मन्त्रेऽस्मिन् तृक्षपुत्र सुपर्णस्य स्तुतिः आवाहनं च कृतं वर्तते ।

तं ताक्ष्यम् अन्नवन्तं बलवन्तं वा देवैः सोमाहरणाय प्रेरितं प्रीयमाणं वा सहस्वन्तम् एवं रथानां संग्रामे तारकम्, अरिष्टनिमिः अहिंसितरथम् अथवा अरिष्टनेमेः मम जनकं प्रीतनाजं, प्रीतनानां शत्रुसेनानां जेतारम्, आशुं जेतारम् इति भावः । ताक्ष्र्यम् अस्मिन् कर्मणि वा स्वस्तये - भद्राय आह्वयामः इति भावः ।

साममन्त्रः

ओम त्रातारमिन्द्रमवितारमिन्द्र हवेहवे सुहव - शूरमिन्द्रम् ।
हुवे नु शक्रं पुरुहूतमिन्द्रमिद-हविर्मघवावेत्विन्द्रः ॥

(सा.वे., ऐन्द्र पर्व, खं.-22, ऋ.-2)

सामगानम्

ॐ त्रातारमिन्द्रमविता । 2 मी 2 3 न्द्राम् । हवेहवेसुहव-शू । रमी 2 3 न्द्राम् । हुवाइनुशक्रंपुरुहू । तमी 2 3 न्द्राम् । इद - स्वस्तिनो मघवा । वा 3 4 3 इ । 2 3 वा 5 इन्द्रा 6 5 6 : ॥

सरलार्थः

मन्त्रोऽयम् ऐन्द्रपर्वणः विद्यते । अस्य मंत्रस्य दृष्टा वसुक्रो-विमदो वा ऋषिः वर्तते । मन्त्रेऽस्मिन् इन्द्रस्य आवाहनं कृतम् अस्ति यत् -

शत्रुभ्यः पालयितारम् इन्द्रम् आह्वयामि । कामैः तर्पयितारम् इन्द्रम् आह्वयामि । सर्वेषु आहवनेषु सुखएन

आह्वयितुं शक्यम् एवं शौर्यवन्तं, सर्वकार्येषु शक्तं, बहुभिः पालनार्थम् आहुतम् इन्द्रम् आह्वयामि । एवम् आहूतः धनवान् इन्द्रः इदं पुरः स्थापितं हविः भक्षयतु । अर्थात् अन्तरीक्षस्थानस्य देवः इन्द्रः सर्वकार्येषु शक्तः । अतः इन्द्रदेवस्य कर्मप्रसङ्गे श्रूयते निरुक्ते यथा –

''अथास्य कर्म रसानुप्रदानं वृत्रवधः । या का च बलकृतिरिन्द्रकर्मैव तत् ॥''

इत्यर्थः ।

साममन्त्रः

ओम सोमः पुनान ऊर्मिणाव्यं वारं वि थावति । अग्रे वाचः पवमानः कनिक्रदत् ॥

(सा.वे., पवमान पर्व, अ-5, खं.-20, ऋ.-7)

सामगानम्

ॐ सोमः पुना । हो । नऊर्मिणा 6 ए । अव्यंवारंविधा 2 वा 3 ती । अग्रे वा 2 3 4 5 । चा 2 3 4 5 : । पवमा 2 3 ना 3: । का 2 ना 2 3 4 औहोवा । क्रददे 2 3 4 5 ॥

सरलार्थः

मन्त्रोऽयं पवमानपर्वणः विद्यते । अस्य मन्त्रस्य दृष्टा अग्निर्ऋषिः वर्तते । मन्त्रेऽस्मिन् सोमरसस्य गतिः वर्णिताऽस्ति यत् –

स्वीयया धारया पूयमानः सोमः अविभवं वारं-वारं विविधप्रकारेण धावति । स च पवमानः सोमः कथं गच्छति इति उच्यते यत् –

''वाचः अग्रे कतिक्रदत् शब्दं कुर्वन् विधावति'' इत्याशयः ।

साममन्त्रः

ओम स सुन्वे यो वसूनां यो रायामानेता च इडानाम् । सोमो यः सुक्षितीनाम् ॥

(सा.वे., पवमान पर्व, अ.-5, खं.-22, ऋ.-5)

सामगानम्

ॐ सासू । न्वेयोवसू 2 3 नाम् । योरा 2 यामा 2 । नेतायइडा 2 3 नाम् । सो 2 3 माः । यःसुक्षिता 2 3 4 इनो 6 हाइ ॥

सरलार्थः

मन्त्रोऽयं पवमानपर्वणः उद्धृतोऽस्ति । मंत्रस्य दृष्टा ऋषिः ऋणवः विद्यते । मन्त्रेऽस्मिन् सोमस्य स्तुतिः वर्तते यत्

यः सोमः ऋत्विग्भिः अभियुतः असि । यः धनानां प्रापयिता, यः गवादिवशूनाङ्कते सन्तोषप्रदः, यः अन्नादि पोषणयुक्तपदार्थानां प्रदाता तथा च यः शोभनमनुष्याणां कृते आनेता विद्यते स सोमः अभिषुतः जातः ।

सोमस्य महत्त्वं वेदेषु बहुभिः वर्णितम् अस्ति यथा –

''सोमेन देवाः जायन्ते, सौत्रामण्यां च मानवाः ।''

इति श्रुतिवचनात् यत्र शुद्धत्वं जायते तत्र देवाः एवं यत्र मलिनत्वं जायते तत्र मानवाः इत्यर्थः ।

साममन्त्रः

ओम विश्वतोदावन् विश्वतो न आ भर यं त्वाशविष्ठमीमहे ॥

(सा.वे., ऐन्द्र पर्व, अ.-4, खं.-20, ऋ.-2)

सामगानः

ॐ हाउ 3 वा । विश्वतोदावन्विश्वतोनआभर । हाउ 3 वा । यन्त्वाशविष्ठमीमहे । हाउ 3 वा । आयुः । हाउ 3 वा । सूवः । हाउ 3 वा । ज्योतिः । हाउ 3 वा 3 । ई 2 3 4 5 ॥

सरलार्थः

मन्त्रोऽयम् ऐन्द्रपर्वणः गृहीतः अस्ति । मन्त्रेऽस्मिन् देवराजम् इन्द्रं प्रति मनोकामनापूर्तेः प्रार्थना कृताऽस्ति यत् –

सर्वप्रकारेण शत्रूणां छेदनकर्ता तथा च भक्तानां कृते दानयुक्तो हे इन्द्र ! त्वम् अस्माकं कृते विश्वस्य अभीष्टपदार्थं प्रयच्छ । पुनश्च त्वम् अतिशयेन बलवन्तं त्वाम् अभीष्टं याचामहे इत्यर्थः ।

साममन्त्रः

ओम उदुत्तमं वरुण पाशमस्मदवाधलं विमध्यम - श्रधाय ।
अथादित्यव्रते वयं तवानागसो अदितये स्याम ॥

(सा.वे., ऐन्द्र पर्व, अ.-6, खं.-1, ऋ.-8)

सामगानम्

ॐ हाउ । 3 । आयुश्चक्षुर्ज्योतिः । औहोवा । ईया । उदुत्तमम्वरुणपाशमा 2 3 स्मात् । अवाधमम्विमध्यम-श्रया 2 3 या । अथादित्यव्रतेवयन्ता 2 3 वा । अनागसोअयितयेसिया 2 3 मा 3 । हाउ । 3 । आयुश्चक्षुर्ज्योतिऔहोवा । इ 2 । या 2 3 4 । औहोवा । ई 2 3 4 5 ॥

सरलार्थः

आरण्यपर्वणः उद्धृतोऽयं मंत्रः विद्यते । मंत्रेऽस्मिन् अदितेः पुत्रं वरुणं प्रति प्रार्थना कृता वर्तते यत् -

हे वरुण ! उत्कृष्टं शिरसि स्थापितं त्वदीयं पाशम् अस्मात् सकाशात् शिथिलं कुरु । अधोभागे अर्थात् पादप्रदेशे स्थापितं पाशं शिथिलं कुरु । मध्यमं पाशं शिथिलं कुरु । अथ पाशत्रयविनाशानन्तरं हे अदितेः पुत्र वरुण ! वयं शुनः शेपाः त्यदीये कर्मणि खण्डनराहित्याय अपराधरहिताः भवेम इत्यार्थः ।

साममन्त्रः

ओम अदर्दरुत्समसृजो वि खानि त्वमर्णवान् बद्धधाना - अरम्णाः ।
महान्तमिन्द्र पर्वतं वि यदः सृजद्धारा अव यद्दानवान् हन् ॥ (सा. वे., ऐन्द्र पर्व, आ.-3, खं.-8, ऋ.-3)

सामगानम्

(1) ॐ अदर्दयूत् । समसृजोविखानि । त्वमर्णा 2 3 4 वान् । बद्धधाना - अराम्णाः । महांता 2 3 4 मी । द्रपर्वतंवियाद्वः । सृजाद्धा 2 3 4 राः । अवयद्दान । वा 2 3 न्हा 3 4 3 न् । ओ 2 3 4 5 इ । डा ॥

(2) ॐ अदर्दरूतसमसृजाः । विखानि । त्वमर्णवान्बद्धधाना- अरा 2 3 म्णाः । महान्तमिन्द्रपर्वतंविया 2 3 द्वाः । सृजाद्धारा 2ः । अवा 2 यद्दान । वा 2 । या 2 3 4 औहोवा । हा 2 3 4 5 न् ॥

सरलार्थः

अयं मन्त्रः ऐन्द्रपर्वणः विद्यते । अस्य मन्त्रस्य दृष्टा ऋषिः गातुः विद्यते । मन्त्रेऽस्मिन् देवराज इन्द्रं प्रति प्रार्थना कृता वर्तते यत् -

हे देवेन्द्र ! त्वम् उत्स्यन्दमानं मेघं विदारितवान् असि । ततः मेघे स्थित उदकनिर्गमनद्धाराणि विशेषेण सृष्टवान् असि । हे देवराज ! यः त्वं महान्तं मेघं विसर्जितवान् । अर्थात् दनो-नामकस्य राक्षसस्य पुत्रान् हतवान् । अतः यास्केन प्रतिपादितं निरुक्ते यत् -

''इन्द्रस्य कर्म रसानुप्रदानं वर्षादिवृत्रवधः नाम मेघवधः ।'' इत्यर्थः ।

शब्दार्थः

सत्यस्य - परब्रह्मणः **अघम्** - पायम् **रश्यमः** - किरणाः **त्रैबर्णिकानाम्** - ब्राह्मणक्षत्रिय वैश्यानाम् **गार्हस्थानाम्** - गृहस्थाश्रमिणाम् **द्युक्षम्** - दीप्तम्, तेजः वा **अवः** - रक्षणम् **पुरूवसो** - बहुधनयुक्तः, इन्द्रः वा **प्रयुज्यन्ते** - प्रयोगं कुर्वन्ते । **प्रयच्छन्तु** - प्रदानं कुरु, ददतु वा **ताक्ष्यं** - पक्षिविशेषं, तृक्षपुत्रं सुपर्णं वा, गरुडम् **सहस्वन्तम्** - बलवन्तम् **अहिंसितरथम्** - अहिंसितम् आयुधम् **आशुं** - शीघ्रम् **पालयितारं** - रक्षितारं **तर्पयितारम्** - मनोकामनापूरकम् **आहवनेषु** - यज्ञेषु **शक्तं** - समर्थम् **पवमानः** - पूतः, पवित्रः वा **वाचः** - स्तोत्रस्य **कनिक्रदत्** - पुनः-पुनः **विधावति** - विविधप्रकारेण गच्छति **अभीष्टम्** - ईप्सितम्, इच्छितम् **याचामहे** - याचनां कुर्महे **उत्कृष्टम्** - उत्तमम् **मध्यमम्** - नाभिप्रदेशान्तर्गतम् **उत्स्यन्दमानम्** - जलभरितम् **महान्तम्** - विशालम्

स्वाध्यायः

1. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तरं लिखन्तु ।

(1) 'अहमस्मि प्रथमजा....' इति मन्त्रस्य देवता कः ?

(अ) वायुः (ब) सूर्यः (क) भूमिः (ड) अन्नः

(2) पूर्णप्रज्वलितस्य अग्नेः रश्मयः कियत् परिमितं प्रसरन्ति ?

(अ) एक योजनं यावत् (ब) अन्तरीक्षं यावत् (क) यज्ञमण्डपं यावत् (ड) यज्ञकुण्डं यावत्

(3) हरीसंज्ञकानाम् अश्वानाम् अधिष्ठाता कः ?

(अ) इन्द्रः (ब) अग्निः (क) वायुः (ड) वरुणः

(4) 'तार्क्ष्यः' शब्दस्य कोऽर्थः ?

(अ) मयूरः (ब) काकः (क) गरुडः (ड) कपोतः

(5) 'पालयितारम्' शब्दस्य कोऽर्थः ?

(अ) रक्षितारम् (ब) ताडयितारम् (क) मोहितारम् (ड) दातारम्

(6) स्वीयया धारया पूयमानः कः ?

(अ) इन्द्रः (ब) सोमः (क) रुद्रः (ड) आदित्यः

(7) 'कनिक्रदत्' इति शब्देन किं ज्ञायते ?

(अ) एकवारम् (ब) नित्यं (क) पुनः-पुनः (ड) कनिष्ठम्

(8) सोमः कैः अभिषुतः अस्ति ?

(अ) यजमानैः (ब) ऋत्विग्भिः (क) आचार्यैः (ड) राक्षसैः

(9) शुनः शेपा: पाशत्रयशिथिलार्थं कं प्रार्थयति ?

(अ) सोमम् (ब) अग्निम् (क) इन्द्रम् (ड) वरुणम्

(10) 'अदर्दरुत्समसृजो....' इति मंत्रस्य दृष्टा ऋषिः कः ?

(अ) गातुः (ब) वसिष्ठः (क) ऋणवः (ड) अग्निः

2. निम्नाङ्कितानाम् एकवाक्येन उत्तराणि ददत ।

(1) इन्द्रेण महान्तं मेघं विसर्जित्वा किं कृतम् ?

(2) 'उदुत्तमं वरुण पाशम् ....' मन्त्रेऽस्मिन् वरुणं प्रति का प्रार्थना कृताऽस्ति ?

(3) भक्तानां कृते इन्द्रः कीदृशः ?

(4) सोमः उपास्येभ्यः किं-किं ददाति ?

(5) यजमानः कीदृशम् इन्द्रम् आह्वायति ?

(6) लोकाः इन्द्रदेवं कस्मिन् कर्मणि आह्वयति ?

(7) सोमस्य गतिः कीदृशी वर्तते ?

(8) कीदृशं तार्क्ष्यम् आह्वयामः ?

(9) 'त्वावतः पुरुवसो...' इति मंत्रः कस्मिन् पर्वणि आयाति ?

(10) अग्निः कैः प्रज्वलितः भवति ?

3. निम्नलिखितानां मन्त्राणां भावार्थं लिखन्तु ।

(1) ॐ महित्त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥

(2) ॐ त्वावतः पुरुवसो वयमिन्द्र प्रणेतः । स्मसि स्थातर्हरीणाम् ॥

(3) ॐ विश्वतोदावन् विश्वतो न आ भर यं त्वा शविष्ठमीमहे ॥

4. निम्नलिखितानां मन्त्राणां पूर्तिः विधेया ।

(1) ॐ उदुत्तमं वरुण .... अदितये स्याम ॥

(2) ॐ स सुन्वे .... सुक्षितीनाम् ॥

(3) ॐ सोमः पुनान .... कनिक्रदत् ॥

5. निम्नाङ्कितानां शब्दरुपाणां परिचयं यच्छत ।

(1) द्वाराणि (2) प्रदेशे (3) कर्तृन् (4) ऋत्विग्भिः (5) वाग्भ्यः (6) आहवनेषु (7) आहरणाय (8) अस्माकम् (9) अश्वानाम् (10) रश्मयः

6. निम्नाङ्कितानि धातु रुपाणां परिचयं यच्छन्तु ।

(1) भूयासुः (2) भक्षयन्तः (3) प्रसरन्थ (4) योजयसि (5) यच्छाव: (6) धावामि (7) अजायन्त (8) याचामहे (9) हन्तारः (10) विद्याताम्

7. सन्धि विच्छेदं कुरुत ।

(1) महान्तमिन्द्र (2) उदुत्तमम् (3) शविष्ठमीमहे (4) ऊर्मिणाव्यम् (5) त्रातारमिन्द्रम् (6) पृतनाजमाशुम् (7) इन्द्रन्नरः (8) स्थातर्हरीणाम् (9) मित्रस्यस्यार्यम्णः (10) अबोध्यग्निः

8. सन्धि योजनं कुरुत ।

(1) उत् + जिहानाः (2) दुः + आधर्षम् (3) धियः + ताः (4) सु + अस्तये (5) ताक्ष्र्यम् + इह (6) हविः + मघवा (7) वेतु + इन्द्रः (8) विश्वतः + दावन् (9) अव + अधमम् (10) यत् + दानवान्

छात्र-प्रवृत्तिः

सामवेदस्य मंत्रगानपद्धत्याः अवधानं करणीयम् ।

विशिष्टज्ञानम्

चतुर्विंशतिधा येन, प्रोक्ता वै सामसंहिताः ।
स्मृतास्ते सामगाः प्राच्याः, कर्ता नाम्नेह सामगाः ॥

सरलार्थः

येन चतुर्विंशतिभिः प्रकारैः सामसंहिताः प्रोक्ता, ते प्राच्याः मंत्रदृष्टारः ऋषयः अस्याः संहितायाः कतृरूपेण ''सामगाः'' इति नाम्ना स्मृताः इत्यर्थः ।

●

19	रुद्राभिषेकीय-अथर्ववेदमन्त्राः - भागः-1

प्रस्तावनाः

अभिचारक्रियायाः प्राधान्येन प्रतिपादकोऽयं वेदः अथर्वनामक ऋषिणा दृष्टत्वात् अथर्ववेद इति उच्यते । अत्र वेदे 20 काण्डानि, 732 सूक्तानि, 5987 मंत्राः विद्यन्ते। एषु मंत्रेषु द्वादशशतमन्त्रा (2200) ऋग्वेदेऽपि दृश्यन्ते । विंशतिकाण्डे 253 सूक्तानि सन्ति, तेषु द्वादशसूक्तानि (12) अतिरिच्य शेषाणि सर्वाणि अपि ऋग्वेदस्य दशममण्डले समुपलभ्यन्ते ।

अथर्ववेदस्य नव शाखा आसन्, परं सम्प्रति शौनकपिलादसमाख्ये द्वे एव शाखे प्राप्येते । प्रचलिता अथर्ववेदसंहिता शौनकशाखान्तर्गता, पैप्पलादशाखा संहिताऽपि अनतिचिरेणैव मुद्रिता ।

पाठेऽस्मिन् छात्राणाम् उपयोगार्थं ज्ञानवर्धनार्थं च शौनकशाखायाः रुद्राभिषेकीयमन्त्राः प्रदत्ताः सन्ति ।

अथर्ववेदीयो रुद्रः

मन्त्रः

ॐ रुद्र जलाषभेषज नीलशिखण्ड कर्मकृत् ।
प्राशं प्रतिप्राशो जह्यरसान् कृण्वोषधे ॥ 2 ॥

(अथर्ववेद, कांड-2, सू.-27, मंत्र-6)

पदपाठः

रुद्र । जलाऽषभेखज । नीलऽशिखण्ड । कर्मऽकृत् । प्राशम् । प्रतिऽप्राशः । जहि । अरसान् । कृणु । ओषधे ॥

सरलार्थः

हे उक्तमहिमोपेत रुद्र ! भवतां स्मरणमात्रेणैव उदकमात्रं भेषजं भवति तादृशः स्वरूपः असि । नीलवर्णकपर्दोपेतः सदैव सक्रियः त्वम् अतिभोजनकर्तारं नासयसि अर्थात् तत् प्रतिकूलः भवसि । हे औषधिरूप रुद्र ! त्वम् इमां पाठाख्याम् ओषधिं प्रतिवादितिरस्करणसमर्थां कुरु तथा रसरहितद्रव्याणि सरसानि कुरु इति शेषः ।

मन्त्रः

ॐ येऽ३स्यां स्थ प्राच्यां दिशि हेतयो नाम देवास्तेषांवो अग्निरिषवः ।
तेनो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥ 2 ॥

(अथर्ववेद, काण्ड-3, सू.-26, मं.-2)

पदपाठः

ये । अस्याम् । स्थ । प्राच्याम् । दिशि । हेतयः । नाम । देवाः । तेषाम् । वः । अग्निः । इषवः । ते । नः । मृडत । ते । नः । अधि । ब्रूत । तेभ्यः वः । नमः। तेभ्यः । वः । स्वाहा ॥

सरलार्थः

हे देवाः ! पूर्वस्यां दिशि दानादिगुणैः सम्पन्नाः ''हेति'' संज्ञकाः वा आयुधस्वरूपाः देवाः भवन्त एव सन्ति । भवन्तः बाणाः अग्निसमाः सन्ति । त्वम् अस्मान् सुखी कुरु । भवतां वचनैः त्वम् अस्मभ्यम् अभयदानं देहि । वयं भवन्तं नमस्कारान् कूर्मः । तथा च ''स्वाहा'' शब्देन इदम् आहुतिरूपेण संसारमङ्गलाय भवद्भ्यः प्रदीयते । इत्यर्थः ।

मन्त्रः

ॐ येऽ३स्यां स्व दक्षिणायां दिस्यऽविष्यवो नाम देवास्तेषांवः काम इषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो नमस्तेभ्यो वः स्वाहा ॥ (अथर्ववेद, कां.-3, सू.-26, मं.-2)

पदपाठः

ये । अस्याम् । स्थ । दक्षिणायाम् । दिशि । अविष्यवः । नाम । देवाः । तेषाम् । वः । कामः । इषवः । ते । नः । मृडत । ते । नः । अधि । ब्रूत । तेभ्यः । वः । नमः । तेभ्यः । वः । स्वाहा ॥

सरलार्थः

हे दानादिगुणयुक्ता गन्धर्वाः ! ये यूयम् अस्यां दक्षिणायां दिशि अस्मद् आवासस्यानाद् दक्षिणस्यां दिशि ''अविष्युः'' नाम संज्ञकाः भवथ । भवन्तः अस्मभ्यं सुखिनः कुर्वन्तु । भवतां वचनैः त्वम् अस्मभ्यम् अभयप्रदानं कुरु । वयं भवन्तं नमस्कारान् कुर्मः । तथा च ''स्वाहा'' शब्देन इदम् आहुतिरूपेण संसारमङ्गलाय भवद्भ्यः प्रदीयते इति ।

मन्त्रः

ॐ येऽ॒स्यां स्थ प्र॒तीच्यां॑ दि॒शि वै॒राजा॒ नाम॑ दे॒वास्तेषां॑ व॒ आप॒ इषवः ।
ते नो॑ मृडत॒ ते नोधि॑ ब्रूत॒ तेभ्यो॑ वो॒ न॒मस्तेभ्यो॑ व॒ः स्वाहा॑ ॥ (अथर्ववेद, कां.-3, सू.-26, मंत्र-3)

पदपाठः

ये । अ॒स्याम् । स्थ । प्र॒तीच्याम् । दि॒शि । वै॒राजाः । नाम॑ । दे॒वाः । तेषाम् । व॒ः । आपः॑ । इषवः । ते । न॒ः । मृ॒डत । ते । न॒ः । अधि॑ । ब्रू॒त । तेभ्यः॑ । ब॒ः । नमः॑ । तेभ्यः॑ । व॒ः । स्वाहा॑ ॥

सरलार्थः

हे देवाः ! ये यूयम् अस्यां प्रतीच्यां दिशि वैराजा नाम विराट् अन्नं तस्य प्रदातारः एतत् संज्ञा भवथ । वृष्टिः एव भवतां बाणः असि । अतः भवन्तः अस्मभ्यं सुखसमृद्धिं प्रदातुं समर्थाः । भवतां वचनैः त्वम् अस्मान् अभयदानं कुरु । वयं भवन्तं नमस्कारान् कुर्मः । तथा च ''स्वाहा'' शब्देन इदम् आहुतिरूपेण संसारमङ्गलाय भवद्भ्यः प्रदीयते इत्यर्थः ।

मन्त्रः

ॐ येऽ॒स्यां स्थोदी॑च्यां दि॒शि प्र॒विध्य॑न्तो नाम दे॒वास्तेषां॑वो वात॒ इषवः ।
तेनो॑ मृडत॒ ते नोधि॑ ब्रू॒त तेभ्यो॑ वो॒ न॒मस्तेभ्यो॑ व॒ः स्वाहा॑ । (अथर्ववेद, कां.-3, सू.-26, मं.-4)

पदपाठः

ये । अ॒स्याम् । स्थ । उदी॑च्याम् । दि॒शि । प्र॒ऽविध्य॑न्तः । नाम॑ । दे॒वाः । तेषाम् । व॒ः । वातः॑ । इषवः । ते । न॒ः । मृ॒डत । ते । न॒ः । अधि॑ । ब्रू॒त । तेभ्यः॑ । व॒ः । नमः॑ । नेभ्यः॑ । व॒ः । स्वाहा॑ ॥

सरलार्थः

हे देवाः, दानादिगुणयुक्ता गन्धर्वाः ये यूयम् अस्थाम् उदीच्यां दिशि ''प्रविध्यन्त'' नाम एतत् संज्ञा भवथ । वायुरेव भवतां बाणः । अर्थात् भवतां बाणाः वायोः इव वेगवन्तः असि । अतः भवन्तः अस्मभ्यं सुखसमृद्धिं प्रदातुं समर्थाः । भवतां वचनैः त्वम् अस्मभ्यम् अभयदानं कुरु । वयं भवन्तं नमस्कारान् कुर्मः । तथा च ''स्वाहा'' शब्देन इदम् आहुतिरूपेण संसारमङ्गलाय भवद्भ्यः प्रदीयते ।

मन्त्रः

ॐ येऽ॒स्यां स्थ ध्रु॒वायां॑ दि॒शि नि॑लि॒म्पा नाम॑ दे॒वास्तेषां॑ व॒ ओष॑धीरिषवः ।
ते नो॑ मृडत॒ ते नोधि॑ ब्रू॒त तेभ्यो॑ वो॒ नमस्तेभ्यो॑ व॒ः स्वाहा॑ ॥

(अथर्ववेद, का.-3, सू.-26, मं.-5)

पदपाठः

ये । अ॒स्याम् । स्थ । ध्रु॒वाया॑म् । दि॒शि । नि॒ऽलि॒म्पाः । नाम॑ । दे॒वाः । तेषाम् । व॒ः । ओष॑धीः । इषवः । ते । न॒ः । मृ॒डत । ते । न॒ः । अधि॑ । ब्रू॒त । तेभ्यः॑ । व॒ः । नमः॑ । तेभ्यः॑ । व॒ः । स्वाहा॑ ॥

सरलार्थः

हे देवाः दानादिगुणयुक्ता ये यूयम् अस्यां ध्रुवायां स्थिरायां भूमिरूपायाम् अधस्ताद् दिशि ''निलिम्पा'' इति नाम्ना संज्ञां भवथ । धान्यौषधयः ब्रीहि-यव-तरु-गुल्माद्याः एव भवतां बाणतुल्याः । अनेन भवन्तः अस्मभ्यं सुखसमृद्धिं प्रदातुं समर्थाः । भवतां वचनैः त्वम् अस्मभ्यम् अभयप्रदानं कुरु । वयं भवन्तं नमस्कारान् कुर्मः । तथा च ''स्वाहा'' इति शब्देन इदम् आहुतिरूपं द्रव्यं संसारमङ्गलाय भवद्भ्यः प्रदीयते इत्यर्थः ।

मन्त्रः

ॐ येइ॒स्यां स्थोर्ध्वायां दि॒श्यवस्वन्तो नाम दे॒वास्तेषां वो बृ॒हस्पतिरिषवः ।
ते नो मृडत ते नोऽधि ब्रूत तेभ्यो वो न॒मस्तेभ्यो वः स्वाहा ॥

(अथर्ववेद, का.-3, सू.-26, मं.-6)

पदपाठः

ये । अ॒स्याम् । स्थ । ऊ॒र्ध्वायाम् । दि॒शि । अवस्वन्तः । नाम । देयाः । तेषाम् । व॒ः । बृ॒हस्पतिः । इषवः । ते । न॒ः । मृ॒डत । ते । न॒ः । अधि । ब्रू॒त । तेभ्यः । व॒ः । नमः । तेभ्यः । व॒ः । स्वाहा ॥

सरलार्थः

हे दामादिगुणयुक्ताः गन्धर्वाः ! ऊर्ध्वायां दिशि यूयं भवन्तः रक्षाकर्तृरूपेण ''अवस्वन्तः'' इति संज्ञां भवथ । देवगुरोः इव अमोघमन्त्रज्ञानयुक्तः बाणः एव भवताम् अस्त्रम् । अनेन दिव्यमन्त्रज्ञानयुक्तैः बाणैः त्वम् अस्माकं सुरक्षां कृत्वा सुखप्रदानं कुरु । भवतां वचनैः त्वम् अस्मभ्यम् अभयदानं देहि । वयं भवन्तं नमस्कारान् कुर्मः । तथा च ''स्वाहा'' इति शब्देन इदम् आहुतिरूपं द्रव्यं संसारकल्याणाय भवद्भ्यः प्रदीयते इति ।

मन्त्रः

ॐ प्राची दि॒गग्निरधिपतिरसि॒तो रक्षि॒तादि॒त्या इषवः ।
तेभ्यो नमोऽधिपतिभ्यो नमो रक्षि॒तृभ्योनम इषुभ्यो नम एभ्यो अस्तु ।
यो इ॒ स्मान् द्वेष्टि यं व॒यं द्विष्मस्तं वो जम्भे दध्मः ॥

(अथर्ववेद, कां.-3, सू.-27, मं.-2)

पदपाठः

प्राची । दिक् । अ॒ग्निः । अधिऽपतिः । अ॒सि॒तः । र॒क्षि॒ता । आ॒दि॒त्याः । इषवः । तेभ्यः । नमः । अधिपतिऽभ्यः । नमः । र॒क्षि॒तृऽभ्यः । नमः । इषुऽभ्यः । नमः । ए॒भ्यः । अ॒स्तु ॥ यः । अ॒स्मान् । द्वेष्टि । यम् । व॒यम् । द्विष्मः । तम् । व॒ः । जम्भे । द॒ध्मः ॥

सरलार्थः

प्राच्यां स्थितः ज्योतिरूपः अधिपतिः अग्निदेवः । तथा च प्राच्यामेव दिशि स्थितः ''असित'' संज्ञकः कृष्णवर्णः सर्पः जगद्रक्षार्थम् अवस्थितः तथा च अदितेः पुत्रा धात्रर्यमादयः आयुधानि च । अनेन पूर्वदिग्वर्तिभ्यः अग्न्युपलक्षितेभ्यः अधिपतिभ्यो नमस्कारः अस्तु । तथा तत्रत्येभ्यः रक्षितृभ्यः असितप्रभृतिभ्यः नमस्कारः अस्तु । तत्रेभ्यः इषुसंस्तुतेभ्यः आदित्येभ्यः नमस्करोति । एभ्यः उक्तेभ्यः अधिपत्यादिभ्यः सर्वेभ्यः नमस्कारोऽस्तु । एभ्यः अस्माकं कृते प्रीतिकरो भवतु एवं नमस्कारेण परितोष्य इष्टफलं प्रार्थयते । यः शत्रु अस्मान् प्रति द्वेषं करोति, वयं च यं शत्रुं प्रति द्वेषं कुर्मः, हे अग्न्यादिदेवाः ! तम् उभयविधं शत्रुं भक्षयन्तु इति ।

मन्त्रः

ॐ दक्षिणा दिगिन्द्रोधिपतिस्तिरश्चिराजी रक्षिता पि॒तर इषवः ।
तेभ्यो नमोधिपतिभ्यो नमो रक्षि॒तृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योइ॒स्मान् द्वेष्टि यं व॒यं द्विष्मस्तं वो जम्भे दध्मः ॥

(अथर्ववेद, कां.-3, सू.-27, मं.-2)

पदपाठः

दक्षिणा । दिक् । इन्द्रः । अधिऽपतिः । तिरश्चिऽराजिः । र॒क्षि॒ता । पि॒तरः । इषवः । तेभ्यः । नमः । अधिपतिऽभ्यः । नमः । र॒क्षि॒तृऽभ्यः । नमः । इषुऽभ्यः । नमः । ए॒भ्यः अ॒स्तु ॥ यः । अ॒स्मान् । द्वेष्टि । यम् । व॒यम् । द्विष्मः । तम् । व॒ः । जम्भे । द॒ध्मः ॥

सरलार्थः

परमैश्वर्यस्य दाता तथा च यः दक्षिणस्यां दिशि विद्यमानः अधिपतिः इन्द्रदेवः तथा च रक्षणकर्त्र्यः तिर्यगादिन्यः, पितृदेवताः एवं च तत्रत्याः दुष्टनिग्रहकराणि आयुधानि सन्ति तेभ्यः अधिपतिभ्यः नमः । रक्षणकर्तृभ्यः नमः । बाणेभ्यो नमः । तत्रत्येभ्यः दक्षिणस्यां दिशि स्थातृभ्यः अधिपत्यादिभ्यः सर्वेभ्यो देवेभ्यो नमस्कारः अस्तु । ते सर्वे अधिपत्यादयः अस्मत्कृते संसारस्य बन्धनं दूरीकृत्य, प्रीतिकतौरः च भवन्तु । यः शत्रुः अस्मान् प्रति द्वेषं करोति तथा च वयं यं शत्रुं प्रति द्वेषं कुर्मः हे अधिपत्यादिदेवाः ! तम् उभयविधं शत्रुं भक्षयन्तु इति ।

मन्त्रः

ॐ प्रतीची दिग् वरुणोधिपतिः पृदाकू रक्षितान्नमिषवः ।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥

(अथर्ववेद, कां.-3, सू.-27, मं.-3)

पदपाठः

प्रतीची । दिक् । वरुणः । अधिऽपतिः । पृदाकुः । रक्षिता । अन्नम् । इषवः । तेभ्यः । नमः । अधिपतिऽभ्यः । नमः । रक्षितृऽभ्यः । नमः । इषुऽभ्यः । नमः । एभ्यः । अस्तु । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः । तम् । वः । जम्भे । दध्मः ॥

सरलार्थः

वरुणदेवः यः पश्चमदिशायाः अधिपतिः । सः वरुणः अस्मदनुग्रहार्थं वर्तताम् इत्यर्थः ! वृदाकुः सर्वः पश्चमदिशः रक्षणकर्ता अस्ति । ब्रीहियवादिकम् अन्नं तत्रत्यदुष्टानां निग्रहकारीणि आयुधानि सन्ति, तेभ्यः पश्चिमदिग्वर्तिभ्यः वरुणदेवेभ्यः नमस्कारः अस्तु । तेभ्यः सर्वेभ्योऽपि नमस्कारोस्तु । तत्रत्येभ्यः बाणैः संस्तुतेभ्यः ब्रीहियवाधान्येभ्यो नमस्कारोऽस्तु । एतेभ्यः पश्चिमदिशि विद्यमानेभ्यः सर्वेभ्यः अधिपत्यादिभ्यः सर्वेभ्यो नमस्कारः । एते अधिपतयः अस्माकं संसारस्य बंधनं दूरीकृत्य अस्माकं कृते प्रीतिकराः भवन्तु तथा च यः शत्रुः अस्मान् प्रति द्वेषं करोति एवं च वयं चं शत्रुं प्रति द्वेषं कुर्मः, हे जलाधिपते ! तम् उभयविधं शत्रुं भक्षयतु इत्यर्थः ।

मन्त्रः

ॐ उदीची दिक् सोमोधिपतिः स्वजो रक्षिताशनिरिषवः ।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥

(अथर्ववेद, कां.-3, सू.-28, मं.-4)

पदपाठः

उदीची । दिक् । सोमः । अधिऽपतिः । स्वजः । रक्षिता । अशनिः । इषवः । तेभ्यः । नमः । अधिपतिऽभ्यः । नमः । रक्षितृऽभ्यः । नमः । इषुऽभ्यः । नमः । एभ्यः । अस्तु । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः । तम् । वः । जम्भे । दध्मः ॥

सरलार्थः

यः उत्तरदिशः स्वामी सोमदेवः स अस्माकं कृते अनुग्रहार्थं वर्तताम् । उत्तरदिशः रक्षकः स्वयमेव उत्पन्नः ''स्वज'' नामक सर्वः तथा च विद्युतवान् तत्रत्यः दुष्टानां निग्रहार्थायुधः, सर्वेभ्यः उत्तरदिग्वर्तिभ्यः सोमदेवेभ्यः नमः तथा च तत्रत्येभ्यः रक्षणकर्तृभ्यः ''स्वज'' नामकः सर्वेभ्यः नमस्कारोऽस्तु । पुनः उत्तरस्यामेव दिशि स्थितः ईषसंस्तुतेभ्यः अशनिः नमः । एतेभ्यः उत्तरस्यां दिशि विद्यमानेभ्यः अधिपत्यादिभ्यः सोमदेवेभ्यः नमस्कारोऽस्तु । एते अधिपतयः अस्मभ्यं प्रीतिं यच्छन्तु । यः शत्रुः अस्मान् पति द्वेषं करोति, वयं च यं शत्रुं प्रति द्वेषं कुर्मः, हे सोमदेव ! तम् उभयविधं शत्रुं भक्षयन्तु इत्यर्थः ।

मन्त्रः

ॐ ध्रुवा दिग् विष्णुरधिपतिः कल्माषग्रीवो रक्षिता वीरुधइषवः ।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योईस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥

(अथर्ववेद, कां.-3, सू.-27, मं.-5)

पदपाठः

ध्रुवा । दिक् । विष्णुः । अधिऽपतिः । कल्माषऽग्रीवः । रक्षिता । वीरुधः । इषवः । तेभ्यः । नमः । अधिपतिऽभ्यः । नमः । रक्षितृऽभ्यः । नमः । इषुऽभ्यः । नमः । एभ्यः । अस्तु । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः । तम् । वः । जम्भे । दध्मः ॥

सरलार्थः

स्थिरायाः वा अधोदिशायाः अधिपतिः सर्वव्यापकः विष्णुः सः अस्माकम् अन्तर्भूतं अन्धकाररूपम् अज्ञानं दूरीकरणार्थम् अधस्तात् विद्यमानः अस्ति । अधोदिशायाः रक्षकः कल्माषग्रीवः अस्ति । विरोहणशीलाः ओषधयः इषवः वृक्षादयश्त दुष्टनिबर्हणानि आयुधानि । तेभ्यः सर्वेभ्यः अधोभागस्य अधिपतिभ्यो विष्णुदेवताभ्यः नमस्कारोऽस्तु । अधोदिसि स्थितेभ्यः ईषसंस्तुभ्यः औषधिभ्यो नमः । एभ्यः अधोभागेभ्यः स्थितेभ्यः अधिपत्यादिभ्यः सर्वेभ्यो नमस्कारः । ते सर्वे अधिपतयः अस्माकं कृते प्रीतिप्रदा भवन्तु । यः शत्रुः अस्मान् प्रति द्वेषं करोति, वयं च यं शत्रुं प्रति द्वेषं कुर्मः, हे विष्णुदेव ! तम् उभयविधं शत्रुं भक्षयन्तु इत्यर्थः ।

मन्त्रः

ॐ ऊर्ध्वा दिग् बृहस्पतिरधिपतिः श्वित्रो रक्षिता वर्षामिषवः ।
तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।
योईस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥

(अथर्ववेद, कां.-3, सू.-27, मं.-6)

पदपाठः

ऊर्ध्वा । दिक् । बृहस्पतिः । अधिऽपतिः । श्वित्रः । रक्षिता । वर्षम् । इषवः । तेभ्यः । नमः । अधिपतिऽभ्यः । नमः । रक्षितृऽभ्यः । नमः । इषुऽभ्यः । नमः । एभ्यः । अस्तु । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः । तम् । वः । जम्भे । दध्मः ॥

सरलार्थः

ऊर्ध्वदिशायाः अधिपतिः बृहस्पतिः उपरिष्टाद् वर्तमाना दिक् मदीयम् अभिलषितं करोतु । तस्यां दिशायां ''श्वित्र'' नामक संज्ञकश्च सर्पः रक्षको भूत्वा शत्रुप्रभृतिभ्यः त्राता भवतु । अस्माकं सर्वेभ्यः दुःख-रोग-शोक-अज्ञानेभ्यश्च हे बृहस्पते ! अस्मान् पाहि । ऊर्ध्वदिशायाः रक्षकः वर्षाजलं दुष्टानिवारणायुधानि । तेभ्यः अधिपतिभ्यो नमः । रक्षणकतृभ्यः ईषुभ्यश्च नमस्कारः । एतेभ्यः ऊर्द्दिशि विद्यमानेभ्यः देवेभ्यः नमस्कारोऽस्तु । एते सर्वे अधिपतयः अस्माकं कृते प्रीतिकराः भवन्तु । यः शत्रुः अस्मान् प्रति द्वेषं करोति, वयं च यं शत्रुं द्वेषं कुर्मः, हे बृहस्पते ! तम् उभयविधं शत्रुं भक्षयन्तु इति ।

मन्त्रः

ॐ उदितस्त्रयो अक्रमन् व्याघ्रः पुरुषो वृकः ।
हिरुग्धि यन्ति सिन्धवो हिरुग् देवो वनस्पतिर्हिरुङ्नमन्तुशत्रवः ॥

(अथर्ववेद, कां.-4, सू.-3, मं.-2)

पदपाठः

उत् । इतः । त्रयः । अक्रमन् । व्याघ्रः । पुरुषः । वृकः . हिरुक् । हि । यन्ति । सिन्धवः । हिरुक् । देवः । वनस्पतिः । हिरुक् । नमन्तु । शत्रवः ॥

सरलार्थः

अस्य मन्त्रस्य दृष्टा ऋषिः अथर्वा विद्यते । रुद्रादिः देवता तथा च अनुष्टुप्छन्दोबद्धः मन्त्रोऽयं वर्तते ।

अनेन मन्त्रेण गवादीनां व्याघ्र-चोरादिभयबिवृत्यर्थं खादिरं शङ्कुं संपात्य अभिमन्त्र्य तेन गोसंचारभूमिं लिखता गवाम् अनुव्रजनं करणीयं भवति । तत्र प्रार्थना कृता वर्तते यत् - व्याघ्रः, चोरपुरुषः, वृकः एते त्रयः अस्मात् स्थानान् पलायनं कुर्वन्तु । यथा नद्यः निम्नाभिमुखीभूताः प्रवहन्ति तथा व्याघ्रादयो हिंसकाः निम्नमुखीभूय गच्छन्तु । यथा वनस्पत्यादिषु अधिष्ठाता देवः तत्र, अन्तर्हिंतरूपेण वर्तते तथैव व्याघ्रादयो हिंसकाः हिरुक् नाम अन्तर्हिता भवन्तु । अपि च व्याघ्रादीनां ये शत्रवः सन्ति ते तान् व्याघ्रादीन् अन्तर्हितान् कुर्वन्तु ! अनेन मंत्रेण उद्घटम् अभिमन्त्र्य गोप्रचारदेशे निनयेत् । ततः पांसुकूटं तत्र कृत्वा अर्धे दक्षिणहस्तेन विक्षिपेत् तथा च सारुपवत्सम् ओदनम् इन्द्राय त्रिर्जुहुयात् इति ।

मन्त्रः

ॐ परेणैतु पथा वृकः परमेणोत तस्करः ।
परेण दत्वती रज्जुः परेणाघायुरर्षतु॥

(अथर्ववेद, कां.-4, सू.-3, मं.-2)

पदपाठः

परेण । एतु । पथा । वृकः । परमेण । उत । तस्करः । परेण । दत्वती । रज्जुः । परेण । अघायुः । अर्षतु ॥

सरलार्थः

अस्मद् संचारमार्गाद् अन्येन अरण्यश्वा गच्छतु । तस्करः चौरोऽपि ततोपि दूरतरेण मार्गेण गच्छतु । दन्तवती रज्ज्वाकृतिः सर्पः अन्येन मार्गेण गच्छतु । य एवम्विधः अन्योपि हिंस्रः प्राणी अस्मत्संचरणप्रदेशे विद्यते सोपि अन्येन पथा गच्छतु इति ।

शब्दार्थः

भेषजम् - औषधम् **वैराजा** - विराट् अन्नस्य प्रदाता **प्रविध्यन्तः** - प्रकर्षेण ताडयन्तः **निलिम्पा** - नितरां लिप्ताः आश्रिताः **असित** - कृष्णवर्णसर्पः विशेषः संज्ञः **पृदाकुः** - कुत्सितशब्दकारी **स्वजः** - स्वयमेव उत्पन्नः **अशनिः** - दम्भोलिः, विद्युत् **कल्माषग्रीवः** - कृष्णवर्णग्रीवायुक्तः सर्पः **श्वित्रः** - श्वेतवर्णयुक्तः सर्पः **ऊर्ध्वदिशि** - ऊर्ध्वदिशायां **वृकः** - अरण्यश्वा, हिंसकाः **प्राच्याम्** - पूर्वदिशायाम् **इषवः** - बाणाः **हिरुक्** - अन्तर्हितः

स्वाध्यायः

1. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तराणि लिखन्तु ।

(1) अतिभोजनकर्तारं कः नाशयति ?

(अ) विष्णुः (ब) वरुणः (क) रुद्रः (ड) ब्रह्मा

(2) पूर्वस्यां दिशि विद्यमानानां देवानां संज्ञा का ?

(अ) हिरुक् (ब) श्वित्र (क) अविष्युः (ड) हेति

(3) गन्धर्वा: कीदृशा: ?

(अ) हिंसका: (ब) रक्षका: (क) दानादिगुणयुक्ता: (ड) प्रेरका:

(4) ''वैराजा'' इति संज्ञका: देवा: कस्यां दिशि निवसन्ति ?

(अ) प्रतीच्यां (ब) उदीच्यां (क) ऊर्ध्वायां (ड) प्राच्यां

(5) ''प्रविध्यन्त'' संज्ञकानां देवानां बाणा: कीदृशा: ?

(अ) वायोरिव वेगवन्ता: (ब) अग्नितुल्या: प्रकाशिता:

(क) अन्तरिक्ष सदृशा: (ड) जलतुल्या: शीतला:

(6) ''निलिम्पा'' शब्दस्य कोऽर्थ: ?

(अ) नित्य लिप्ता: (ब) नितरां लिप्ता: (क) निकृष्टेन लिप्ता: (ड) निर्गतेन लिप्ता:

(7) देवगुरो: बाणा: कीदृशा: ?

(अ) अमोघमंत्रज्ञानयुक्ता: (ब) अतिशीघ्रगा: (क) मंदगतियुग्मा: (ड) व्यर्था:

(8) ''कल्माषग्रीव:'' शब्दस्य कोऽर्थ: ?

(अ) कुत्सितग्रीव: (ब) दीर्घग्रीव: (क) ऊर्ध्वग्रीव: (ड) कृष्णवर्णग्रीव:

(9) श्वेतवर्णस्य सर्पस्य कृते क: शब्द: प्रयुज्यते ?

(अ) असित: (ब) निलिम्प (क) हिरुक् (ड) श्वित्र:

(10) ''वृक:'' अर्थात् किम् ?

(अ) दम्भोलि: (ब) अख्यश्वा (क) बाणा: (ड) अन्तर्हित

2. निम्नाङ्कितानाम् एकवाक्येन उत्तराणि यच्छत ।

(1) प्राच्यां दिशि रक्षाकर्तृरूपेण के देवा: विद्यमाना: सन्ति ?

(2) ऊर्ध्वदिश: अधिपति: क: देव: ?

(3) भगवत: रुद्रस्य भेषजं किं भवति ?

(4) प्रतीच्यां विद्यमानानां देवानां बाणा: कीदृशा: ?

(5) बृहस्पति: कस्यां दिशायाम् अधिपतिरूपेण स्थित: ?

(6) कस्या: दिशाया: देवा: अन्तर्भूतम् अज्ञानं दूरी-कुर्वन्ति ?

(7) सोमदेव: कस्यां दिशि स्वामित्वेन स्थित: ?

(8) ''श्वित्र:'' इत्यस्य कोऽर्थ: ?

(9) पश्चिमदिश: आयुधानि कानि ?

(10) ''उदितस्त्रयो...'' इति मंत्रस्य दृष्टा ऋषि: क: ?

3. निम्नाङ्कितानां मन्त्राणां भावार्थं लिखन्तु ।

(1) ॐ ये३स्यां स्थ प्राच्यां दिशि हेतयो नाम देवास्तेषां वो अग्निरिषव: ।

तेनो मृडत ते नोऽथि ब्रूत तेभ्यो वो नमस्येभ्यो व: स्वाहा ॥

(2) दक्षिणा दिगिन्द्रोधिपतिस्तरश्चिराजी रक्षिता पितर इषवः ।

तेभ्यो नमोधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नम एभ्यो अस्तु ।

योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तं वो जम्भे दध्मः ॥

(3) ॐ उदितस्त्रयो अक्रमन् व्याघ्रः पुरुषो वृकः ।

हिरुग्धि यन्ति सिन्धवो हिरुग् देवो वनस्पतिर्हिरुङनमन्तु शत्रवः ॥

4. निम्नाङ्कितानां मन्त्राणां पूर्तिः विधेया ।

(1) ये3स्यां स्योर्ध्वायां .... ॥

(2) ध्रुवा दिग् विष्णुरधिपतिः .... ॥

(3) परेणैतु पथा वृकः .... ॥

5. निम्नलिखितानां शब्दरूपाणां परिचयं यच्छत ।

(1) नधम् (2) भूमिम् (3) देवेभ्यः (4) आयुधानि (5) अधिपतयः (6) दिशायाः (7) कर्तः (8) ऐश्वर्यस्य (9) अदितेः (10) रूपेण

6. निम्नलिखितानि धातुरुपाणि परिचिनोतु ।

(1) नयेत् (2) व्रजति (3) कुरु (4) दीयते (5) प्रार्थयते (6) भक्षयन्तु (7) विचरामः (8) पाहि (9) गच्छथ (10) जुहुयात्

7. अधोलिखितानां संधि-विच्छेदं कुरुत ।

(1) देवास्तेषाम् (2) नोऽधि (3) येऽस्याम् (4) ओषधीरिषवः (5) दिगग्निः (6) रक्षितादित्या (7) नमोधिपतिभ्यः (8) रक्षितान्नम् (9) विष्णुरधिपतिः (10) उदितस्त्रयः

8. अधोलिखितानां संधिं कुरुत ।

(1) परेण + एतु (2) वनस्पतिः + हिरुक् (3) बृहस्पतिः + अधिपतिः (4) यः + अस्मान् (6) अन्नम् + इषवः (5) द्विष्मः + तम् (7) दिक् + इन्द्रः (8) अधिपतिः + असितः (9) नमः + तेभ्यः (10) जहि + अरसान्

छात्र-प्रवृत्तिः

अथर्ववेदीयमन्त्राणां स्वरज्ञानविषये ज्ञेयम् ।

विशिष्टज्ञानम्

मनसा कर्मणा वाचा, शुचिः संगविवर्जितः ।
कुर्याद् रुद्राभिषेकं च, प्रीतये शूलपाणिनः ॥

सरलार्थः

भगवतः शूलपाणीश्वरस्य महादेवस्य वा प्रसन्नताप्राप्त्यर्थं मनसा, कर्मणा, एवं च वाण्या पवित्रः शुद्धो वा भूत्वा रुद्राभिषेकं कुर्यात् इति ।

●

20 रुद्राभिषेकीय-अथर्ववेदमन्त्राः - भागः-2

प्रस्तावना

समाजे शान्तिः निर्भयत्वं स्यात् चेत् ज्ञानं-कर्म एवं भक्तिः विलसिता भवितुम अर्हति । मानवः प्रसन्नः भवितुम् अर्हति । तस्मात् अथर्ववेदः अस्ति । अथर्ववेदस्य उद्भवः ब्रह्मणः उत्तरमुखात् जातः । अथर्वनामा ऋषिः स्वर्गाद् अग्निं पृथिव्याम् आनयत् । ब्रह्मणाक्षं ब्रह्मविद्यां शिक्षिता । अनेन पुरोहितेन यः वेदः रचितः सः अथर्ववेदः इति नाम्ना ज्ञायते । कर्दमऋषेः पुत्री शान्तिः तस्य पत्नी आसीत् ।

अथर्ववेदोपरि सायणाचार्यस्य एव एकं भाष्यं मिलति । किन्च अद्याऽपि सम्पूर्णकोषः अनुपतब्धः एव अस्ति । अंशोऽयम् अद्याऽपि त्रुटित एव अस्ति । अथर्ववेदस्य विंशतिकोण्डेषु केवलं द्वादशकण्डोपरि एव सायणभाष्यं मिलति ।

पाठेऽस्मिन् छात्राणां कृते अथर्ववेदमन्त्राणाम् अर्थावबोधनार्थं सायणाचार्येण कृताः मन्त्रार्थाः प्रदत्ताः सन्ति ।

मन्त्रः

ॐ अक्ष्यौऽचने मुखं च ते व्याध्र जम्भयामसि ।

आत् सर्वान् विंशतिं नखान् ॥

(अथर्ववेद, काण्ड - 4, सूकत - 3, मंत्र - 3)

पादपाठः

अक्ष्यौऽ । च । ते । मुखम् । च । ते । व्याध्र । जम्भयामसि । आत् । सर्वान् । विंशतिम् । नखान् ॥

सरलार्थः

मंत्रेऽस्मिन् हिंसकपशुं व्याध्रं प्रति तस्य हिंसाकर्तुं समर्थानां अङ्गनां प्रति कथनं कृतम् अस्ति यत् -

हे व्याध्र ! वयं तव अक्षिणी मुखं च जम्भयामः । ततः विंशतिसंख्यकान् पञ्चशः अवस्थितान् सर्वान् नखान् विनाशयामः इत्यर्थः ।

मन्त्रः

ॐ व्याध्रं दत्त्वतां वयं प्रथमं जम्भयामस्ति ।

आदु ष्टेनमथो अहि चातुधानमथो वृकम् ॥

पादपाठः

व्याध्रम् । दत्त्वताम् । वयम् । प्रथमम् । जम्भयामसि । आत् । ऊं इति । स्तेनम् । अथो इति । अहिम् । चातुऽधानम् । अथो इति । वृकम् ॥

सरलार्थः

दन्तवतां हिंस्राणां मध्ये व्याध्रं प्रथमं वयं जम्भयामः । अनन्तरम् एव तस्करं जम्भयामः । ततः सर्पं, यातुधानं वृकं च नाशयामः । इति ।

मन्त्रः

ॐ यो अद्य स्तेन आयति स संपिष्टो अपायति ।

प्रथामपध्वंसेनैत्विन्द्रो वज्रेण हन्तु तम् ॥

(अ. वे, कां - 4, सू - 3, मं - 5)

पादपाठः

यः । अद्य । स्तेनः । आऽअयति । सः । सम्ऽपिष्टः । अप । अयति । प्रथाम् । अपऽध्वंसेन । एतु । इन्द्रः । वज्रेण । हन्तु । तम् ॥

सरलार्थः

अद्य यः चौरः आगच्छति । सः संपिष्टः सन् अपगच्छति । स च मार्गाणां मध्ये ध्वंसकेन मार्गेण अपगच्छतु । तादृशेन मार्गेण अपगच्छन्तं तम् इन्द्रः स्वकीयेन वज्रायुधेन हिनस्तु इत्यर्थः ।

मन्त्रः

ॐ मूर्णा मृगस्य दन्ता अपिशीर्णा उ पृष्टयः ।
निमुक्ते गोधा भवतु नीचायच्छशयुर्मृगः ॥

(अ. वे, कां - 4, सू. - 3, मं. - 6)

पादपाठः

मूर्णाः । मृगस्य । दन्ताः । अपिऽशीर्णाः । ऊं इति । पृष्टयः । निऽम्रुक् । ते । गोधा । भवतु । नीचा । अयत् । शशयुः । मृगः ॥

सरलार्थः

हिंस्रस्य व्याघ्रादेः दन्ताः मूढाः भवन्तु । श्रृङ्गयुक्तानां हिंसकानां शृङ्गादयः अवयवा अपि मूढाः भवन्तु । पार्श्व-अस्थीनि अपि मूढानि भवन्तु । हे पान्थ ! तव "गोधा" एतत् संज्ञः प्राणी निम्रुक् भवतु । शयनशीलः दृष्टो मृगः न्यग्भूतेन मार्गेण अयातु इत्यर्थः ।

मन्त्रः

ॐ यत् संयमो न वि यमो वियमो यन्न संयमः ।
इन्द्रजाः सोमजा आथर्वणमसि व्याघ्रजम्भनम् ॥

(अ. वे. कां - 4, सू - 3, मं - 7)

पादपाठः

यत् । समऽयमः । न । वि । यमः । वि । यमः । यत् । न । समऽयमः । इन्द्रऽजाः । सोमऽजाः । आथर्वणम् । असि । व्याघ्रऽजम्भनम् ॥

सरलार्थः

इन्द्राज्जातः सोमाज्जातः सम्यग् व्याघ्रादीनां मन्त्रसामर्थ्येन नियमनं यत् अस्ति, न असौ वियमः भवति । कृतस्य संयमस्य अन्यथाभावो नास्ति इत्यर्थः । तथा वियमः यत् मन्त्रेण क्रियते न अयं संयमः । आथर्वणस्य क्रियाकलापस्य न कुत्रापि अन्यथाभावः अस्ति इत्यर्थः । अनेन सूक्तेन क्रियमाणं खादिशङ्कया लेखनादिकं क्रियाकलापं संबोध्य ब्रूते । हे क्रियाकलाप ! व्याघ्रादिदुष्टप्राणिहिंसकः असि इत्यर्थः ।

मन्त्रः

ॐ भवाशवौ मन्वे वां तस्य वित्तं ययोर्वामिदं प्रदिशियद् विराचते ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नौ मुञ्चतमंहसः ॥

(अ.वे, का - 4, सू - 28, मं - 2)

पादपाठः

भवाशर्वौ । मन्वे । वाम् । तस्य । वित्तम् । ययोः । वाम् । इदम् । प्रऽदिशि । यत् । विऽरोचते । यौ । अस्य । ईशाथे इति । द्विडपदः । यौ । चतुःऽपदः । तौ । नः । मुखतम् । अंहसः ॥

सरलार्थः

हे परमेश्वरौ ! अहं युवयोः महत्त्वम् अवगन्तुं शक्नोमि । इदं सम्पूर्णं जगत् युवयोः आज्ञानुसारेण एव प्रकाशितं

भवति । अस्मिन् जगति द्विपादानां प्राणिजन्यानां मानवादीनां युवाम् ईश्वरौ भवथः । अपि च चतुष्पादनां प्राणिजन्यानां गवादीनां युवाम् ईश्वरौ भवथः । अतः हे भवशर्वौ ईश्वरौ ! अस्माकम् अपि पापं दूरीकृत्य सुख-समृद्धिप्रदायकौ भवथः इत्यर्थः ।

मंत्रः

ॐ ययोरभ्यध्व उत पद दूरे चिद् यौ विदिताविषुमृतामसिष्ठौ ।
चावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥

(अ.वे, कां - 4, सू. - 28, मं. - 2)

पादपाठः

ययोः । अभिऽअध्वे । उत । यत् । दूरे । चित् । यौ । विदितौ । इषुऽभृताम् । असिष्ठौ । यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥

सरलार्थः

भवाशर्वयोः ईश्वरयोः समीपे वर्तते, अपि च दूरे वर्तते तत् सर्वं वस्तुजातं भवतोः प्रशासनस्य विषयः अस्ति । परमेश्वरौ भवाशर्वौ सर्वैः प्रज्ञातौ धनुषि आरोपितस्य वाणस्य भर्तारौ प्रसिद्धौ स्तः । यौ द्विपदां चतुष्पदां प्राणिनां स्वामिनौ स्तः । तौ अस्मान् पापात् विमोचयताम् इत्यर्थः ।

मन्त्रः

ॐ सहस्राक्षौ वृत्रहणा हुवेऽहं दूरेगव्यूती स्तुवन्नेम्युग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥

पादपाठः

सहस्रऽअक्षौ । वृत्रऽहना । हुवे । अहम् । दूरेगव्यूति इति दूरेऽगव्यूती । स्तुवन् । एमि । उग्रौ । यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥

सरलार्थः

गोसंचरदेशाद् दूरदेशे र्क्तमानौ, वृत्रासुरं हतवन्तौ, शत्रूणां हन्तारौ सहस्राक्षौ, उग्रौ हे भवाशर्वौ ! अहं भवन्तौ आह्वयामि, प्रार्थयामि च । माम् इमां प्रार्थनां स्वीकृत्य अस्माकं समीपम् आगच्छताम् । भवन्तौ द्विपदां प्राणिजन्यानां तथा च चतुष्पदां प्राणिजन्यानाम् ईश्वरौ स्तः । अतः हे भवाशर्वौ ! अस्माकम् अपि पापं दूरीकृत्य सुख-समृद्धिप्रदायकौ भवथः इत्यर्थः ।

मन्त्रः

ॐ यावारेभाथे बहु साकमग्रे प्रचेदस्राष्ट्र मभिमां जनेषु ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥

(अ. वे. कां - 4, सू. - 28. मं - 4)

पादपाठः

यौ । आरेभाथे इत्याऽरेमाथै । बहु । साकम् । अग्रे । प्र । च । इत् । अस्राष्ट्रम् । अभिऽमाम् । जनेषु । यौ । अस्य । ईशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः मुख्तम् । अंहसः ॥

सरलार्थः

हे ईश्वरौ ! सृष्टिनिर्माणादौ युवां बहूनां प्राणिनां निर्माणं कृतवन्तौ । तेषु उत्पन्नेषु जनेषु शत्रु आदिलक्षणानां जनानां सृष्टिं युवामेव च तत्पापानुसारेण प्रकर्षेण उत्पादितवन्तौ । भवन्तौ द्विपदां प्राणिजन्यानां तथा च चतुष्पदां प्रायिजन्यानां स्वामिनौ स्तः । अतः हे भवाशर्वौ ! अस्माकम् अपि पापं दूरीकृत्य सुख-समृद्धिप्रदायकौ भवथः इत्यर्थः ।

मन्त्रः

ॐ ययोर्वधान्नापपद्यते कञ्चनान्तर्देवेषून मानुषेषु ।
यावस्येशाथे द्विपदो यौ तचुष्पदस्तौ नो मुञ्चतमंहसः ॥

(अ. वे, कां - 4, सू. - 28, मं - 5)

पादपाठः

ययोः । वधात् । न । अपऽपद्यते । कः । चन । अन्तः । देवेषु । उत । मानुषेषु । यौ । अस्य । इशाथे इति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥

सरलार्थः

हे भवशर्वौ ! भवतः आयुधात् देवानां मनुष्याणां च मध्ये न कोऽपि जीवितुं शक्नोति । भवन्तौ द्विपदां प्राणिजन्यानां तथा च चतुष्पदां प्राणिजन्यानां स्वामिनौ स्तः । अतः हे ईश्वरौ ! अस्माकम् अपि पापं दूरीकृत्य सुखसमृद्धिप्रदायकौ भवथः इत्यर्थः ।

मन्त्रः

ॐ यः कृत्याकृन्मूलकृद् यातुधानो नितस्मिन् धत्तं वज्रमुग्रौ ।
यावस्येशाथे द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥

(अ. वे, कां - 4, सू. 28, मं. 6)

पादपाठः

यः । कृत्याऽकृत् । मूलऽकृत् । चातुऽधानः । नि । तस्मिन् । धत्तम् । वज्रम् । उग्रौ । यौ । अस्य । ईशाथेइति । द्विऽपदः । यौ । चतुःऽपदः । तौ । नः । मुञ्चतम् । अंहसः ॥

सरलार्थः

यः शत्रुः क्रियानिवृत्तया पिशाच्या छिनत्ति, पुनश्च यः राक्षसः अस्माकं वंशाभिवृद्धेर्मूलं कारणम् अपत्यं छिनत्ति, तम् उभयविधं शत्रुं स्वकीयेन वज्रेण आयुधेन निक्षिपताम् । भवन्तौ द्विपदानां प्राणिजन्यानां तथा च चतुष्पदानां प्राणिजन्यानां स्वामिनौ स्तः । अतः हे भवशर्वौ ! अस्माकम् अपि पापं दूरीकृत्य सुख-समृद्धिप्रदायकौ भवथः इत्यर्थः ।

मन्त्रः

ॐ अधि नो ब्रूतं पृतनासूग्रौ सं वज्रेण सृजतं यः किमीदी ।
स्तौमि भवाशर्वौ नाथितो जोहवीमि तौ नो मुञ्चतमंहसः ॥

(अ. वे, कां - 4, सू. 28, मं. 7)

पादपाठः

अधि । नः । ब्रूतम् । पृतनासु । उग्रौ । सम् । वज्रेण । सृजतम् । यः । किमीदी । स्तौमि । भवाशर्वौ । नाथितः । जोहवीमि । तौ । न । मुख्तम् । अंहसः ॥

सरलार्थः

हे भवाशर्वौ ! उग्रस्वभाक्युक्तौ स्तः । भवन्तौ निष्पक्षीयौ भूत्वा अस्माकं श्रेयोविषये वदताम् । अस्माकं ये द्वेष्टारः सन्ति तान् शत्रून् सङ्गामेषु वज्रेण सञ्योजयताम् । इदानीं किम् उत्पन्नं किं जातम् इति वदन्तः छिद्राणाम् अन्वेषणयुक्तान् द्वेषीयान् अपि आयुधेन संयोजचताम् । हे, महानुभावौ भवाशर्वौ । भवन्तौ ईश्वरौ इति मनसि निधाय अहं स्तौमि । भवन्तौ एव अस्मभ्यं सुखसमृद्धिं प्रदातुं समर्थौ स्तः । अतः भवन्तौ अस्माकम् अपि पापं दूरीकृत्य भवथः इत्यर्थः ।

मन्त्रः

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः ।
स बुध्न्याऽउपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥

(अ.वे, कां. - 5, सू. - 2, मं. 2)

पादपाठः

ब्रह्म । जज्ञानम् । प्रथमम् । पुरस्तात् । वि । सीमतः । सुऽरुचः । वेनः । आवः । सः । बुध्याऽः । उपऽमाः । अस्य । विऽस्थाः । सतः । च : योनिम् । असतः । च । वि । वः ॥

सरलार्थः

यत् संपूर्णजगतः मूलकारणं परमं ब्रह्मन वर्तते । तत् सृष्ट्यादौ हिरण्यगर्भसूर्यरूपेण समुत्पन्नं वर्तते । सः प्रकाशितः आदित्यः स्वप्रभामण्डलेन अन्धकारं दूरीकृत्य सम्पूर्णेऽस्मिन् जगति व्याप्नोति । सः सत्-असत्-पदार्थानां मूलकारणस्य परमात्मनः व्यापकः वर्तते ।

मन्त्रः

ॐ अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे ।
वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे ॥

(अ. वे, कां. : 5, सू. : 2. मं.: - 2)

पादपाठः

अनाप्ताः । ये । वः । प्रथमाः । यानि । कर्माणि । चक्रिरे । वीरान् । नः । अत्र । मा । दभन् । तत् । वः । एतत् । पुरः । दधे ॥

सरलार्थः

हे जनाः ! युष्माकम् अनुकूलाः ये शत्रवः प्रथमानि मुख्यानि आसन् यानि योगादीनि कर्माणि कृतवन्तः, तैः कर्मभिः ते शत्रवः अस्माकं वीर्यात् जातान् पुत्रपौत्रादीन्, अत्र अस्मिन् देशे मा हिंसन्तु । एतत् क्रियमाणं भैषज्यरूपं कर्म युष्माकं पुरस्तात रक्षणार्थं धारयामि इत्यर्थः ।

मन्त्रः

ॐ सहस्रधार एव ते समस्वरन् दिवो नाके मधुजिह्वा असश्चतः ।
तस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवे ॥

(अ. वे, कां - 5, सू. - 2, मं. - 3)

पादपाठः

सहस्रऽधारे । एव । ते सम् । अस्वरन् । दिवः । नाके । मधुऽजिह्वाः । असश्चतः । तस्य । स्पशः । न । नि । मिषन्ति । भूर्णयः । पदेऽपदे । पाशिनः । सन्ति । सेतवे ॥

सरलार्थः

द्युलोकस्य सहस्रम् अतिमधुरधाराभिः युक्ते सुखमये स्थाने ते निश्चलशान्तस्वभावयुक्ताः मधुरभाषिणश्च जनाः एकस्वरेण मिलित्वा कथयन्ति यत् तस्य रुद्रस्य गुप्तचराः न कदापि स्वपन्ति । ते पदे-पदे अपराधिनः धारयितुं पाशान् नीत्वा निष्ठन्ति इति ।

शब्दार्थः

अक्षिणी - नेत्रे **जम्भयामः** - नाशयामः **दन्तवतां** - खादनशीलानां **हिस्रांणां** -हिंसकानां, हिसायुक्तनां **यातुधानम्** - यक्षरक्षः प्रभृतिगृहम्, राक्षसम् **वृकम्** - सालावृकं, भल्लुकम् **संपिष्टः** - सम्पयक् दण्डितः **ध्वंसकेन** - कष्टेन **हिनस्तु** - घ्नन्तु, हन्तु **मूढाः** - खादने असमर्थाः **पान्थः** - यात्रिन् **निम्रुक्** - दृष्टिविषयः, दुष्टिपथम् **अयतु** - गच्छतु **न्यग्भूतेन** - निम्नमुखीभूतेन, नीचा **वियमः** - विरुद्धयमनम् **ब्रूते** - कथयति **असि** - भवसि **अवगन्तुं** - ज्ञातुं **द्विपादां** - पादद्वययुक्तानां **चतुष्पादां** - पादचतुष्टययुक्तानां **निष्पक्षीयौ** - पक्षपातरहितौ **द्वेषीयाः** - शत्रवः **सहस्राक्षौ** - सहस्रसंख्यकानि चक्षूंषि ययोः तौ

स्वाध्यायः

1. निम्नाङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तराणि लिखन्तु ।

(1) पाठानुसारेण व्याघ्रस्य कति संख्यकान् नखान् विनाशन्ति ?

(क) दश (ख) विंशतिः (ग) त्रिंशत् (घ) चत्वारिंशत्

(2) दन्तवतां हिंस्राणां मध्ये प्रथमं कं जम्भयन्ति ?

(क) सिंहम् (ख) व्याघ्रम् (ग) शृङ्गालम् (घ) गजम्

(3) चौरः कीदृशः सन् अपगच्छति ?

(क) संपिष्टः (ख) संकिलष्टः (ग) संतुष्टः (घ) संपुष्टः

(4) हिंसकानां शृङ्गाद्यानाम् अवयवाः कीदृशाः भवन्तु ?

(क) स्थिराः (ख) मूढाः (ग) व्यग्राः (घ) पुष्टाः

(5) व्याघ्रादीनां जम्भनं केन महर्षिणा दृष्टं वा कृतम् ?

(क) वसिष्ठेन (ख) गर्गेण (ग) विश्वामित्रेण (घ) अथर्वणेन

(6) द्विपदां चतुष्पदां च ईश्वरौ कौ देवौ स्तः ?

(क) इन्द्रवरुणौ (ख) ब्रह्मैन्द्रौ (ग) भवाशर्वौ (घ) ब्रह्मावरुणौ

(7) भवाशर्वौ कस्मात् विमोचयतः ?

(क) मोक्षात् (ख) पापात् (ग) पुण्यात् (घ) विचाशत्

(8) गोसंचरदेशाद् दूरदेशे वर्तमानौ कौ ?

(क) भवाशर्वौ (ख) इन्द्रकुबेरौ (ग) सोमनारायणौ (घ) वरुणरुद्रौ

(9) सृष्टिनिर्माणादौ भवाशर्वौ किं कृतवन्तौ ?

(क) बहूनां प्राणिनां निर्माणम् (ख) बहूनां जनानां हनम्

(ग) विविधानां कार्याणां नियमनम् (घ) सूक्ष्म-वस्तूनां सर्जनम्

(10) ‘‘द्वेषीयाः’’ शब्दस्य कोऽर्थः ?

(क) बान्धवाः (ख) शत्रवः (ग) गावः (घ) मित्राणि

2. निम्नाङ्कितानाम् एकवाक्येन उत्तराणि ददत ।

(1) उग्रस्वभावयुक्तौ कौ स्तः ?

(2) भवाशर्वौ कीदृशैः गुणयुक्तौ ?

(3) वृत्रासुरं कौ हतवन्तौ ?

(4) अन्धकारं दूरीकृत्य संपूर्णं जगति कः व्याप्नोति ?

(5) द्वेषीयान् संग्रामेषु कौ संयोजयताम् ?

(6) संपूर्ण-जगतः मूलकारणं कः वर्तते ?

(7) योगादीनि कर्माणि कृतवन्तः शत्रवः कं मा हिंसन्तु ?

(8) द्युलोकः कति धाराभिः युक्तः अस्ति ?

(9) अथर्वणमहर्षिणा केषां जम्भनं कृतम् ?

(10) यजमानः कीदृशौ भवाशर्वौ आह्वयति ?

3. निम्नाङ्कितानां मन्त्राणां भावार्थं लिखन्तु ।

(1) ॐ यत् संयमो वि यमो वियमो यन्न संयमः ।
इन्द्रजाः सोमजा आथर्वणमसि व्याघ्रजम्भनम् ॥

(2) ॐ सहस्राक्षौ वृत्रहणा हुवेऽहं दूरेगव्यूती स्तुवन्नेम्युग्रौ ।
यावस्येशाये द्विपदो यौ चतुष्पदस्तौ नो मुञ्चतमंहसः ॥

(3) ॐ अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे ।
वीरान् नो अत्र मा दभन् तद् व एतत् पुरो दधे ॥

4. निम्नाङ्कितानां मन्त्राणां पूर्तिः विधेया ।

(1) ॐ ब्रह्म जज्ञानं .... वि. वः ॥

(2) ॐ भवाशर्वौ .... मुञ्चतमंहसः ॥

(3) ॐ अक्ष्यौऽच ते .... नखान् ॥

5. निम्नलिखितानां शब्दरूपाणां परिचयं यच्छत ।

(1) महर्षिणा (2) भवाशर्वयोः (3) दूरदेशे (4) शत्रून (5) स्वामिनौ (6) प्राणिजन्यानाम् (7) संग्रामेषु (8) जगति (9) पुरस्तात् (10) धाराभिः

6. निम्नलिखितानि धातुरूपाणि परिचिनुत ।

(1) ब्रूते (2) हिनस्तु (3) अपगच्छति (4) नाशयामः (5) जम्भयसि (6) अयतु (7) आह्वयन्ति (8) गच्छताम् (9) शक्नुत (10) छिनत्ति

7. अधोलिखितानां संधिविच्छेदं कुरुत ।

(1) पथामपध्वम् (2) शशयुर्मृगः (3) आथर्वणमसि (4) स्तुवन्नेमि (5) साकमग्रे (6) चतुष्पद्वस्तौ (7) वज्रमुग्रौ (8) पृतनासूग्रौ (9) योनिमसतश्च (10) समस्वरन्

8. अधोलिखितानां संधियोजनं कुरुत ।

(1) आत् + ॐ + स्तेनम् (2) अपध्वंसेन + एतु (3) एतु + इन्द्रः (4) अयत् + शशयुः (5) ययोः + अभ्यध्व (6) सहस्र + अक्षौ (7) एभि + उग्रौ (8) यौ + अस्य (9) देवेषु + उत (10) बुध्न्याः + उपमाः

छात्र-प्रवृत्तिः

अथर्ववेदस्य प्राथमिकः परिचयो लेख्यः ।

विशिष्यज्ञानम्

यस्य राज्ञो जनपदे, अथर्वा शान्तिपारगः ।
निवसत्यपि तद् राष्ट्रं, वर्धते निरुपद्रवम् ॥

(अथर्ववेद भाष्यभूमिका)

सरलार्थः

यस्य राज्ञः जनपदे अथर्ववेदस्य ज्ञाता निवसति, तद् राष्ट्रं समस्तेषु उपद्रवेषु मुक्तं भूत्वा वृद्धिं प्राप्नोति प्रतिदिनं वर्धते च इत्यर्थः ।

•

21 महर्षिः वेदव्यासः

प्रस्तावना

''व्यासोच्छिष्टं जगत्सर्वम्'' इति सूक्तिः अस्माकं संस्कृतसाहित्ये विख्याता । इयं च सूक्तिः भगवतः वेदव्यासस्य विषये वर्तते । अस्माकं संस्कृते अष्टाविंशतिधा व्यासाः बभूवुः । तेषु एकः अन्यतमः अष्टाविंशतितमोऽयं कृष्णद्वैपायन-व्यासः । व्यासपरम्परा अनेन पद्येन ज्ञायते ...

व्यासं वशिष्ठनप्तारं, शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे, शुकतातं तपोनिधिम् ॥

पाठेऽस्मिन् अस्य महर्षेः जीवनं कवनं च प्रतिपादितम् अस्ति । येन छात्राः अस्य महात्मनः महत्ता विषये सम्यक् ज्ञानं प्राप्नुयुः ।



अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थं ऋग्यजुः सामलक्षणम् ॥

व्यासस्य जीवनम्ः

पराशरसत्यवतीभ्यां भगवतः व्यासस्य उद्भवः अभवत् । व्यासस्य जन्म यमुनानद्याः एकस्मिन् द्वीपे जातः, अतः ''द्वैपायनः'' इति नाम्ना अपि भगवान् वेदव्यासः कीर्तिमवाप । तथा च व्यासस्य शरीरवर्णः कृष्णः आसीत् अतः ''कृष्णद्वैपायनः'' इति नाम्ना ख्यातिं प्राप्तवान् । तथा च बदरीफलानां वनेषु भगवतः वासः आसीत्, अतः ''वादरायणः'' इति नाम्ना अपि समुच्यते ।

जन्मत एव भगवान् व्यासः स्वीयां मातरं ''यदा स्मरसि तदा अहम् आगमिष्यामि ।'' इति प्रत्ययवचनं (विश्वासवचनम्) प्रदाय वनम् अभ्यगात् । वाराणसीनगरस्य महादेवस्य उपासिका चेटिका भगवतः वेदव्यासस्य पत्नी अजायत । तथा च भगवतः व्यासस्य पुत्रः शुकदेवः अभवत् ।

भगवान् कृष्णद्वैपायनव्यासः वशिष्ठस्य प्रपौत्रः, शक्तिमुनेः पौत्रः, पराशरस्य आत्मजश्च वर्तते । वशिष्ठः ब्रह्मणः मानसपुत्रः आसीत् । फलतो व्यासपरम्परा इत्थं भवति –

ब्रह्मा

↓

वशिष्ठः

↓

शक्तिः

↓

पराशरः

↓

व्यासः (कृष्णद्वैपायनः)

↓

शुकदेवः

व्यासस्य वैदिकसाहित्ये संस्कृतसाहित्ये च योगदानम्

असौ भगवान् वेदव्यासः त्रिकालविद् आसीत् । अत एव भगवता इदं ज्ञातं यत् कलियुगे धर्मः क्षीणतां गमिष्यति तथा च जनानां सामर्थ्यमपि पूर्ववत् न स्थास्यति । अतः वेदव्यासेन वेदस्य त्रयो विभागाः निर्मापिताः तद्यथा –

(1) ऋग्वेदः (2) यजुर्वेदः (3) सामवेदः ।

एतेषां समाहारः एव ''वेदत्रयी'' इति उच्यते । पश्चात् च अथर्वाङ्गिरसमुनिभ्याम् अथर्ववेदः विहितः । वेदव्यासः क्रमशो हि निजान् पैल:जैमिन–वैशम्पायन:सुमन्तादीन् शिष्यान् वेदम् अध्यापयामास । व्यासस्य कार्यं वेदानां विभाजनमस्ति तच्च अनेन श्लोकेन ज्ञायते –

''वीर्यं तेजो बलं चाल्पं,
मनुष्याणामवेक्ष्य च ।
हिताय सर्वभूतानां
वेदभेदान् करोति सः ॥''

(–विष्णुपुराणे – 3/3/6)

वेदातिरिक्तं व्यासेन भगवता अष्टादशपुराणानां रचना कृता । तेषां पुराणानां शिक्षा च वेदव्यासः रोमहर्षणनाम्ने शिष्याय अर्पयामास तद्यथा –

''प्रख्यातो व्यासशिष्योऽभूत्,
सुतो वै रोमहर्षणः ।
पुराणसंहितां तस्मै,
ददौ व्यासो महामतिः ॥''

(– विष्णुपुराणे – 3/3/16)

पुराणसम्पादनान्तरं महाभारतमाख्यानं भगवान् वेदव्यासः अकरोत् । अत एव महाभारते आदि पर्वणि प्रमाणीयते

''त्रिभिर्वर्षैः सदोत्थायि
कृष्णद्वैपायनो मुनिः ।
महाभारतमाख्यानं,
कृतवानिदमुत्तमम् ॥''

(–महाभारत – आदि पर्व – 66/32)

अर्थात् त्रिषु वर्षेषु एव भगवान् वेदव्यासः अमुम् एकलक्षश्लोकात्मकं महाभारतमहाग्रन्थं विरचयामास । तथा च बृह्मसूत्रस्य रचनाम् अपि कृतवान् ।

व्यासस्य महिमा

भगवान् वेदव्यासः स्वयं विष्णोः अवतारः मन्यते । अत एव श्लोकोऽत्यं विश्रुतः -

''व्यासाय विष्णुरूपाय,
व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये,
वाशिष्ठाय नमो नमः ॥''

तथा च विष्णुपुराणे अपि भगवान् विष्णुः स्वयं कथयति यत् - अहं व्यासरूपं धारयित्वा पुराणानाम् अष्टादशभेदान् करोमि तथा चतुःलक्षात्मकश्लोकान् विदधा करोमि । तथा च पुराणानां रचयितुः व्यासस्य महिमा अनेन श्लोकेन तु सर्वाधिको दृश्यते -

अचतुर्वदनो ब्रह्मा, द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुः, भगवान् बादरायणः ॥

इत्थं हि भगवान् वेदव्यासः नितरां वन्दनीयः पूजनीयश्च अस्ति

शब्दार्थः

अष्टाविंशतिधा - अष्टाविंशतिः (28) संख्यका **परम्परा** - वंशावलिः **आत्मजः** - पुत्रः **मानसपुत्रः** - मनसोत्पन्नः **सर्वकूतानां** - सर्वजीवानां **भेदान्** - विभागान् **त्रिकालविद्** - त्रयाणां कालानां ज्ञाता **वाशिष्ठाय** - वशिष्ठस्य अपत्याय **स्वीयां** - स्वकीयाम्

स्वाध्यायः

1. निम्नङ्कितानां प्रश्नानां योग्यं विकल्पं चित्वा उत्तराणि लिखन्तु ।

(1) कस्योच्छिष्टं जगत्सर्वं वर्तते ?

(अ) देवोच्छिष्टम् (ख) व्यासोच्छिष्टम् (ग) मानवोच्छिष्टम् (घ) यक्षोच्छिष्टम्

(2) पराशरात्मजं वन्दे .... तपोनिधिम् ।

(अ) सोमतातम् (ख) वेदतातम् (ग) ब्रह्मतातम् (घ) शुकतातम्

(3) भगवान् वेदव्यासः कस्य आत्मजः ?

(अ) पराशरस्य (ख) ब्रह्मणः (ग) शक्तेः (घ) वशिष्ठस्य

(4) 'आत्मजः' शब्दस्य कोऽर्थः ?

(अ) शिष्यः (ख) प्रपौत्रः (ग) पौत्रः (घ) पुत्रः

(5) वेदव्यासस्य मातुः नाम किम् ?

(अ) सत्यवती (ख) तारावती (ग) भोगावती (घ) इन्द्रावती

(6) हिताय सर्वभूतानां .... करोति सः ।

(अ) वित्तभेदान् (ख) वेदभेदान् (ग) वर्गभेदान् (घ) वर्षभेदान्

(7) 'चेटिका' वेदव्यासस्य का आसीत् ?

(अ) भगिनी (ख) पुत्री (ग) पत्नी (घ) माता

(8) 'प्रत्ययवचनं' शब्दस्य अपरः शब्दः कः ?

(अ) शत्रुवचनम् (ख) मित्रवचनम् (ग) द्वेषवचनम् (घ) विश्वासवचनम्

(9) अथर्वाङ्गिरसमुनिभ्यां कः वेदः विहितः ?

(अ) ऋग्वेदः (ख) अथर्ववेदः (ग) यजुर्वेदः (घ) सामवेदः

(10) भगवान् वेदव्यासः कस्य अवतारः ?

(अ) विष्णोः (ख) रुद्रस्य (ग) ब्रह्मणः (घ) सूर्यस्य

2. निम्नाङ्कितानाम् एकवाक्येन उत्तराणि ददत ।

(1) भगवता वेदव्यासेन वेदस्य विभाजनं किमर्थं कृतम् ?

(2) कृष्णद्वैपायनः कतमः व्यासः वर्तते ?

(3) अस्माकं संस्कृतसाहित्ये कति व्यासाः बभूवुः ?

(4) वशिष्ठः कस्य मानसपुत्रः आसीत् ?

(5) भगवान् वेदव्यासः कस्य पौत्रः ?

(6) 'कृष्णद्वैपायनः' इति नाम्ना कथं कीर्तिमवाप व्यासः ?

(7) चेटिका कस्य देवस्य उपासिका आसीत् ?

(8) व्यासः स्वीयां मातरं किं प्रत्ययवचनं प्रददात् ?

(9) अष्टादशपुराणानां शिक्षां व्यासः कस्मै अर्पयामास ?

(10) पुराणानां विभाजनविषये भगवान् विष्णुः किं कथयति ?

3. निम्नलिखितानां टिप्पणी विधेया ।

(1) व्यासपरम्परा (2) व्यासमहिमा (3) वेदत्रयी

4. निम्नलिखितानां श्लोकानां पूर्तिः विधेया ।

(1) व्यासं वशिष्ठनप्तारं .... तपोनिधिम् ॥

(2) वीर्यं तेजो .... करोति सः ॥

(3) प्रख्यातो व्यास .... महामतिः ॥

5. निम्नलिखितानां शब्दरुपाणां परिचयं यच्छत ।

(1) वशिष्ठस्य (2) शक्तेः (3) संस्कृतौ (4) पधेन (5) पिताय (6) नधाः (7) फलानां (8) मातरं (9) मुनिभ्याम् (10) त्रिषु

6. निम्नलिखितानि धातुरुपाणि परिचितुत ।

(1) अभ्यगात् (2) स्थास्यति (3) निर्मापिता: (4) अर्पयामास (5) अकरोत् (6) विरचयामास (7) मन्येते (8) कथयतात् (9) संहरामि (10) दृश्यते

7. अधोलिखितानां संधिविच्छेदं कुरुत ।

(1) व्यासोच्छिष्टम् (2) विंशतितमोऽयम् (3) पौत्रमकल्मषम् (4) महादेवोपासिका (5) त्रिकालविदासीत् (6) समुच्यते (7) मनुष्याणामवेक्ष्य (8) अथर्वाङ्गिरस (9) वेदमध्याययामास (10) सम्पादनान्तरम्

8. अधोलिखितानां संधिं कुरुत ।

(1) शक्तिः + मुनेः (2) चतुः + वदनः (3) सदा + उत्थायि (4) श्लोकः + अयम् (5) त्रिभिः + वर्षैः (6) वेदाः + अतिरिक्तम् (7) अहम् + आगामिष्यामि (8) कृतवान् + इदम् (9) तच्च + अनेन (10) सर्वम् + आलोक्य

छात्रप्रवृत्तिः

वेदव्यासस्य महत्त्वसूचकानां श्लोकानां ज्ञानं प्राप्तव्यम् ।

विशिष्टज्ञानम्

तस्माद् राजा विशेषेण, अथर्वाणं जितेन्द्रियम् ।
दानसम्मानसत्कारैः, नित्यं समभिपूजयेत् ॥

सरलार्थः

अथर्ववेदस्य ज्ञाता राज्ञः जनपदे निवसति तस्मात् कारणात् राजभिः विशेषतः जितेन्द्रियः अथर्ववेदज्ञाता प्रतिदिनं दान-सम्मान-सत्कारैः पूजनीयः सेवनीयः च इति ।

• • •